सामवेदसंहिता

तत्र

छन्दआर्चिचकः

तत्रापि आग्नेयैन्द्रेति पर्वद्वयात्मकः

अध्यायचतुष्कः प्रथमोभागः

भगवत्सायणाचार्य्य-विरचित-भाष्य-सहितः

अधीतवेद-"प्रत्लकम्रनन्दिनी"-सम्पादकेन

श्रीसत्यव्रतसामश्रमिभट्टाचार्य्येण

वङ्गसामगेन

टीकिता यथावसरं शोभितश्च।



मुन्शीराम मनोहरलाल

पब्लिशर्स प्रा.लि.

SĀMAVEDA SAṂHITĀ
with the commentary of Sāyaṇa Āchārya

Edited by
Satyavrata Sāmaśramī Bhattacharyya

VOLUME II

MUNSHIRAM MANOHARLAL
Price ~~₹2800~~ for 5 volumes

Originally Published in Bibliotheca Indica, Calcutta, 1871-78.
New Series nos. 301, 321, 322, 323, 324 and 334.

Reprinted 1983

Printed and published by Munshiram Manoharlal Publishers Pvt. Ltd.,
Post Box 5715, 54 Rani Jhansi Road, New Delhi-110055.

॥ आर्चिकस्य परिच्छेद-सूची ॥

परिच्छेदः	पृष्ठं
अथ पावमानं पर्व ...	२
(अत्र पञ्चम-प्रपाठकान्तिमाः नवम-दशम-दशदात्मकाः १० ऋचः। तत्र ९ मे दश, १० मे दशेति)	
अथ षष्ठः प्रपाठकः ...	४३
= २ अर्द्धौ = ९ दशतः = (१मे दशति १० ऋचः, २ये १४, ३ये १२, ४र्थे १०, ५मे १२, ६ष्ठे ९, ७मे १२, ८मे १२, ९मे ८) ९९ ऋचः।	

परिच्छेदः	पृष्ठं
(इति पावमानं पर्व—अत्र पञ्चम-प्रपाठकीयाः शेषाः ऋचः २०+षष्ठ-प्रपाठकः समग्रः ९९ = सङ्कलनया ११९ ऋचः)।	
अथ आरण्यं पर्व ...	२४४
= ५ दशतः = (१मे दशति ९, २ये ७, ३ये १३, ४र्थे १२, ५मे १४) ५५ ऋचः।	
अथ महानाम्न्यः ...	२७१

॥ गेयगानस्य परिच्छेद-सूची ॥

परिच्छेदः	पृष्ठं
अथ द्वादश-प्रपाठकीयो द्वितीयार्द्धः (प्रथमार्द्धस्तु ऐन्द्रे पर्वणि गतः)	२
= ३१ सामानि।	
अथ त्रयोदश प्रपाठकः ...	१४
= २ अर्द्धौ = (३८—३५) ७१।	

परिच्छेदः	पृष्ठं
अथ चतुर्दश प्रपाठकः ...	५५
= २ अर्द्धौ = (३९—३०) ६६।	
अथ पञ्चदश प्रपाठकः ...	९१
= २ अर्द्धौ = (३९—३०) ६६।	
अथ षोडश प्रपाठकः ...	१४२
= २ अर्द्धौ = (३९—३५) ७४।	

॥ छन्दआर्चिक-परिशिष्टभूतस्य आरण्यगानस्य परिच्छेद-सूची ॥

परिच्छेदः	पृष्ठं
अथ अर्क-पर्व	३८७
अथ प्रथमः प्रपाठकः ...	३८७
= २ अर्द्धौ = (१७—२८) ५५ ।	
अथ द्वितीयः प्रपाठकः ...	४१७
= २ अर्द्धौ = (३४—२२) ५६ ।	
अथ छन्द-पर्व	४३६
अथ तृतीयः प्रपाठकः ...	४४६
= २ अर्द्धौ = (३०—२५) ५५ ।	

परिच्छेदः	पृष्ठं
अथ व्रत-पर्व	४६४
अथ चतुर्थः प्रपाठकः ...	४६४
= २ अर्द्धौ = (२०—२०) ४० ।	
अथ पञ्चमः प्रपाठकः— ...	४८७
= २ अर्द्धौ = (२२—२२) ४४ ।	
अथ षष्ठः प्रपाठकः—	५०४
= २ अर्द्धौ = (१९—२१) ४० ।	

॥ अथ छन्दआर्चिक-परिशिष्ट-परिशिष्टरूपस्य स्तोभस्य परिच्छेद- सूची ॥

परिच्छेद	पृष्ठं
अथ प्रथमः प्रपाठकः ...	५१९
= द्वौ अर्द्धौ = (८—१४) २२ ।	

परिच्छेदः	पृष्ठं
अथ द्वितीयः प्रपाठकः ...	५२२
= एकोऽर्द्धः = ११ ।	

॥ अथ ऋन्दआर्चिक-द्वितीय-परिशिष्टस्य परिच्छेद-सूची ॥

परिच्छेदः	पृष्ठं
अथ भारण्डं साम	५४३

॥ अथ ऋन्दआर्चिक-तृतीय-परिशिष्टस्य-परिच्छेद-सूची ॥

परिच्छेदः	पृष्ठं
अथ तवस्यावीयं साम	५४६

॥ अथ सायणभाष्यस्य परिच्छेद-सूची ॥

परिच्छेदः	पृष्ठं
अथ पञ्चमोऽध्यायः ...	१
= ११ खण्डाः = (१—१०, २—१०, ३—१०, ४—१४, ५—१२, ६—१०, ७—१९, ८—९, ९—१२, १०—१२, ११—८) ११९ ऋचः = इति पावमानं पर्व।	
अथ षष्ठोऽध्यायः ...	२४२
= ५ खण्डाः = (१—८, २—७, ३—१३, ४—१२, ५—१४) ५५ ऋचः = आरण्य पर्व।	
अथ सङ्हानाम्नाध्यायः ...	३६६

॥ ऋन्दआर्चिकस्य ऋन्दः-सूची ॥

परिच्छेदः	पृष्ठात्—पृष्ठान्तम्
अथ गायत्र्यधिकारः (४४ ऋचः)—	२——६९
अथ बृहत्यधिकारः (१२ ऋचः)—	७०——१०५

परिच्छेदः	पृष्ठात्—पृष्ठान्तम्
अथ त्रिष्टुबधिकारः (२२ ऋचः)—	१०६——१४९
अथानुष्टुबधिकारः (९ ऋचः)—	१५०——१६९
तत्र बृहती ..	१६७।
अथ जगत्यधिकारः (१२ ऋचः)—	१७०——२००
अथोष्णिगधिकारः (१२ ऋचः)—	२०१——२२२
अथ ककुबधिकारः (८ ऋचः)—	२२३——२४२
तत्र, यवमध्या—२२३।	
—प्रगाथः	२३७
(इति पावमानं पर्व = पावमानं काण्डं=पञ्चमोऽध्यायः = एकादश खण्डाः = षष्ठ प्रपाठकश्च)	
बृहती	२४४
त्रिष्टुप्—२४६, २५७, २६९, २८३, २८५, २८९, २९२, ३०१, ३०४, ३०७, ३१०, ३३६।	
गायत्री—२४८, २५४, २५६, २६२, २६७, २६८, २७१, २८७, ३३८, ३४३, ३४६, ३४९, ३५१, ३५१, ३५४, ३५४, ३५४, ३६०, ३६०, ...	३६०
चतुष्पाङ्गायत्री	२४९, २५१
एकपाङ्गायत्री	२५३
जगती—२६४, २९७, ...	३३५
अनुष्टुप्—२७२, २८२, २९६, ३१५, ३१६, ३१७, ३१९, ३२०, ...	३२५
महापंक्तिः—	३०३
पंक्ति—३१२, ...	३१३
(इति आरण्यं पर्व = आरण्यं काण्डं षष्ठोऽध्यायः = षष्ठ खण्डाः =आरण्यक-प्रपाठकश्च)	
अथ शक्वर्यादि ..	३७१—३८४
(इति महानाम्न्यः)	

॥ छन्दआर्चिकस्य देवता-सूची ॥

परिच्छेदः	पृष्ठं
अन्नम्	२५७
अग्निः २८७, २८९, २९२, ३१०, ३१२, ३३५	
आत्मा ३२५, ३४३, ...	३५० वा
इन्द्रः २४४—२४८, २६१, २६७, २६८,	

परिच्छेदः	पृष्ठं
२७२—२८१, ३०४, ३२४, ३३१, ३६६।	
इन्द्राबृहस्पती	२०३
ऋतुः	३१७
गौः	१३३
द्यावापृथिवी	३९२
पवमानः २५१, २५४, २५६, २६५,	२८४
पुरुषः ३१५, ३१६, ३१७, ३१८,	३२०
प्रजापतिः	२८२
रात्रिः	३८६
वरुणः	२४८
वायुः	२७१
विश्वे देवाः ... २५३, २६८,	३०१
वैश्वानरः	२८७
सर्वात्मा (अग्निः) ..	३०७
सूर्य्यः ३३६—३६५, ३५१—३६०।	
सोमः (पावमानः) ... १—२४२।	

॥ छन्दआर्चिकस्य ऋषि-सूची ॥

परिच्छेदः	पृष्ठं
अग्निः (चाक्षुषः) २०३, २१६, २२१	
अचिः (भौमः) ...	१८८
अमहीयुः (आङ्गिरसः) ६, १६, ३३, ४०, ४४, ५१, ५३, ७०, २५४, २५६	
अम्बरीषः (वार्षागिरः) ..	१६२
अम्बरीषः (वार्हस्पत्यः) ..	१६८
अयास्यः (आङ्गिरसः) ...	६९
अवत्सारः काश्यपः) ...	५९
असितः (काश्यपो देवलो वा)	६५
इन्द्रप्रमतिः (वासिष्ठः) ...	१३२
आत्मा (?) ...	२५७
उरुः (आङ्गिरसः) ...	२३९
उशनाः (काणः) ..	१०८
उशनाः (काव्यः) ...	१२६
ऊर्द्धसद्मा (आङ्गिरसः) ...	२२७
ऋजिश्वा (भारद्वाजः) .. १६२, १६८	
ऋजिश्वा (भारद्वाजः) ... २२९, २४१	
ऋणवः (आङ्गिरसः) ..	२३५
ऋभुः (काश्यपः) ... १६४, १६६	
ऋषिगणः (सिकतानिवारी)	१८१
कण्वः (घौरः) ...	१३८
कविः (भार्गवः) [भारद्वाजः अनु०] ६७ १७०—१७९, १८४, १८७	
काश्यपः (मारीचः) २१, ३६, ३७, ६४, ६५, २४७	

ऋषिः	परिच्छेदः	पृष्ठं
काश्यपः (असितः) [देवलः वा०]		२८
		३०, ४१, ४२, ४६
कुत्सः (आङ्गिरसः)	...	१४४, ३३८
क्षतयशाः (आङ्गिरसः)	...	२३२
खिलगणः ? (?)	..	१८७
गृत्समदः (आङ्गिरसः)		२५१, २७१, २८२
गौतमः (राहुगणः)	..	२८३
गौरीवीतिः (प्राक्त्याः)	...	२२५
चक्षुः (मानवः)	...	२०५
जमदग्निः (भारद्वाजः)	...	१३ वा०
जमदग्निः (भार्गवः)		२४, ३४ वा, ५७ वा
चितः (आप्रयः)		...१८, ३२, २१२
त्रितः (आप्त्यः)	...	२१७, २२२
दृढच्युतः (आगस्त्यः)	...	२५
नारदः (शैखण्डी, अप्सरसः)		२०७, २०९,
		२१८, २१९
नारायणः (?)		३१५, ३१६, ३१७,
		३१९, ३२०
निभ्रुविः (काश्यपः)		३८, ४९, ५०, ६०, ६१
नृमेधः (आङ्गिरसः)	..	२७२
नोधाः (गौतमः)	...	१३७
पराशरः (प्राक्त्यः)		११४, १३१, १४५
पराशरः (सुवासः)	...	१२९
पर्वतः (वैदः, काश्यपिः)		२०७, २०९,
		२१८—२१९
पुरुमेधः (आङ्गिरसः)	..	२७२
पवित्रः (आङ्गिरसः)		२००, २६५
प्रजापतिः (वाच्यः)		१९९, ३६६—३८६

ऋषिः	परिच्छेदः	पृष्ठं
प्रतर्दनः (दैवोदासिः)		११९, १२७, १२९
प्रथः (?)	...	२६९
प्रस्तोकसुः (प्रस्तोकावी)	...	४७
प्रस्कण्वः (काण्वः)		१२४, १४९,
		३५१—३६०
बृहन्मतिः (आङ्गिरसः)	...	४५
भरद्वाजः (बार्हस्पत्यः)		२४४, २९७, ३०१
भरद्वाजादयः सप्त ऋषयः (१ भरद्वाजः, २ काश्यपः, ३ गौतमः, ४ अत्रिः, ५ विश्वामित्रः ६ जमदग्निः, ७ वसिष्ठः)		७६—१०५
भृगुः (वारुणिः)		१३, ३४, ५७, ६३
मधुच्छन्दाः (वैश्वामित्रः)		१०, ३६७
		२६८, २८७
मनुः (आप्नवः)	...	२१३
मनुः (सांवरणः)	...	१९०
मन्युः (वासिष्ठः)	...	१४१
मृळीकः (वासिष्ठः)	...	१३५
मेध्यातिथिः (काण्वः)	..	४८, ५५
ययातिः (नाहुषः)	...	१५५, १५८
रेणुः (वैश्वामित्रः)	..	१८९
वसिष्ठः (मैत्रावरुणः)		११६, १२१, १३३,
		२४६
वसुः (भारद्वाजः)	..	१९३
वत्सप्रीः [वत्सः वा०] (भालन्दनः)		१९५
वामदेवः (गौतमः)		२४८, २५३, २८२
		२८९, २९६, ३०३, ३१२, ३१३
		३२२—३३३,
विश्वामित्रः (गाथी)	..	३०७, ३१०

परिच्छेदः	पृष्ठं
वेनः (भार्गवः)	१९१
वृषगणः (वासिष्ठ)	११०
वैखानसाः (ऋतं)	१३५
शक्तिः (वासिष्ठः)	२३७
शुनः शेपः (आजीगर्त्तिः) ...	२४९
श्यावाश्वः (आत्रेयः)	३१,१५३
श्रुतकक्षः (?)	२६२
सार्पराज्ञी (?) ...	२४३—२५०
सूनुः (काश्यपः)	१६४,१६६
सूर्य्यपुत्रः (?)	३२६
हिरण्यस्तूपः (?)	३०४

॥ मन्त्राणामकारादिक्रमेण सूची ॥

परिच्छेदः	पृष्ठं
अक्रांत्समुद्रः (६, १, ४, ७ = गे १५, २, ११ = १)	१२१
अग्नआयूंषि (३, ५, १ = आ ६, १, ५ = १)	३३५
अग्निनीडे (३, ३, ४ = आ ४, १, १३, १८ = १)	२८७
अग्निरस्मिजन्मना (३, ३, १२ = आ ५, १, २ = १)	३०७
अचिक्रद्दृषा (६, १, २, १ = गे १४, १, १ = १)	५५
अचोदसौ (६, २, २, २ = गे १६, २, ७—१२ = ६)	१७४
अञ्जतेव्यञ्जते (६, २, २, ११ = गे १६, २, ३१—३१ = ३) ...	१८७
अदृश्रन्नस्यकेतवो (३, ५, ८ = आ ६, २, ११—११ = १) ...	३५१
अधियद्मिन् (६, १, ५, ७ = गे १५, २, २६ = १)	१३७
अध्वर्योअद्रिभिः (६, १, २, ३ = गे १४, १, ५—७ = ३) ...	५७
अनुप्रत्नास० (६, १, २, ६ = गे १४, १, ८ = १)	६१
अन्तश्चरतिरोचना (३, ५, ५ = आ ६, २, ६ ; ८ ; १८ = ३) ...	३४६
अपघ्नन्पवतेमधो० (६, १, २, १४ = गे १४, १, २० = १) ...	६८
अपघ्नन् पवसे मघः (६, १, १, ६ = गे १३, १, ६ = १) ...	४८

परिच्छेदः

		पृष्ठं
अपत्येतायवो (१, २, ७ = आ ६, २, ११ –१२ = २) ...	..	३५१
अपामीवेद्० (६, १, ५, १२ = गे १६, १, ६ = १) ..	...	१४८
अभिचिमृष्ठं (६, १, ४, ६ = गे १५, २, १० = १) ..	..	१२०
अभिद्युम्नंबृहद् (६, २, ४, २ = गे १७, २, ६— ९ =३)	..	१२६
अभिप्रियाणिपवते (६, २, २, १ = गे १६, २, १—६ = ६)	..	१७१
अभिसोमासआयवः (६, १, ३, ८ = गे १५, १, १४—२१ = ८)	...	८६
अभीनवन्ते (६, २, १, ६ = गे १६, १, ३१—३६ = ६)	...	१६२
अभीनोवाजसातमं (६, २, १, ५ = गे १६, १, २६—३०=४)	...	१६१
अयंविचर्षणिर् (६, १, २, १२ = गे १४, १, १७ = १)	...	६७
अयम्पूषारथिर् (६, २, १, २ = गे १६, १, १२—१५ = १)	..	१५४
अयापवस्वधारया (६, १, १, ७ = गे १३, २, ३० = १)	...	५०
अयापवापवस्वैना (६, १, ५, ९ = गे १६, १, १—३ = ३)	...	१४२
अयावीती (६, १, १, ९ = गे १६, २, ३२—३४ = ३)	...	५२
अयासोमसुक्रत्यया (६, १, २, ११ = गे १४, १, १६ = १)	..	६६
अयुक्तसप्त (३, ५, १३ = आ ६, २, १५ ; १६ = २) ...	...	३६०
अरुरुचदुषसः (२, २, २ = आ ३, १, ९—१० = २) ...	...	२६४
अर्षासोमद्युमत्तमो (६, १, २, ७ = गे १४, १, १०—१२ = ३)	...	६२
असर्जिरथ्यो० (६, १, १, ४ = गे १३, २, २६=१) ..	...	४६
असर्जिवक्वा (६, १, ५, ११ = गे १६, १, ५ = १) ...	...	१४६
असाविसोमोअरुषो० (६, २, २, ९ = गे १६, २, २७—२९=३)	...	१८१
असावंशुर् (५, २, ४, ७ = गे १३, १, २१—२८ = ८)	...	२१
असृक्षतप्र (५, २, ५, ६ = गे १३ २, ९—११ = ३) ...	...	३६
अस्रध्यन्वा (६, २, ३, १० = गे १७, १, २५ = १) ...	...	२१९
अस्रप्रेषाद्देमना (६, १, ४, ४ = गे १५, २, ४—५ = २)	...	११५
अहमस्मिप्रथमजा (१, १, ९ = आ २, १, ३४ = १)...	...	२५७
आतेदक्षं (६, १, २, २ = गे १४, १, २—४ = ३) ...	..	५६
आपवस्वसदक्षिणं (६, १, २, ५ = गे १४, १, ८ = १)...	..	६०

परिच्छेदः			पृष्ठ
आप्रागाद्भद्रा (३, १, ७ = आ ४, २, ६ = १)	...	...	२८६
आभिष्टुमभिष्टिभिः (म० १, २ = मा० १, १)	..	..	२७१
आयङ्गौः (३, ५, ४ = आ ६, २, २—३ ; ७ = ३)	...	...	२४३
आसोतापरि (६, २, ४, ३ = गे १७, २, १०—१५ = ६)	...	...	२१८
आविश्नन्कलशं (६, १, १, २ = गे १३, २, २४—२५ = २)	...	...	४५
आसोमस्यानो० (६, १, ३, ३ = गे १४, २, १६—१९ = ४)	...	...	८४
आहुर्यताधधृष्णवे (६, २, १, ७ = गे १३, १, ३४—३७ = ४)	...	...	१६४
इन्दुःपविष्टचेतनः (५, २, ५, ५ = गे १३, २, ६—८ = ३)	...		२४
इन्दुर्वाजीपवते (६, १, ५, ८ = गे १५, ३, २७—३० = ४)	...		१२९
इन्द्रद्वयोर्यः (१, २, ३ = आ० ३, १, ११ = ॥)	...	...	१५७
इन्द्रज्येष्ठन्न (१, १, १ = आ १, १, २४ = १)	...	...	२४४
इन्द्रभनक्षसातये (म० ३, १ = मा० १, ३)	...	...	३७९
इन्द्रमच्छसुता (६, २, ३, १ = गे १७, १, १—५ = ५)	...	...	२०१
इन्द्रवाजेषु (२, २, ४ = आ ३, १, ११ = ॥)	...	...	२९८
इन्द्रस्यनुवीर्याणि (३, ३, ११ = आ ४, २, १७ = १)	...	...	३०५
इन्द्रायपवते (६, १, ३, १० = गे १५, १, २३—२५ = ३)	...		१०१
इन्द्रायसोमःसुषुतः (६, २, २, ८ = गे १६, २, २५—२६ = १)	...		१९०
इन्द्रायेन्दो (५, २, ४, ६ = गे १३, १, १३—२० = ८)	...	...	१९
इन्द्रोराजाजगत: (१, १, २ = आ० १, १, ९—१० = २)	...		२४६
इमंस्तोषं (१, १, ६ = आ २, १, १३ = १)	...	...	२५३
ईंखेद्विशक्रसमूतये (म० २, ३ = मा १, २)	..	...	२७६
ईषेपवस्व (६, १, २, ९ = गे १४, १, १४ = १)	...	..	६४
उचातेजातम् (५, २, ४, १ = गे १२, २, १—१३ = १३)	...		२
उद्वृत्तमंवरुण (१, १, ४ = आ १, २, १३ = १)	...	...	२४९
उद्यामेषिरजः (३, ४, १२ = आ ६, २, १५—१६ = २)	...		३९०

परिच्छेद:

		पृष्ठ
अधोषुजातम्	(६. १, १, १ = गे १३, १, २०—२२ = ३) ...	४२
एतमुत्यंसद्यूतम्	(६, २, ४, ४ = गे १७, २, १६—२१ = ६) ...	२३०
एनाविश्वान्यर्य्या	(१, १, ८ = आ ३, १, १२ = १)	२५६
एवाहिशक्रो	(म० १) ३ = मा० १, १)	३७१
एवाह्येव	(१० = मा १, ४)	६८७
एषप्रकोषे	(६, २, २, ३ = गे १६, २, १३ = १)	१७८
एषस्तेमधुमान्	(६, १, ४, ६ = गे १५, २, १४ = १)	१२५
एषस्यधारया	(६, २, ४, ७ = गे १७, २. ३१—३५ = ५) ...	२३७
कनिक्रन्निहरिरा	(६, १, ४, ८ = गे १५, २. १२—१३ = २) ..	१२३
गोमन्नइन्दो	(६, २, ३, ६ = गे १७, १, ३४ = १)	११८
चिवन्द्रवान०	(३, ५, ३ = आ ६, २, १ ; ४, १६ = ३) ...	३३८
तंवःसखाघो०	(६, २, ३, ४ = गे १७, १, १६—१८ = ३) ...	२०८
तच्चयदी	(६, १, ५, ५ = गे १५, २, २२—२३ = २)	१३४
ततोविराडजायत	(३, ४, ७ = आ ५, १, १७ = १)	३२०
तरणिर्विश्वदर्शतो	(३, ५, ६ = आ ६, २, १२—१४ = २) ...	३५४
तरत्समन्दी	(६, १, २, ४ = गे १४, १, ७ = १)	५८
तवाहंसोम	(६, १, ३, ६ = गे १५, २, १—५ = ५)	८१
तावानस्यमहिमा	(३, ४, ६ = आ ५, १, १६ = १)	३१८
तिस्रोवाचईरयति	(६, १, ४, २ = गे १५, २, १—३ = ३) ...	११२
तिस्रोवाचउद्	(५, २, ४, ५ = गे १३, १, ५—१२ = ८) ...	१६
तेमन्वतप्रथमं	(३, ३, ५ = आ ४, १, १७—५, २, १८ = २) ...	२८९
त्रिंशद्धामविराजति	(३, ५, ६, = आ ६, २, ९ = १)	३४९
त्रिपाद्ऊर्ध्व	(३, ४, ४ = आ ५, १, १४ = १)	३१६
त्रिरस्मैसप्त	(६, २, २, ७ = गे १६, २, २४ = १)	१८८
त्वंसमुद्रदेव्य	(६, १, ४, ६ = गे १७, २, २ २७—३० = ४) ...	२३५

परिच्छेदः			पृष्ठं
त्वमिमाओषधीः (६, ६, २ = ऋ ४, १, १० = १)	..	...	२८५
त्वमेतद्धारयः (२, २, १ = ऋ० २, २, २०—२१ = २)	..	..	२६२
त्वयावयं (१, १, ५ = ऋ २, १, ७—८ = २)	...	...	२५१
धर्त्रादिवः (६, २, २, ५ = मै १६, २, १९—२० = २)	...	..	१८३
नियुत्वान्वायवा (२, २, ६ = ऋ ३, १, ७ = १	...	...	२७१
परिक्षीम (६, २, ३, १२ = मै १७, १, २९ = १)	..	...	२९१
परित्यंदर्षं० (६, २, १, ८ = मै १६, १, २८ = १)	...	...	१६७
परिषुचं (६, १, १, १० = मै १२, २, ३५ = १)	...	...	५१
परिप्राषिञ्चदत् (५, २, ५, १० = मै १३, २, १९ = १)	..	..	४२
परिप्रिया (५, २, ४, १० = मै १३, १, ३७—३८ = २)	...	...	२९
परिस्कानासइन्दवो (५, २, ५, ९, = मै १३, २, १६—१८ = ३)	...	...	४०
परिस्कानोगिरिष्ठाः (५, २, ४, ९ = मै १३, १, ३१—३६ = ६)	...	...	२६
परीतोषिञ्चता (६, १, ३, २ = मै १४, २, १—१५ = १५)	...	...	७७
पवतेदूर्यतो (६, १, ३, ११ = मै १७, १, ३६—३८ = ३)	..	..	२२०
पवमानाअसृक्षत (६, १, ३, १२ = मै १५, १, २७ = १)	..	..	१०५
पवमानोअजीजनद् (५, २, ५, ८ = मै १३, २, १४—१५ = २)	..	..	३८
पवस्वदक्षसाधनो (५, २, ४, ८ = मै १३, १ २९—३० = २)	...	...	२४
पवस्वदेवव्यायुषग् (५, २, ५, ७ = मै १३, २, १२—१३ = २)	..	..	३७
पवस्वदेववीतये (६, १, ३, ६ = म १७, १, २४—२ = २)	...	...	२१३
पवस्वमधुमत्तम (६, २, ४, १ = मै १७, २, १—५ = ५)	...	...	२२३
पवस्ववाजसातमो (६, १, ३, ११— मै १५, १, २६ = १)	..	..	१०३
पवस्वसोममधुमान् (६, १, ४, १० = मै १५, २, १५= १)	...	...	१२६
पवस्वेन्दोइषा (५, १, ५, ३ = मै १३, २, ३ = १)	...	...	३२
पविचन्ते वितनं (६, २, २, १२ = मै १६, २, ३४—३५ = २)	...	...	१८९
पात्यग्निर्विपो (३, ३, १२ = ऋ ५, १, ३ = १)	...	..	३१०
पुनानःसोमजागृविर् (६, १, ३, ९ = मै १५, १, २२ = १)	..	..	१००

परिच्छेदः		पृष्ठं
पुमानःसोमधारया (९, १, ३, १ = गे १४, १, २१—३६ = १६)	...	७०
पुनानोऽचक्रमीद् (९, १, १, २ = गे १३, १, ९३ = १)	...	४४
पुरुषएवेदंसर्वं (३, ४, ५ = आ ५, १, १५ = १)	.. ..	३१८
पुरोजितीवोऽन्धसः (९, २, १, १ = गे १६, १, ७—१२ = ६)	...	१४१
पर्वस्यायत्ते (म० ३, २ = मा० १, ३)	.. ..	३७९
प्रकाव्यमुशनेव (९, १, ४, २ = गे १५, १, ३३—३६ = ४)	..	१०९
प्रचस्रष्टाणी (३, ३, ८ = आ ४, २, ७ = १)	.. ..	२९७
प्रगायताभ्यर्चाम (९, १, ५, ३ = गे १५, २, २० = १)	...	१३१
प्रतुद्रव (९, १, ४, १ = गे १५, १, २८—३२ = ५)	...	१०९
प्रत्यङ्देवानांविशः (३, ५, १० = आ ६, २, १३—१४ = २)	...	३५४
प्रतेधारामधुमतीर् (९, १, ५, २ = गे १५, २, १९ = १)	...	१३०
प्रथस्यस्य (२, २, ५ = आ ३, २, ५—६ = २)	... ...	२९९
प्रदेवमच्छा (९, २, २, १० = गे १६, २, ३० = १)	... ...	१९४
प्रधन्वासोम (९, २, ३, २ = गे १७, १, ६—१० = ५)	...	२०३
प्रनरन्दोमहे (९, १, २, १३ = गे १४, १, १८—१९ = २)	...	६८
प्रपुनानायवेधसे (९, २, ३, ८ = गे १७, १, ३२—३३ = २)	...	२१९
प्रयद्भावोन (९, १, १, ५ = गे १३, २, २७—२८ = २)	...	४४
प्रसुन्वानाय (९, २, १, ९ = गे १६, १, ३९ = १)	..	१९८
प्रसेनानीः (९, १, ५, १ = गे १५, २, १६—१८ = ३)	...	१२८
प्रसोमदेववीतये (९, १, ३, ४ = गे १४, २, २०—२४ = ५)	..	८९
प्रसोमासोमदच्युतः (५, २, ५, १ = गे १३, २, १ = १)	...	३०
प्रसोमासोविपश्चितो (५, २, ५, २ = गे १३, २, २, = १)	...	३१
प्रचिन्वानोजनिता (९, १, ५, ४ = गे १५, २, २१ = १)	..	१३३
प्राणाग्निभुर् (९, २, ३, ५ = गे १७, १, १९—२३ = ४)	...	२१२
प्रीत्यसोद् (९, २, २, ४ = गे १६, २, १४—२० = ५)	...	१७९
भाजन्नग्ने (३, ४, १ = आ ५, १, ५ = १)	... ..	३१९
मन्द्रयासोम (९, १, २, १० = गे १४, १ १५ = १)	.. ..	९५

परिच्छेदः			पृष्ठं
मथिवचों (३, ३, १ = आ ४, १, ७ = १)	..	...	९८२
नक्षत्तमोमो (६, १, ५, १०= गे १६, १, ४ = १)	..	...	१४५
मन्ये वान्देवा (३, ४, ८ = आ ५, १ १८, २१ = २)	..	...	३२२
मृज्यमानः सुहस्त्या (६, १, ३, ७ =गे १५, १, ६—१३ = ८)	..		६८७
यउस्त्रियाअधि (६, २, ४, ८ = गे १७, २, ३१ = १)	...	...	२४०
यज्ञायज्ञा (२, १, ७ = आ ३, २, ९—२५ = ९)	...	...	१७१
यद्वर्चोदिरण्यय (३, ४, १० आ ५, २, १—१० = १०)		...	५१
यशोमाद्यावापृथिवी (३, ३, १० = आ ४, २, १२ = १)		...	३०३
यस्येमदीवरेणं (५, २, ४, ४ = गे १३, १, १—४=४)...		...	१४
यस्येदमारजो (१, १, १ = आ १, २, ११ = १)	...	...	२४८
येनापावकचक्षसा (३, ५, = १ आ ६, २, १३—१४ = २)	..		४५५
योमंष्ठोमघोमा० (म० २, १=मा १, १)	..	...	३७६
वसन्तरत्न० (३, ४, २ = आ ५, १, ९ = १)	..	...	२१२
विदामघवन्विदा (म० १, १=मा० १, १)	...	...	३०
विदाराधेषुवीर्यं (म०१, १=मा १, २)	...	..	... ३०५
विभाड्बृहत् (३, ५, २, = आ ६, १, ७ = १)	...	...	३३०
विश्वेदेवासम् (३, ३, ९ = आ ४, २, ८ = १)	...	...	३०१
इषामसीनां (६, २, २, ६ = गे १६, २, २१—२२= २) ...		...	१८५
इषासोम (६, १, २, ८= गे १४, १, १३ = १)	...	...	६२
इष्णपवस्वधारया (५, २, ४, ३,=गे १२, २, २३—३१=)...		...	१०
...ष्णसि (५, २, ५, ४ = गे १३, १, ४—५ = २)	...	...	३३
सखायआनीषोदत (६, ३, ३, ३= गे १७, १, ११—१५ = ५)	..		२०६
सनइन्द्राय (१, १, ७ = आ २, १, १३ = १)	...	...	२५४
सन्नेषमांसि (३, ३, २ = आ ४, १, ९—५, १, ११ = २)		...	२८३
सपवस्वयआविथेन्द्रं (६, १, १, ८ = गे १३, २, ३= १)..		...	५१
सप्तत्वाहरितो (३, ५, १४ = आ ६, २. १५—१६=१)	...	...	३४०

परिच्छेदः				पृष्ठ
यमन्वायच्युतं (६, ३, ६, = ऋा ४, २, १—४ = १)	..	...		१९१
यमुच्चे (६, २, ४, ५ = मे १७, २, २१—२६= ५)	...	...		२३१
यद्वर्षभाः (३, ४, १२ = ऋा ५, २, १९ =१)	...	...		२३४
यद्वत्रेन्द्र (३, ४, ११ = ऋा ५, २, १७ = १)	...	...		२३१
यद्यशीर्षाः (३, ४, ३ = ऋा ५, १, १३=१)	...	...		२१५
याकमुचो (६, १, ५, ६ = गे १५, २, २४ — २५ = १)		..		१३९
युताषोमघुभत्तमाः (६, २, १, ३ = मे १६, १, १६ — २१ = ८)		..		१५५
युञ्जाधेहिनो (म० ३, ३ = मा० १. ३)...	...	..		२७९
षोमषुत्वाषः (६, १, ३, ५ = मे १४, २, २५—३१०=६)		...		८८
षोमःपवते (६, १, ४, ५ = मे १५, २, ६—९=५)	..	..		११७
षोमःपुनानउर्मिणा (६, २, ३, ७= मे १७, १, २६—३१=६)		...		२१४
षोमाःपवन्तइन्दवो (६, २, १, ४=मे १६, १, २४—२५=२)		...		१५९
स्वादिष्ठया (५, २, ४, २=मे १२, २, १४—२१=९)	...	...		७
हरीमरन्द (३,४, ९=ऋा ५, १, २२=१)	...	...	...	२२४

॥ क्रोड़पत्रम् ॥

(अशीति-पृष्ठस्येऽष्टमेपङ्क्तौ निवेश्यम्)

चतुर्थाधिकरणमारचयति—[५४] "स्यरेकादशिना किं प्रायणीयोदयनीययोः। प्रत्येकमखिलाः किं वा विभज्याः स्युस्तयोरपि॥ उद्देश्ययोः प्रधानत्वात् प्रत्येकं पशवोऽखिलाः। नोद्देश्यौ शतवद्भागः शिष्टस्वासत्तितोऽन्तिमे॥ द्वादशाहे श्रूयते— "एकादशिना प्रायणीयोदयनीययोरतिरात्रसंस्थयोरतिरात्रयोरालभेरन्निति" तत्र ते पशवएकादशापि प्रायणीयेऽहनि कर्त्तव्याः तथोदयनीयेऽपि सर्वे कर्त्तव्याः। कुतः? प्रायणीयोदयनीययोरुद्देश्यत्वेन प्राधान्यात्—प्रतिप्रधानं चाङ्गाहुत्तेर्युक्तत्वादिति पूर्वपक्षः। वचनान्तरेण विहितानामेकादशानां प्रकरणेन द्वादशाहाङ्गत्वे सिद्धदेशाकाङ्क्षायां तान् पशूनुद्दिश्य प्रायणीयोदयनीयौ देशत्वेन विधीयेते। तत्र कुत उद्देश्यत्वम्? कुतस्तरां प्राधान्यम्? कुतस्तमां पशवाहुत्तिः? एवं सति यथा—'शतं देवदत्तयज्ञदत्तयोर्विधीयताम्'-इत्यत्र देवदत्ते पञ्चाशद्विधीयते यज्ञदत्ते पञ्चाशदिति विभागस्तथा प्रायणीये पञ्च पशव उदनीये पञ्चेति विभागो युक्तः। पशवशिष्ट एकः पशुरन्तिमः स प्रत्यासन्नत्वा दन्तिमेऽहन्युदवसानीये कर्त्तव्यः"[५४]-इति॥

---

* मत्स्याद्दिते क्वचिदपि पुस्तके नैतदधिकरणोद्धरणमिह दृश्यते, तल्लेखक-पाण्डित्यमेवात्र मूलमित्यनुमीयतेऽस्य सामविचारेऽप्रक्षतत्वाच्च तथा पाण्डित्यम्; परमेतस्यैव भगवतीभाष्यस्य उपसंहृतिवचने (८५—१) द्विषष्टीति पारिगणनश्रुतेरस्याप्यधिकरणस्य सामवदोषसङ्ख्याचाण्डुत्वोक्तेश्च इत्यवश्यं श्लोकार्यमितीत्थं क्रोडीकृतम्। स०।

॥ नमः सामवेदाय ॥

सामवेदसंहिता।

अथ पञ्चमाध्यायः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्या-तीर्थ-महेश्वरम्॥ १ ॥
तृतीयं पर्व सोमस्य पवमानस्य संस्तुतिः।
उच्चातइति गायत्र्यश्चत्वारिंशच्चतुर्युताः* ॥ २ ॥

---

* गतमाग्नेयं पर्व, गतश्चैन्द्रम्; इदानीमिदं तृतीयं सम्प्रवर्त्तते। अत्र पर्वणि सोमस्य देवस्य संस्तुतिः श्रूयते, प्राधान्येनेति यावत्। अस्ति सोमः यज्ञार्थोभिषुतः ओषधि-विशेषः—

"सोमं मन्यते पपिवान् यत्सम्पिंषन्त्योषधिम्।
सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन॥"

(ऋ० १०, ७, ६, ४)

-इति श्रुतेः. "सोमं मन्यते पपिवान् यत् सम्पिंषन्त्योषधिमिति, तथासुतमसोमम-माह—सोमं यं ब्रह्माणं विदुरिति, न तस्याश्नाति कश्चनायज्वेत्यधियज्ञम्"—इति च यास्कोक्त-तद्व्याख्यानात्। स एव सोमः पवमान इत्युच्यते श्रूयमान इति च तदर्थः। अस्ति च सोमशब्दमात्रवाचकः, "सोमोरूपविशेषैरोषधिशब्दमात्रा"—इत्यादि याज्ञोक्तेः (दै० ५, ५)। तदत्र कतरस्य ग्रहणमित्याशङ्कां वारयितुं पवमानस्येति विशेषणम्। एतेन चन्द्रमसो व्यावृत्तिः। एवञ्चेह पर्वणि यावन्त ऋचः श्रूयन्ते विशेषोक्त्याभावे

तत्र प्रथमे खण्डे—

सैषा प्रथमा।

३ १ २ १ १ २र ३ १ २र
उच्चातेजातमन्धसोदिविसद्मन्याददे*।

१२उ ३ १ ३ १२
उग्रꣳशर्ममहिश्रवः॥ १॥ १ †

५ ४ २र३ १ ७
ओम्॥ (आजिगम्॥) उच्चा। तेजाऽतामन्धासा२ः।

१ र र २ १ २ १ ३
दिविसद्मन्याददाइ। उग्रꣳशा२३र्मा ३। मा२ङ्घा२३४।

५र र २ ३ ५
औच्चोवा। उप्। आ२३४वाः॥ १॥

२१र ५ २१ ५
(आभीकम्॥) उच्चाते२३४जा। तमन्धा२३४साः।

सर्वासामेवासां पवमानः सोमो देवतेत्थं बोधितश्चेदं—पावमानं पर्वेति। "उच्चाते"-इति पञ्चम-द्वितीय-चतुर्थस्य प्रथमा ऋक्, तृचस्यास्य पर्वणोपि प्रथमा; एतदादि-षष्ठ-प्रथम-द्वितीयान्तिमानाः दशचतुष्टयात्मिकाः चतुर्युतायत्वारिंशदृचः गायत्र्यः गायत्रीच्छन्दस्काः।

* "दिविषद्म"-इति ऋ०।

† ऋ०१,१,८,१ = ऋ०७,१,१९,५=आर०१,२,२२;—२,१,१९—३,१,११ = ऋ०१,१,१;—३,१,१३;—६,१,९—१०;—७,१,१२;—८,१,११;—१०,१,१०—११;—११,१,१४;—१२,१,१—२;—१२,२,७;—१३,१,१७;—१५,१,३-४-५;—१९,१,११;—२०,१,९-७-८—९;—२०,१,१४=ऊह्ये १,२,१।

२ १ ५ २ १र २१ २ १ २
दिवाइसा२३४ङ्गू। मियाददाइ। उग्र्ँशा२३र्मा। मह्वाये

१ ३ ५र र ३ १ १ १ १
३। आ२वा३४ औहोवा। वा२३४५इ॥ २॥

५र र र र २ २
(ऋषभपावमानम्॥) हाहाउच्चातेजा। हाइ। हा-

१ ३ ५ २ १ र २ २ २
३इ। तामा२न्धा२३४साः। दिविसङ्गूमिया१दा३दे। उग्र्ँ

७ ५ १ २ ४ ५ ४ ५
शा२३४र्मा। ओमो३। मह्वोवा। आ५वोर्ँहाइ॥ ३॥

१ र र र ४ ५
(आभीकम्॥) ऊर२३४च्चातेजा५। तमौह्वान्धासाः।

२ १ र१ २ २ २ ३ ५ १ ऽ २
दिविसङ्गूमिया१दा३दे। उग्र्ँशा२३४र्मा। माहा३उवा

२ ५
३४३। आ३४५वोर्ँहाइ॥४॥

५ र र २ १ १र ऽ
(वाभ्रवे दे॥) उच्चातेजा। तम। धासा२३ः। ओमो३-

२ १ २ र १ २ १र ऽ २ १
वा। दिविसङ्गू। मियादा१दे२३। ओमो३वा। उग्र्ँ

२ १र ऽ २ १ ३ ५र र २
शा१र्मा २३। ओमो३वा३। मा२हा२३४औहोवा। अवा३-

१ १ १ १ १
ई २३४५॥ ५॥

५ र र २ १ २ १ २ र १र
उच्चातेजा। तमन्धा२३साः। दिविसङ्गू। मिया-

२ १२ २ १२ २ ३२ १२
दा२३दाइ। ऊग्रा३ए्हाइ। ग्रार्मा३हाइ। महा ३ होय-
१ २ ५ २ ३ ५
३। आ२ वा २ ३ ४ औहोवा। म्वा २ ३ ४ भौः॥ ६॥

५ ४२ ५२२ ४ १
(इन्द्राण्याः साम॥) उच्चातेजातमा। धासा२३ः।
१२ऽ २ १ २२ १ २ १२ऽ २
ओमोश्वा। दिविसङ्ग्। मियादा१दै२३। ओमोश्वा।
१ २ १२ऽ २ १ २ १ २
उग्रा३ए ग्रा१र्मा२३। ओमोश्वा। महायै३। आ२वा२
५२ २ २ ५
३४औहोवा। ऊ३२३४पा॥ ७॥

५ २ २ २ ४ ५ २ १ २
(शैशवे द्वे॥) उच्चातेजातमन्धामाः। दिविसङ्ग्याद-
२१ ५ ३ २ ४
दाइ। उग्रए्ग्रा२३४र्मा। महा३इआपुवाई५ईः॥ ८॥

५ २ २ २ ५ २ १ २ २
उच्चातेजातमन्धाई५साः। दिविसङ्ग्। म्यादा२३दाइ।
१ २ १ ऽ २
उ। ग्रए्ग्रा२३र्मा। महा२। हा२इ। औ३हो३१इ।
ऽ २ ३ २ १ ३
श्वा२ः। हा२इ। औ३हो३१इ। इया३होइ। इयो२३
३ १११११
४पुवाई५ई। ऊ२३४५॥ ९॥

३ २ ३२ ४२ ५ १ ३ २
(द्वादसाम॥) उच्चा३४औहोवा। तेजा२। तमा३४५।

३ ५ २ १ ४ ४ २४ १ ७ २ ३
धा२३४साः। दिविसद्भूम्यादद्दे। ऊग्र्ष्शा२३र्मा। महि
२१ २ ४ ५ ४
श्रवो। औ३ह्वोवा। ह्वोयु३इ। डा॥ १०॥

५ ४ ४ ४ ४ ४ ४ ४ ५
(दौह्वीयसाम॥) उच्चातेजातमन्धसोदोह्वाइदोह्वाई३ए।
२१ ४ ४ २४ ६ २ ७ २ २ १
दिविसद्भ्म्यादद्दे। दोइ३ह्वाइ। दोइ३ह्वा३ए। उग्र्ष्शा२३
२ ६ २ ६ २ २ १ २ १
र्मा। दोइ३ह्वाइ। दोइ३ह्वा३ए। महिश्रा२३वा३४इः। ओ२
३४५इ। डा॥ ११॥

१ २४ २४ ४४ ५ २ १
(इन्द्राण्याः साम।) उच्चातेजातमन्धसाः। दिवाइ
५ २ १ २४ १४ ६ २ ६ २
सा२३४द्भू। मिया२द्दे। ओम्। ओ३वा। ओ३वा।
१ २१ २ ६ २ ६ १
ववा२३ह्वोइ। उग्र्ष्शा२३र्मा। ओ३वा। ओ३वा।
१ १ २ १ २ १ ६ ३ ५४ ४ २
ववा२३ह्वोइ। महिश्रवो२। या २ ३ ४ औह्वोवा। ययु
३ १ १ १ १
रे२३४५॥ १२॥

५४ २ ४४ ५
(आमह्वीयवम्॥) उच्चाता३इजातमन्धसाः। दिवा

२१ २ १ २ १ २१
इमा२दभू१। मिया२३२दाइ। उग्र७श्मर्मा। मद्दा-
२ २२ १११
२३इ। अवाउ। वाइ। स्तौषे३४५॥ १२॥ १

अमहीयुर्ऋषिः*। हे "सोम!"† "ते" तव सख्युः सम्बन्धिनः "अंशवः" रसस्य ‡ "उद्वा" उपरि¶ "जातम्" जलम्।

---

* "आङ्गिरसः" इति ऋषि-नैगेयः।

† "सोमः" निघण्टौ दैवतकाण्डेऽन्तरिक्ष—विभागीयस्तुत्यिं[श्]तमो देवः, वायु-साहचर्याच्च भज्यते, यथा च राजधानीस्तवनेन भवति राज्ञः स्तुतिः, भवति च मासस्तवनेन वर्षस्य स्तुतिः; तथैवास्य स्तवनेन वायोरेव स्तुतिः। तथाहि—

"यत्त्वा देवप्रपिबन्ति तदाप्यायसे पुनः।
वायुः सोमस्य रक्षिता समानां मास आकृतिः॥"

(ऋ० १०, ७, १, ५)

"यत् त्वा देव! प्रपिबन्ति तत् आप्यायसे पुनरिति नाराशंसानभिप्रेत्य पूर्वयोश्चापर-यश्चाविति वा। वायुः सोमस्य रक्षिता वायुमस्य रक्षितारमाह साहचर्याद्वसन्तरक्षाद्वा। समानां संवत्सराणां मास आकृतिः"-इत्यादि यास्कोक्तं तद्व्याख्यानम्। अतएव "तिस्र एव देवताः (नि० दै० १, ५)"-इत्याद्युक्तिरदोषा। स च ओषधि-विशेषः, तथाहि "ओषधिः सोमः (सुनोतेर्यदेनमभिषुण्वन्ति) मञ्जुलमस्य नैघण्टुकं इतमार्षेयमिव प्राधान्येन"-इत्यादि नि० ११, २-३-४-५। स च दुग्धाभ-रस-विशिष्ट-वल्लीभ्यः चरित-पदार्थः सुतरां दुग्धाभरसरूपः, तथाच श्रूयते—"सोमो दुग्धाभिरक्षाः" (ऋ०३,२,५, ५ द्वितीयः पादः) "सोमो दुग्धाभ्यः चरति"-इति च तद्व्याख्यम् (५, ३)।

‡ "अभ्यदित्यन्नामाध्यानीयं भवति। * * *। तमोऽप्यभ्युच्यते नाक्षिन् ध्यानं भवति न दर्शनमभ्यन्नमदित्यभिभाषन्ते। अयमपीतरोऽस्य एतस्मादेव।"-इत्यादि नि० ५, १।

¶ अक्षि हि उच्चैरर्थे उच्चति, तस्यैव "निपातस्य (६, ३, १३६)-इति दीर्घे रूपमुद्वा-इति।

अथ द्वितीया ।

२ २ २ १ २ ३ ११ ३ १ २
स्वादिष्ठयामदिष्ठयापवस्वसोमधारया ।
१ २ ३१ २ ३ २
इन्द्रायपातवेसुतः ॥ २ ॥ २ *

१२ २ १. २ १ २ २
(आजिगम ॥) स्वादाइष्ठाया । मदाइष्ठाया । पवस्वसो ।
१ २ २ १ २ १ २ १
माधा१रा२३या । इन्द्रायापा । नवाइसू२३ता३४३: । ओ
२३४५इ । डा ॥ १४ ॥

अपिच । "दिवि" द्युलोके "सत्" विद्यमानम् "उग्रम्" उद्गूर्णम्† "शर्म" सुखं‡ "महि" महत्¶ "अवः" अन्नञ्§ "भूम्यादद्दे" [इत्यत्र यमामनन्ति । विसर्जनीयलोपः सांहितिकः] भूमिः भौमजन्यः अस्माद्दृशः; भूमिष्ठैरादीयतइत्यर्थः ॥ १ ॥ १

---

* उ०१,१,१५,१ = ऋ०७,७,१६,१=आर १,२,३ ;—३,१,७=ऊ०१,१,८ ; —८,२, १० ;—१०,२,१० ;—११,२,७ ; —१२,२,४ ; —१३,१,९ ;—१८,१,१५—१६ ;—१९,२, १८ ,—२०,२,१० ;—२१,१,२०=ऊच्चे३,१,२ ;—४,१,१२ ;—४,२,१८ ।

† 'उग्रम् बलवत्'-इति वि० ।

‡ 'शर्म शरणम्'-इति वि० । शर्मेति सुख-नामसु चैकविंशतितमं पदम् नै० ३, ४ ।

¶ महत्, महः, महिः-इति पाठभेदेन पठ्यते नै० ३, ४, १ ।

§ "अवः"-इति अन्ननामसु चतुर्थं पदम् (नि० २, ७) ।

(सुरूपम्॥) स्वादिष्ठया२ इया२इया। मदिष्ठा या२। पवस्वसो२। इया२इया। मधाराया२। इन्द्राया पा२। इया२इया। तवाइसू२३ता३४३:। ओ२३४५इ। डा॥ १५॥

(सुरूपोत्तरम्॥) स्वादिष्ठयौहो२। इया। मदिष्ठा या२। पवस्वसौहो२। इया। मधाराया२। इन्द्राय पौहो२। इया। तवाइस्व२३ता३४३:। ओ२३४५इ। डा॥ १६॥

(जमदग्नेः शिल्पे द्वे॥) ओइस्वा२३४दी। ष्टयाऽमादिष्ट-या। ओ२३४वा। पवस्वसोमधारयाऽ। ओइ२३४न्द्रा। याऽपा२३४औहोवा। तवेसुताऽ१:॥ १७॥

उऊवाइ। स्वा२३४दी। ष्टयाऽमादिष्टया। ओ२३४वा। पवस्वसोमधारयाऽ। उऊवाइ। इन्द्रापूयपा। तारवा२३४औहोवा। सू२३४ताः॥ १८॥

४र ५ २ १ २
(सण्हितम् ॥) स्वादाइष्टया। मदिष्ठयाइ। पावा
४ ५ २र १ २ ४ ५ ५ ४
३स्वासो। मधारयाइ। आइन्द्राइयापाई। हाउ। त-
वाप्इसुताउ। वा ॥ १९ ॥

४र ५ र ४ ५ र ४ ५ र ४र र ४
(प्रकुलः ॥) स्वादिष्ठयामदिष्ठयापवस्वसोमधारयाइ।
५ २ १ ३ २
द्राप्यपा। तवा२इ। म२। तवा२इ। ऊ२। तवा३४
५र र ३ ५
औहोवा। सू२३४ताः ॥ २० ॥

५र र र र ४ ५ २ २
(गम्भीरम् ॥) औहोइम्हाणहिया। हाइहाइ।
१र २ ३ ५ २ ३ ५ ५र र र
स्वादाइष्टाया। मा२३४दी। उइमा२३३दी। औहोइम्-
र ४ ५ २ २ २ २ ३ ५ २
हाणहिया। हाइहाइ। ष्टयापाव। स्वा२३४सो। औ
३ ५ र र र र ४ ५ २ २ १
स्वा२३४सो। औहोइम्हाणहिया। हाइहाइ। मधा
२ ३ ५ २ ३ ५ र र र र ४ ५
रया। ई२३४न्द्रा। औई२३४न्द्रा। औहोइम्हाणहिया।
२ २ १ २ ३ ५ २ ३ ५
हाइहाइ। यपातवाइ। सू२३४ताः। औइसू२३४ताः।
र र र र ४ ५ २ २ ५र र ३१
औहोइम्हाणहिया। हाइहा३४। औहोवा। ई२
१११
३४५ ॥ २१ ॥

अथ तृतीया।

१२ ३१२ ३१२ १२
वृषापवस्वधारयामरुत्वतेचमत्कारः।
३ १२३१ २
विश्वादधानओजसा ॥ ३ ॥ ३ *

४र ५ र ४ ४ २
(सएहितम ॥) स्वादिष्ठयाम। दा५इष्ठया। पवा२।
१ २ १ १ १ १
स्वा२३सो। मधा२राया। आ२३इन्द्रा। या२पा।
० २ ५
तवा२३। हाउवा३। सू२३४ताः ॥ २२ ॥ २

५र २र १ २
(सोमसाम ॥) वृषापवा। स्वधारया२। मरुत्वताइ।
२ १ २ ३ ५र र २
चमत्कारा२३राः। वाइश्वा२३। दा२धा२३४ओहावा। न-
१र १११११
ओजसा२३४५ ॥ २३ ॥

मधुच्छन्दाऋषिः†। हे "सोम!" "इन्द्राय" "पातवे"‡ पातुं "सुतः" अभिषुतस्त्वं "स्वादिष्ठया" स्वादुतमया "मदिष्ठया"¶ अतिशयेन मादयित्र्या "धारया"§ "पवस्व" क्षर ॥ २ ॥ ३

---

* उ०१,१,१०,१ = ऋ०७,२,२,५ = ऊ०१,२,१९; —४,१,१—२—३;—४,२,१ ;—७,१,१—२;—११,२,१४—१५;—१८,१,१८—१९;—२०,१,१;—२२,२,९—१०।

† "वैश्वामित्रः"-इति ऋषि-निर्देशः। ‡ तुमर्थे तवेङ् प्रत्ययः (३,४,९)।

¶ "तुच्छन्दसि (५, १, ५९)"-इतीष्टन्। § इवरूपत्वात्।

(सोमसाम॥) वृषाऽहाउ। पा२३४वा। स्वाधारा२३४या।
मा२३४ऽऽ। त्वा२३४ताइ। चामत्मा२३४राः। वाइश्वाद्
धा२३। नाऽ२ओ२३४औऽहोवा। जा२३४सा॥ २४॥

(आग्नुभार्गवम्॥) वृषापव। स्वधारा६या। मारुत्वता
३इ। चामा२त्मा२३४राः। विश्वादा१धा२। नओ३।
जा२३४सोऽहाइ॥ २५॥

(वैश्वदेवम्॥) आइवृषा। पवा। इऽहा। औ३ऽहो।
स्वधारा२३४या। म। ऽऽ। त्वतेऽहाइ। च। मा।
त्मरा२ऽहा३४इ। विश्वादधाऽहाउ। नओजसाऽहाउ।
वा३४३ओ३४५वा६५६। अस्मेराया२उतअवा२३
४५ः॥ २६॥

(वैश्वदेवम्॥) वृषा। पवाऽ३। एहिया। स्वधाऽ२। रया३४
औऽहोवा। माऽऽ३४। औऽहोवा। त्वतेचमात्मा३राः।

१ २ २ २ १ २र १ २र
औ३हो३१ये३। औहो२३४५वाई५६। विश्वादधान
१र २ १ १ १ १
औजसा२३४५॥ २७॥

१ १र २ १ १ १ १
(इन्द्रसाम॥) वृषापावा२३। हौहोइ। औ३हो२३४५। स्वधाराया२३। हौहोइ। औ३हो२३४५। मरुत्वा-
१र २ १ १ १ १
ते२३। हौहोइ। औ३हो२३४५। चमात्माराय२३ः। हौहोइ। औ३हो२३४५। विश्वादाधा२३। हौहोइ।
१ १ १ १ १ १र २
औ३हो२३४५। नओजासा२३। हौहोइ। औ३हो २३४३। ओ२३४५वइ। डा॥ २८॥

२ १ २ ३र २ ५ २ १
(इन्द्रसाम॥) वृषापावा। औहौहो२३४वा। स्वधा-
२ ३र २ ५ २ १ २ ३र २
राया। औहौहो२३४वा। मरुत्वाता। औहौहो-
५ २ १ २ ३र २ ५ २ १ २
२३४वा। चमात्मारा। औहौहो२३४वा। विश्वादाधा।
३र २ ५ २ १ २ ३र २ ५
औहौहो २३४वा। नओजासा। औहौहो२३४वा।
४
हो५इ। डा॥ २९॥

५र ४ ५ ४ ५ २ १
(यौक्ताश्वम॥) औहौहोहाइ। वृषा। पवस्वाऽधा-

२ १ ३ ५ १ ७ १
रायाइ। मारु२त्वा२३४ताइ। आइ। चमा२इ। चमा२
३ ५ २ ४ ५ ४ ५ १ ३ ५
त्मा२३४राः। औहोहोहाइ। विश्वा। दधा२ना२३४ओ।
२ ३ ५२ २ २ ३ २
जासा२३४औहोवा। ओइ। ज्वरआ ॥ ३० ॥

५ २ २ ४ ५ २ १ २
(यौक्तोत्तरम् ॥) वृषाऔहोहोहाइ। पवा३स्वाधा
२ १ ३ ५ ३ २ १
१रायाइ। मारु२त्वा२३४ताइ। चमा३इ। ओइ।
७ ३ ५ २ २ ४ ५ १ ३
चमा२त्मा२३४राः। विश्वाऔहोहोहाइ। दधा२ना-
५ १ ३ ५२ २ २ ३
२३४ओ। जा२सा२३४औहोवा। ओइ। जू२३४-
५
वा ॥ ३१ ॥ ३

॥ इति ग्रामे गेये द्वादशः प्रपाठकः ॥

भृगुर्वारुणिऋषिः*। हे "सोम!" त्वं "वृषा" स्तोतृणामभिमतस्य वर्षकः† सन् "धारया" त्वदीयया "पवस्व" द्रोणकलशं‡ मागच्छ। [पवतिर्गतिकर्मा¶। आगतस्त्वं यदास्माभि-

---

* अथवा जमदग्निः भारद्वाजः (अनु०)।

† दृषन्निति नान्तस्य रूपमिदम्। प्रथमे खण्डे २९९, ३०१, ३१९, ५०१, ५४५, ७८०, ८३४ पृष्ठासु च व्याख्यातम्।

‡ सोमस्याधारपात्रविशेषम्। अत्रैव चोत्तरत्र ६,१,१,७ — ४,१०—५,९ च अनुविदितम्।

¶ निघण्टौ गतिकर्मसु "पवते"-रित्यस्याष्टोत्तरशततमत्वेन दर्शनात् (२,१४)।

अथ चतुर्थी।

२ ३ २ ३१२ ३ १ २ ३ १ २
यस्तेमदोवरेण्यस्तेनापवस्वान्धसा।

३ १ २ ३ २
देवावीरघशꣳसहा ॥ ४ ॥ ४ *

४ ५ १ २ ३ ५
ओम् ॥ (भासम् ॥) यास्ताइ। मादो। वाराओ२३४वा।

३ ५ ४ ५ १ ऽ २ ३ ५ ३
णी२३४याः। ताइना। पावा। स्वाइआओ२३४वा। धा-

रिन्द्राय दीयते तदा] "मरुत्वते" सहाया मरुतो यस्य सन्ति† तस्मै इन्द्राय "मत्सरः"ऽ मदकरश्च भव। कीदृशः? "विश्वा"¶ विश्वानि सर्वाणि व्याप्तानि वा धनानि "ओजसा" आत्मीयेन बलेन युक्तः सन् स्तोतृभ्यस्तानि प्रयच्छन् त्वं मादयिता भवेति समन्वयः ॥ ३ ॥ ३

---

* ऊ०२,१,१५,१=ऋ०७,१,२१,४=ऊ०२,१,५;—४,१,१०;—६,२,७;—९,३,८;—११,२,९—१७—२०;—१२,२,९;—१३,२,१७;—१४,२,११—१२—१३; २०,१,२—३-४=ऊच्चे १,२,१;—३,१,४—१४—१७।

† ऋषि मरुत ऋत्विङ्नामसु (३,१८)-रूपनामसु (३,१७)—हिरण्यनामसु च (१,२) निघण्टौ। तत्रैव दैवतकाण्डेऽन्तरिक्षदेवतासु च "मरुतः"-इति दृश्यते। अत्र च तेषामेव देवगणानां ग्रहणम्; तथा च श्रूयते—"ऋषि सोमो"-इत्यादि (प्र०१९२पृ०) मरुतामिन्द्रसहायभूतत्वञ्च "इन्द्रस्य त्वा"-इत्यादौ (प्र०६५६पृ०) श्रूयतएव।

‡ मदिधातोरौणादिके सरप्रत्यये रूपम्। अत्र चोत्तरत्रान्यत्रापि चतुर्थ्यं (६,१,१,३—३,८—११—४,१०) ओष्ठ्ये मत्सर इति।

¶ सुप आत्वे रूपम् (७,१,३९)।

५ ४ ५ १ २ ५ ३
२३४सा। दाइवा। वाइरा। घाग्राओ२३४वा। सा२-
५
३४दा ॥ १ ॥

४ ५ १ ३२ १ २
(सोमसाम ॥) यस्तेमदाः। वराइणियोः। ताइनापावा-
२ ३ ३ १ १ २ ५ ध
३स्वा३। अन्धसा। दाइवावाइरा३४। हाउ। घशा
ध
५ए्सहा। हो५इ। डा ॥ २ ॥

१ २ ३ ५ ११ २
(प्राजापत्यम् ॥) यस्ता३२इमा२३४दाः। वराइणाया।
३ ५ २ ३ ५ २ १ र २
आ२३४वा। हा। ओ२३४वा। हाइ। ताइनापव।
१ २ ३ ५ २ ३ ५ २
स्वान्धासा। ओ२३४वा। हा। ओ२३४वा। हाइ।
१ २ ३ ५ २ ३ ५ २
दाइवावाइरा। ओ२३४वा। हा। ओ२३४वा। हाइ।
१ ३ ५र र २र १ १ १ २
घा२ग्रा२३४ओहोवा। सहोरयो३ष्ठा२३४५ः ॥ ३ ॥

२१ ४र ५र १ र २
(सोमसाम ॥) यस्ताइमा२३दोवरेणियाः। ताइनापव।
१ २ १ १ २१ ५ ४
स्वान्धा१सा२। दाइवा२वाइरा२३। घशो२३४वा। सा५
५
हो६इ हाइ ॥ ४ ॥

अथ पञ्चमी।

३ २उ ३ १ २ ३ १ २ ३ १ २
तिस्रोवाचउदीरतेगावोमिमन्तिधेनवः।

५ २ २ ४ ५ ४ ५ १ २
(भास॰साम॥) यस्ते। मा३दा। वा। इ्या। राइणा

१ २ २ ६ २२ २२ २ १
१या२ः। ताइनापव। स्व। औ३हो। वाहा। धसा२।

१ १ ३ ५ २ २ ३ २
दाइवा२३। वा२इरा२३४ ओहोवा। घश॰साहा१॥ ५॥

५ २ २ ६ ५ २२ २२
(अद्वग्डड॰सोमसाम॥) यस्तेमदोवरेण्याह्ण। तेना-

२ २२।२ २ २ १ २ १
पवस्वान्धसा। देवावौरा२३। हाइ। घाशाउवा। सा-

२ २ ५
हाउवा३। ऊ३२३४पा॥ ६॥ ४

अमहीयुर्ऋषिः*। हे "सोम!" "ते" तव "देवावोः"† देवकामः "अघशंसहा" राक्षसानां हन्ता‡ "वरेण्यः" सर्ववरणीयः "मदः" मदकरः "यः" रसोविद्यते तेन रसेन "अन्धसा" आदरणीयेनान्नेन¶ "पवस्व" क्षर॥ ४॥ ४

---

* "आङ्गिरसः"-इति ऋषि-नैगेयः।

† देवावौरिति 'वीकान्तौ (अदा०उ०)'-इत्यस्य रूपम्, कान्तिरिच्छा। देवान् वेति इष्टे स देवावीः, अन्येषामपीति (६. १, १३७) पूर्वपददीर्घः।

‡ "अघशंसः"-इति स्तेननामसु यथोदग्रं नैघण्टुकम् (३, २४)। 'अघं पापं, यः शंसति, तस्य हन्ता'—इति वि०।

¶ आदरणीयेनान्नेनेति भावः। "अन्धसा अन्नेन'-इत्येव वि०।

१ २ ३ १ २
हरिरेतिकनिक्रदत्॥ ५ ॥ ५ *

५ र र १ २
(वैष्टम्भे द्वे॥) तिस्रोवाचाः। उदाइ। उदा३१उ।
२ ५ र र २ २ २
वाये३। रा२३४ते। गावोमिमा। तिधाइ। तिधा३१उ।
२ ५ र २ १ २
वाये३। ना२३४वाः। हरिरेती। कनाइ। कना३१उ।
२ ५
वाये३। का२३४दात्॥ ७॥

५ र र १ २ २ १ र र २
तिस्रोवाचाः। उदाइराइते। गावोमिमान्तिधा१इ-
१ २ र ३ ५ १ २ ५ र र
नाइवाः। हरिरेतो२३४हाइ। का२ना२३४ओहोवा।
० ५
का२३४दात्॥ ८॥

२ र १ ५ २ र १ २ र
(वाष्टौ हे द्वे॥) तिस्रोवाचो२३४हाइ। उदौरताइ। ग्रा-
र १ ५ २ र १ २ १ ५ २
वोमिमा२३४हा तिधेनवाः। हरिराइतो२३४हाइ। क-
१ २ १ ३ ५ र र २ १ २ र १ २ ३ १
नाये३। का२दा२३४ओहोवा। अस्मभ्यङ्गातुवित्तमा२-
१ १ १
३४५म्॥ ९॥

---

* अ०२,२,१४,१ = ऋ०६,८,२३,४ = अ०२,१,२० ;—७,१,१६ ;— ९,१,७ ;— १५,१,१९ ;—२०,१,१०—११ ;—अग्ने १,५,१३।

तिस्रोवाचउदीरतो। वाहाइ। गावोमिमाइ।
तीर्धेनाइवाः। हारीराइतो। कारनाइओहोवा।
क्राइदात् ॥ १० ॥

(क्षुल्लकवैष्टम्भम् ॥) तिस्रोऽवा। चाउदीरताइ।
गावोमिम। तिधाइनाइवाइः। होवाइहाइ। हराइरा१-
इतौर३। होवाइहाइ। कनायेइ। क्राइदाइओहोवा।
दौरइआः ॥ ११ ॥

(पाष्टौंहम्॥) तिस्रोवाचापउदीरताइ। गावोमिम-
न्तिधेनवः। हरिराइइतो। कनौ३। ऊवाइ। होइवाइ।
क्रारदौरइओहोवा। हाओवा। ओवाइ४५ ॥ १२ ॥ १

त्रितऋषिः*। "तिस्रोवाचः" ऋगादिभेदेन त्रिविधाः†

---

*—"त्रितः"—इति ऋषि-नैर्णयः।

†—"चत्वारिवाक्परिमिता"-इत्यादौ (ऋ० १, २२, ८, ४५) मुनौ तु व्याव-हारिकी वाचा चर्चा चतुष्टयम्। तथाच तत्रैव भाष्यकृतं वाक्चतुष्टयम्—"ओङ्कारो-महाव्याहृत्यश्चेत्यर्थम्; वामाख्ये ते चोपसर्गनिपाताश्चेति वैयाकरणाः; मन्त्राः कल्पो ब्राह्मणं,चतुर्थी व्यावहारिकीति याज्ञिकाः; ऋचो यजूंषि सामानि,चतुर्थी व्यावहारि

अथ षष्ठी।

१ २ ११२११२११
इन्द्रायेन्दोमरुत्वतंपवस्वमधुमत्तमः।
२ २ ३ १ २ २ १ २
अर्कस्ययोनिमासदम्॥ ६॥ ६ *

५ २ २ २ १ २ १
(इषोवृधीयम्॥) इन्द्रायेन्दाउ। मरुत्वताइ पवस्वा-

"उदीरते" स्तुतीः प्रोद्गायन्ति ऋत्विजः। "धेनवः" आशिरेण प्रोक्षणिचाः "गावः" "मिमन्ति" † शब्दायन्ति दोहार्थम्। "हरिः" हरितवर्णः सोमश्च "क्रनिक्रदत्"‡ शब्दं कुर्वन्ति गच्छति कलशम्¶॥ ५॥ ५

---

* उ०४,१,११,१= ऋ०७,१,४०,१=क०२,१,१६—१९—१८—१९—१०—२१; —८,१,४;—१०,२,४;—१६,१,१३;—२२,२,१६क्ख १,१,१७।

कीति नैरुक्ताः; सर्पाणां वाग् वयसां चुद्रस्य सरीसृपस्य, चतुर्थी व्यावहारिकीत्येके। पशुषु लूनवेषु मृगेष्वात्मनि चेत्यात्मप्रवादः। यद्यपि ब्राह्मणं भवति—सा वै वाक् सृष्टा च तूष्णीं यथवदेष्वेव लोकेषु चीखि, पशुषु तुरोयम्; या पृथिव्यां साम्नौ सा रथन्तरे, यान्तरिक्षे सा वायौ सा वामदेव्ये, या दिवि सादित्ये सा बृहति सा क्षत्रियेषु; अथ पशुषु तनौ या वागत्यरिच्यते तां ब्राह्मणेष्वदधुस्तस्माद् ब्राह्मणा उभयीं वाचं वदन्ति—सा च देवानां, या च मनुष्याणाम्"-इति नि० पू०१,९।

†—'मा शब्दे (जु० पा०)'-इत्यस्य पुरुषव्यत्ययेन (३,१,८५) रूपम्।

‡—विरुत्तरशब्दस्करणेऽर्थे विद्यमानस्य चुरादेर्भयपदिनः क्रन्देः सार्वधातुके (३,४,९) सुडि "दाधर्त्ति (७,४,६५)"-इत्यादिनाच्लेरङ् द्विर्वचनसभ्यासस्य चुत्वाभावो निगमस्य निपातितः।

¶—द्रोणमिति प्रसिद्धम्।

१　　२　१　　१　　३
मा२। धुमत्तमाः। अर्कस्यो२। निमा२३। सा२-
३　५र र　　२१र २
दा२३४ औहोवा। इषीवृधे१ ॥ १३ ॥

१　　५　३　　५　　२१
(इन्द्रसाम ॥) आ२३४इन्द्रा। या२३४इन्द्रा। मरु-
२　१　५　३　५　२१　२　१
त्वते३। पा२३४वा। स्वा२३४मा। धुमात्तमाः। आ-
५　३　५　　२१र २३ १ १ १ १
२३४र्का। स्या२३४यो। निमासदा२३४युम् ॥ १४ ॥

२र १　　१　२　र र
(वैश्वदेवे दं ॥) इन्द्रायाइन्दो२३। हा। औ३हावा।
१　१　२　र २　　२　१　२　१
मरुत्वाते२३। हा औ३हावा। पवस्वामा२३। हा।
२　र २　१　　१　२　र २
आ३हावा। धुमत्तामा२३ः। हा। औ३ हावा। अर्क-
१　१　२　र र　　र १　१
स्यो२३। हा। औ३हावा। निमासादा२३म्। हा।
२　र २　१
औ३हावा३४३। ओ२३४युइ। डा ॥ १५ ॥

४५र र र　　४　४　१　१
इन्द्रायेन्दो। ए५। मरु। त्वताइ। पवस्वमधु-
१　१　१　ऽ २.　१　२
मत्ता२३माः। ऊवाइ। हो३वा। अर्कास्या२३यो। ऊ-
१　ऽ २　१र　२　१
वाइ। हो३वा। निमासा२३दा३४३म्। ओ२३४युइ। डा।
॥ १६ ॥

५ २ २ २ २ १ २ २
(आग्नेये द्वे ॥) इन्द्रायेन्दोहाउ। म। रू। त्वतेऽहाउ।
१ २ १ ७ २ १ ७ २
पवस्वमधु। मा। तमा२३हाउ। अर्का। स्यो२२हा३इ।
१ ५ ४ ५
निमा२३। हो२३४वा। सा५दो३ईहाइ॥ १७॥

५ २ २ ४ ५ ४ ५ २ १ २ १ २
इन्द्रायेन्दोवा। ओवा। मरूत्वतोवा। ओवा।
१ २ १ २ १ २ २ ४ ५
पवस्वमोवा। आवा। धूमत्तमोवा। ओवा३। अर्काहाउ।
४ ५ २ १ २ १ ५ ४ ५
स्योहाउ। निमोवा३ओ२३४वा। सा५दो३ईहाइ॥ १८॥

४ ५ २ २ २ ४ ५ २ ४ १
(वैश्वदेवम्॥) इन्द्रायेन्दोमरूत्वते। ओहाइ पव-
२ १ २ ६ २ २ ५ १ ७
स्वमधमत्तमः। ओ३हा३४३। ओ३४हा। आर्कस्यायो२३।
१ २ ५ २ २ ३ ५
ना२इमा२३४ओहोवा। उप्। सा२३४दाम्॥ १९॥

५ २ २ २ ५ १ २
(आग्नेयम्॥) इन्द्रायेन्दोमरूत्वाईताइ। पवस्वम।
१ २ ५ २ ५ ४ ५
धुमात्ता१मा२३४:। अर्कस्ययोनिमा३हाउ। सा५दो३ईहाइ
॥ २०॥ ई

काश्यप ऋषिः*। हे "इन्दो।" सोम!† "मधुमत्तमः"

---

* "मारीचः" इति ऋषि-नैगेयः।

† ३० ९८४ पृ०३०।

अथ सप्तमी।

१ १ ३ १र २र ३ १र २र ३ २
असाव्यꣳशुर्मदायाप्सु दक्षोगिरिष्ठाः।
३ २उ ३ १ २
श्येनेनयोनिमासदत् ॥ ७ ॥ ७*

४ ५ १ २
(शेऽग्रवानि चत्वारि ॥) आसा। वियꣳशुर्मा३१उवा२३।
५ ४ ५ ४ ५ २ २ १ १ १ १
दा२३४या। आप्स्वदाक्षाः। गिरा३१उवायेऽ३। ष्ठा२३४युः।
२र १र ३ ५
श्येनोना२३यो। निमा३१उवा२३। सा२३४दात्॥ २१ ॥
४ ५र ४ १ ० १ ० १
असाविया। शुर्मदा२। य। आप्स्वदाक्षा२:। गा-
२र १ २ १ २ ५ ४
इरिष्ठाः। श्याइनो१नायो२३। निमो२३४वा। सापुदो-
५
ꣳक्षाइ ॥ २२ ॥

अतिशयेन मधुमान् "अर्कस्य" अर्चनीयस्य† यज्ञस्य "योनिं" स्थानं "आसदम्"‡ उपवेष्टुं "मरुत्वते" "इन्द्राय" इन्द्रार्थं "पवस्व" क्षर ॥ ६ ॥ ६

---

* उ० ३,२,१६,१=ऋ० ७,१,२५,४,= आर १,२,२३= क ३,१,१० ;—७,२,१९ ;—१६,१,४ ;—२०,३,२।

† प्र० व्यञ् पृ० इ०। अर्कयति अर्चते रूपम्।

‡ 'आसदम् आसीद' इति वि०।

५ २ ३ २ ३ ५ १७ ३ ३ १
असा । वियाओ२३४वा । ग्रुमंदाया । ओ२३४वा । आ-
२ ३ ५ २ १२ २ ३ ५ २२१२ २
प्साओ२३४वा । दक्षोगिराइ । ष्ठाओ२३४वा । श्येनोनयो-
२ २ ३ १ १ १ १
निमासदा२३४५त् ॥ २३ ॥

५ २ ३ २ ३ ५ २ १ ३ २ ३ ५
असा । वियौवाओ२३४वा । ग्रुमंदायौ । वाओ२३४वा ।
३ २ ३ ५ १ २ ३ ५
अप्सु । दक्षौवाओ२३४वा । गिराइ । ष्ठौवाउ२३४वा ।
२ ३ २ ३ ५ १ २ ३ ५
श्येनः । नयौवाओ२३४वा । निमा । सादौवाओ२३४वा ।
४
क्षोप५इ । डा ॥ २४ ॥

(च्यावनानि चत्वारि ॥) ४ ५२ ४ ५ २
असा । व्युऊवाक्षाइ । अप्-
१ २२ २ २ १ २
ग्रुमंदायाप्लृदक्षोगिरिष्ठाउऊवा२३क्षोइ । श्या२३इनोइ ।
१ ३ ५२ २ २२ २ ३ १ १ १ १
ना२योइ३४औक्षोवा । निमासदा२३४५त् ॥ २५ ॥

४ ५२ ४ ५२ ४ ५ १ २ १
असाव्यप्रुः । औक्षोवाक्षाइ । मदा२३या । आ-
२ २ २ १ २ २ १ ३ ५२ २
पलृदक्षोगिरिष्ठाः । श्याइनोना३योइ । ना२इमा२३४औक्षो-
२ ३ ५
वा । उप् । सा२३४दात् ॥ २६ ॥

अथाष्टमी।

२ ३ १२ ३ १२ ३ १२
पवस्वदक्षसाधनोदेवेभ्यःपीतयेहरे।

३२ २ ५२ ४ ५२ ४
इन्दाइ१२३४। इन्दा। साव्यꣳषुमदाय। इन्दा।

२ १ २ २ ३ ५ २२ १२ ३ २
अपस्वदशोगिरिष्ठाइ४५ः। ईइ२३४हा। श्येनोनयोऽनिमा-

३ ५ १ ३ २ ३ ५
इ४५। ईइ२३४हा। आइसदाइ४५त्। ईइ२३४हा॥ २७॥

३ ५ ३ ५ ५
असाइ२३४। वियꣳषुः। मदाइ२३४याई। हाउ।

२ ३ ५ २ १ ५ १ २
आपस्वदाइ२३४क्षाः। गिराइष्ठाइ२३४हाइ। श्याइनोनाइ-

२ १ २ १ ५ ५
योइ। नाइमाइ२इहाइ४३इ। साइ२३४दोऽहाइ॥ २८॥ ७

जमदग्निर्ऋषिः*। "गिरिष्ठाः" पर्वते जातः "अंशुः" सोमः "मदाय" मदार्थं "असावि" अभिषुतः। "अपस्वत्" सतीवरीषु "दक्षः"† प्रवृद्धश्च भवति। किञ्च। "श्येनोन" यथा श्येनो वनादागत्य स्थानमासीदति तद्वद् "अयं" सोमः "योनिं" स्वकीयस्थानम्‡ "आ सदत्"¶ आसीदति॥ ७॥ ७

---

* "भार्गवः"-इति ऋषि-नैगेयः।

† दक्षइति बलनामसु नैघण्टुकम् २, ९। 'दक्षः श्रोषुः'-इति वि०।

‡ द्रोणकलशमिति यावत्।

¶ लेटो रूपम् (३, ४, ७)

१ १ १ २ २ २ १ २
मरुद्भोवायवेमदः ॥ ८ ॥ ८ *

४ ५ २ ४२ ५ १
(प्राजापत्ये दे ॥) पवस्वदौ। द्यौद्योवाद्याइ। द्या-
२२ ऽ २ २ २ ५२
साधनाइः। औ३द्यो३४इ। औ३द्यो३४इ। औद्यो।
३२ २ २१२ १ २ ३२ २ऽ २ २ १ २
वाद्याइ। देवेभ्यःपाइ। तयेद्याराइ। औ३द्यो३४इ।
२ ५२ ३२ २ १ २२ ऽ २ २ २ ५२
औद्यो। वाद्याइ। मरुद्भोवाइ। औ३द्यो३४इ। औद्यो।
३२ २ १ ३ ५२ २ ३ ५
वाद्याइइ। या२वा२३४औद्योवा। मा२३४दाः ॥ ८ ॥

४ ५ ४२ ५ ५ २२१२ २ १
पवस्वदक्षसाधनः। औ६वा। देवेभ्यःपीतया२ओइ।
२ १ २२ १ ४ ५ ४
द्यरा२इ। मरुद्भोवा२। ओ२३। यवोवा। मा५दो६
५
द्याइ ॥ ३० ॥ ८

दृढ्यत आगस्त्य ऋषिः। हे "हरे" हरितवर्ण पाप-हर्तर्वा सोम! "दक्षसाधनः" दक्षोबलन्तस्य साधकः † "मदः" मदकरश्च त्वं "पवस्व" क्षर। किमर्थम् देवेभ्यः इन्द्रादिभ्यः

---

* उ०१,१,१०,१=ऋ० ६,८,१५,१= उ० २,२,८;—१५,२,९;—१६,२,१=अथ १.१,९।

† 'दक्षसाधनः क्षीरसाधनः'-इति वि०।

‡ 'मदः मदनीयः'-इति वि०।

अथ नवमी।

१ २ ३ १ २ ३ २ ३ २ १ २
परिस्रानोगिरिष्ठाःपवित्रसोमोअक्षरत् *।
१ २ ३ २
मदेषुसर्वधाअसि ॥ ९ ॥ ९ †

(आद्यं वैदन्वतम् ॥) ४ ५ पारो। २ र र र स्राणोगिरिष्ठाः। प-
१ २ ५ २र १ १ २ ऽ
वाऽइचेऽ३४सो। मोअक्षारा३त्। मदाइषूसाऽ३। ईऽ-
१ २१ ५ ४ ५
याऽ३। वधोऽ३४वा। आप्यसोऽईहाइ ॥ ३१ ॥

(द्वितीयं वैदन्वतम्॥) ४ प। ५ र्येपारो। २र र र स्रानोगिरिष्ठाः।
१ २ ५ २र १ १ २ २
पवाऽइचेऽ३४सो। मोअक्षारा३त्। मदाइषूसाऽ३हाऽ३।
१ २ ५र र २ १ ३ १ १ १
वाऽरधाऽ३४औहोवा। ए३। असो२३४५ ॥ ३२ ॥

"पीतये"ॐ पानाय। तथा "मरुद्भाः" वायवे च पीतये पानाय "पवस्व"ऽर ॥ ८ ॥ ८

---

* "सोमो अक्षाः"-इति उत्तर-आख्याने वि०।

† उ०४,१,१७,१=ऋ०४,८,८१=ऊ०३,२,८—९—१०;—८,१,९;—९,२,६;—१०,१,१८;—१२,१,४;—१४,१,२;—१५,१,८—९—१०—११—१२;—१५,२,७=ऊ० २,१,१०;—२,१,१३;—४,१,१४;—६,१,१३।

‡ "मन्ये वृषेषपच (३, ३, ९६)"-इति क्विप् दातव्य।

(तृतीयं वैदन्वतम्॥) पाऽपूरी। स्वानोऽगाऽइरिष्ठाः।
पवित्रेसो। मोअक्षरात्। पवित्रे। सोमो२३। क्षा-
रात्। ओइ। मदौ। वा३४३ओ३४वा। घुवा। सर्वधाः।
असायै३। मा२दा२३४औहोवा। ए३। घुसर्वधाअसौ-
२३४५॥ ३२॥

(चतुर्थं वैदन्वतम्॥) औ३होइ। इहहाहहाइ।
औ२हो२३४वा। पराइस्वा२३४नो। गिरा२३४इष्ठाः।
पावित्रे२३४सो। मोअक्षा२३४रात्। मदाइषू२३४सा।
र्वधाआ२३४सो। औ३होइ। इहहाहहाइ। औ२हो-
२३४५वा६५६। ए३। उपा२३४५॥ ३४॥

(आङ्गिरसस्य पदस्तोभौ द्वौ॥) पा। र्येस्वानाः।
गा२इ। रिष्ठा२या। हाहाइ। ओवा२३होइ।
पावित्रेसो। मोअक्षारा२त्। हाहाइ। ओवा२३होइ।

मदा२इषुसा। हाहाइ। ओवा२३हो। वधो२३४वा।
आपुसोई्हाइ ॥ ३५ ॥

पर्यौंहोवाहाइस्वानाः। गा२इ। रिष्ठा२या। ओ२३४।
हेाहोइ। हाहा। होवा। होवा। पविचेसो। मोअ
धारा२त्। ओ२३४। हाहोइ। हाहा। होवा। मदा
२इषुसा। ओ२३४। हाहाइ। हाहा। होवा। हो
वा३। वधो२३४वा। आपुसोई्हाइ ॥ ३६ ॥ ९

अस्याः परस्याश्च कश्यपोऽसित* ऋषिः। अयं "सोमः" "पविचे"† "पर्य्यक्षरत्" परिक्षरति। "स्वानः" सुवानः‡ अभिषूयमाणः "गिरिष्ठाः" गिरिस्थायी गिरौ वर्त्तमान इत्यर्थः। स त्वं "मदेषु" मादकेषु स्तोत्रकेषु "सर्वधा असि" सर्वस्य धाता दाता वा भवसि॥

"स्वानः"-"सुवानः"-इति, "अक्षरन्"-"अक्षा"-इति च साम्नऋचः पाठः ॥ ८ ॥ ९

---

* अथवा कश्यपो देवलः (ऋ०सर्व०)।

† 'पविचे ऊर्णमये'-इति वि०। पविचच्च दशापवित्रमित्यनुपदम् (दृतश्चतुर्थे) वक्ष्यति सायणः।

‡ साम्नामिकवच्छब्दवचनात् उवङ् विकल्पः (७, ३, ९७)।

अथ दशमी।

१ २ ३,२ २ २ १ २र ३क २र ३ २
परिप्रियादिवःकविर्वयाꣳसिनप्नयोर्हितः।

३ १ २ २ १ २
स्वानैर्याति*कविक्रतुः॥ १०॥ १०†

॥ चतुर्थ-दशति॥

५ र ४ ५ १ र
(पूर्व्वमौर्णायवम्॥) परिप्रियादिवःकावीः। वयाꣳ

र र र २ १ १ ऽ
सिनप्नोर्हितः। स्वानैर्या२३ती। आया२। इया२ई-

२ १ २१ ३ ५र र २ १ १ १ १
३या। कविक्रतो२। या२३४औहोवा। ई२३४५॥ ३७॥

४ ४ १ र
(उत्तरमौर्णायवम्॥) परिप्रियाꣳदिवःकवाइः। वया

र २१ र र २१ र र २ १
२हो१वाꣳसिनप्नयोर्हितः। स्वानैर्या२३ती। ऊवा।

२ १ २ १ ऽ २ ३ २ २
होवा। होवा। ऊवा२इ। ई३या। कविक्रतो२।

३ ५र र २ १ १ १ १ १
या२३४औहोवा। ई३या२३४५ꣳम्॥ ३८॥ १०

॥ इति त्रयोदशस्यार्द्धः प्रपाठकः॥

---

* "स्वानोयाति"-इति उ०-व्याख्याने वि०।

† उ० ३,१,१९,१=ऋ० ६,७,३२,१= ऊ० २,२,१५,—७,१,८;—१५,२,१०;—१६ ८,११;—२०,१,१७=ऊ० ५,१,६।

अथ द्वितीये खण्डे—

सेषा प्रथमा।

१ २ २ ३ २ ३ १ २ ३ १ २
प्रसोमासोमदच्युतःअवसेनोमघोनाम्*।

३ २ ३ १ २
सुताविदथेअक्रमुः ॥ १ ॥ ११ †

२ ३ ५ २ १ २
ओं ॥ (सौभरे द्वे ॥) प्रसोमा२३४साः। मदच्युतः।

कविर्मेधावी। "कविक्रतुः" अन्तःप्रज्ञः क्रान्तकर्मा वा सोमः "नमोः" अधिषवणफलकयोः ‡ "हितः" निहितः। "दिवः" द्युलोकस्य "प्रिया" प्रियाणि "वयांसि" वयन्ति गच्छन्तीति वयांसि ग्रावाणः ¶ तानि। [तथाच मन्त्रवर्णः—"श्येना अतिथयः पर्वतानां ककुभः"-इति।] "स्वानैः" अभिषुण्वद्भिरध्वर्युभिः "परियाति" गच्छति॥

"स्वानैः"-सुवानैः-इति साम्नऋचः पाठः॥ १० ॥ १०

इति श्रीसायणाचार्य्य-विरचिते सामवेदार्थप्रकाशे छन्दोव्याख्याने पञ्चमस्याध्यायस्य प्रथमः खण्डः॥ १॥

---

* "मघोनः"-इति ऋ०, उ०-ब्रा० वि० च।

† उ० १,२,२१,१=ऋ०९,८,२२,१=ऊ० २,२,१४ ;—२१,१,२०।

‡ 'द्यावापृथिव्योः अहोरात्रयोर्वा'-इति वि०।

¶ 'वयांसि अन्नानि पक्षिणो वा'-इति वि०। ग्रावाणश्च सोमाभिषवार्थानि पाषाविशेषाणि "अग्निरुक्थे"-इति ऋचो व्याख्याने द्रष्टव्यम् (प्र० १७१ पृ०)। निघण्टौ तु ग्रावेति पर्वतेति च मेघनामसु पठ्यते १, १०।

अथ द्वितीया।

१ २ २२ ३ २ ३ १ २ ३ १ २
प्रसोमासोविपश्चितोपोनयन्त्ऊर्मयः* ।
१ २ ३ १ २
वनानिमह्विषाइव ॥ २ ॥१२ †

१ २ २ १ ३ ५ १ ७
औ२३ह्वावा३ । अवा२सा२३४इनाः । औइमघोना२म् ।
१ १ ३ ५२ २ २२ ३ १ १ १ १
सुता२३ः । वा२इदा२३४औ ह्वावा । थे अक्रमू२३४५ः ॥१॥११
५२ २ १ २ १ २ १
प्रसोमासाः । वाइपश्चितः । आपो१नायाा२ । ता

श्यावाश्वऋषिः‡ । "सोमासः"¶ सोमाः "मदच्युतः" मद-स्राविणः "सुता" सुतः § अभिषुतः सन्तः "मघोनां" ह्वि-मतां ‖ "नः" अस्माकं सम्बन्धिनि "विदथे" यज्ञे "अवसे" ** अन्नाय कीर्त्तये वा "प्राक्रमुः" प्रगच्छन्ति ॥

"मघानां"—"मघोनः"-इति पाठौ ॥ १ ॥ ११

---

* "अपानयन्त्यूर्मयः"-इति ऋ० ख, उ०-आ० वि० च ।

† उ० १,१,१९,१= ऋ० ६,८,२३,१= ऊ० ६,२,१२;— ११,२,११;—१४,१, १२—१३—१४;—१८,१,११;—१९,२,१५—१६ ।

‡ "श्यावेयः"-इति ऋषि-नैगेयः ।

¶ अमुकि रूपम् (७, १, ५०)।

§ सुताइति आबे रूपम् (७, १, ३९)।

‖ मघं धनम्, ह्वइ च तत् ह्वीरूपम् लक्ष्यमिति भावः ।

** "विदथः"-इति यज्ञ-नामसु पञ्चमं नैघण्टुकम् ।

अथ तृतीया।

१२ ३ १२ २२ २१ २ ३ ३ १२
पवस्वेन्दोवृषासुतःक्रधोनोयशसोजने।
२ २३११
विश्वाअपद्विषोजहि ॥ ३ ॥ १३ *

१ २२ १ २ १ २ २ १२८
ऊर्मयः। वानाऽनिमा२। आऔ३हो। हिषाइव।
१ २ १
इडा२३भा३४३। ओ२३४५ऽ ॥ २ ॥ १२

वितऋषिः†। "विपश्चितः" मेधाविनः "सोमासः" सोमाः "प्र नयन्त" पात्राणि प्रति गच्छन्ति। किमिव? "अपऊर्मयः" [अपइति षष्ठी व्ययेन हितीया ‡]। [अपामूर्मयः अतएव बह्वृचाः—अपान्नयन्तीति पठन्ति] ते यथा सततमुद्भवन्ति तद्वत्। [बाहुल्येऽयं दृष्टान्तः। अर्थतो गमने दृष्टान्तान्तरमभिधीयते- "वनानि महिषाः" प्रहृता मृगा इव। अथवा स्वाश्रयात् प्रद्रवणे प्रथमो दृष्टान्तः। हितीयस्तु दशापवित्रादधःप्रदेशे ॥ २ ॥ १२

---

* उ० २,१,२,१= ऋ० ७,१, २१, ६।

† "आग्नः"-इति ऋषि-नैगेयः।

‡ "व्यत्ययो बहुलम्"-(मै० १, २, ८) व्याख्यातश्चैवं पुरस्तात् (प्र०२,१५पृ०—) मृगेषु यो महान् मृगः तस्य तु नामौ महिष इति प्रसिद्धम्। तथाहि—

"ब्रह्मा देवानाम्पदवीः कवीनामृषिर्विप्राणां महिषोमृगाणाम्"

—इति ऋग्वेदीया श्रुतिः (९, ५, ११, ६)। "महिषो मृगाणामित्येषन् हि महा भवति मृगाणाम्"-इत्यादि तद्व्याख्यानं याज्ञस्य।

अथ चतुर्थी।

२३ १२३ १२३ १२

वृषाह्यसिभानुनाद्यु मन्त्वाहवामहे।

१२३ ३१२

पवमानस्वर्दृशम्* ॥ ४ ॥ १४†

४ २ २४ १२२

(वृषकाणि त्रीणि ॥) पवस्वेदो५वृषासुताः। क्रधी

२ २ २ २ ३ ५ १० ३

नोयशसोजनाये३। वाइश्वाआ२३४या। द्वा२इषा२३४

५२२ ३ ५

औहोवा। जा२३४हो ॥ ३ ॥ १३

४५२ ४ १ १२ २ १ २ २

वृषाह्विया। सिभान्२३ना। द्युमन्त्वाहावा१माहा

३२ १ २१ ५ ३ ५

२३४इ। पवाइ। मानसुवो२३४वा। दृ२३४शाम् ॥ ४ ॥

अमहीयुर्ऋषिः‡ ॥ हे "इन्दो" सोम! "सुतः" अभिषुतः "वृषा" सेक्ता त्वं "पवस्व" धारया क्षर। "जने" जनपदेषु "नः" अस्मान् "यशसः" यशस्विनः "क्रधि"¶ कुरु। "विश्वा" सर्वान् "द्विषः" द्वेष्टॄन् शत्रून् "अप जहि" मारय॥ ३ ॥ १३

---

* "पवमानस्वाध्यः"-इति ऋ०।

† उ० २,१,४,१=ऋ० ७,२,१,४।

‡ "आङ्गिरसः"-इति ऋषि नैगेयः।

¶ 'गृगृणुपकृतभ्यश्छन्दसि (६, ४, १०२)"-इति सिजं क्रधीति। ऋचि तु "क्रधी"-इति दीर्घान्तपाठः, स च "द्व्यचः (६, ३, १३५)"-इति योगविभागात् साध्वः।

अथ पञ्चमी।

१२ ३१२ ३१ २३ २ ३२
इन्दुःपविष्टचेतनःप्रियःकवीनाम्मतिः *।

४२ २४ २१ २२ १३२ २
वृषाह्यापुसिभानुना। द्युमन्तंत्वाहवामहे।

ह्वा३इ। ऊ२। होऽवा। पवमानसुवर्दृशम्। ह्वा-

३इ ऊ२। होऽवा। ऊवो३४५इ। डा॥ ५॥१४

भृगुर्ऋषिः †॥ हे "सोम!" त्वं "वृषा" अभिलषितफलानां वर्षिता "असि हि" भवसि खलु। तस्मात् हे "पवमान" पूयमान पुनानः वा सोम! "सुवर्दृशं" सर्वस्य द्रष्टारं¶ "भानुना" तेजसा§ "द्युमन्तं" दीप्तिमन्तम् अतिशयेन तेजस्विनमित्यर्थः। स्तुतिमन्तं वा "त्वा" त्वां "हवामहे"‖ यज्ञेषु आह्वयामहे॥ ४॥१४

---

* "मती"-इति ऋ०।

† "वारुणिः भार्गवोऽजमदग्निर्वा"-इति ऋषि-नैगेयः।

‡ अभिषुत शोधित इत्यर्थः।

¶ प्र०४८०.पृ० द्र०।

§ भानुरिति निघण्टावहर्नामसु (१,९) दृश्यते परमिह सर्वत्र रश्मिवाचकत्वेन व्याख्यातमाचार्येण—(प्र०२१९ पृ०, ४५८ पृ०)।

‖ कः यज्ञमारब्ध-बाहुल्येन कर्पसिदम् (६, १, २४)।

३ १र२र३ १ २
स्वजदश्वरथीरिव ॥५॥ १५ *

२ २ ३र४ ५ ४ ५
(कौम्भ्यस्य सामानि त्रीणि ॥) इन्दुरौहोवाहाइ। पावी।
२ १ १ ५ २र १ ऽ २ १
ष्ठचारइ। तनोरइ३४हा। हाहोइ। होइहा। प्रियाः-
२ र २र २ ३ ५ २र १ ऽ २
कवी। नाम्न। तिरोरइ३४हा। हाहोइ। होइहा।
१ १ ५ २र र ऽ २ १
स्वजारत्। अश्वोरइ३५हा। हाहोइ। होइहाइ। रार
३ ५र र ३ ५
यारइ३४ औहोवा। ईरइ३४वा ॥ ६ ॥

४ ५ ४र५ ४ ५ ४ ऽ २ १
इन्दुःपविष्ठचेतनःप्रियःकवाइ। ऊइम्ऊम्। नाम्मा-
५ १ २ ऽ २ १ ३
रइ३४तीः। स्वजादारइश्वाम्। ऊइम्ऊइम्। रारथा-
५र र ३ ५
रइ३४औहोवा। ईरइ३४वा ॥ ७ ॥

४ ५ ४र५ ४ ५ ४ ४र५ ४ ५ ४ ४
इन्दुःपविष्टचेतनःप्रियःकवीनाम्मतिःस्व। जापूदश्वाभ्।
१ १ १ ३ ५र र ३
ओवाइ३। ओवाइ३। रार थारइ३४ अ हो वा। ई र इ ४
५
वा ॥ ८ ॥ १५

---

* ऋ० ७,१,३७,५।

अथ षष्ठी।

१२ ३२३ १२ ३१र २र ३२
अरुक्षतप्रवाजिनोगव्यासोमासोअश्वया।
३१२ ३१र २र
पूक्रासोवीरयाशवः॥ ६॥ १६*

५ २ ४ ५४र ५ १
(कार्त्सवेशस्य चीणि॥) अरुक्षाऽताप्रवाजिनाः। गा-
१ र १ २ १
व्या२सोमा२। सोअश्वयाश१क्रा२सोवी२। रया२-
१२ १
शवः। ओ२३४५इ। डा॥ ६॥

५ र ५र २१र र र र
अरुक्षतताप्राई्वाजिनाः। गव्यासोमासोअश्वया२३-

अस्याऽउत्तरस्याश्च कश्यपऋषिः†। "चेतनः" प्रज्ञापकः "प्रियः" देवानां प्रीतिकरः "इन्दुः" सोमः "कवीनां" क्रान्तकर्मणां स्तोतृणाञ्च "मतिः"¶ मत्या स्तुत्या "पविष्ट"§ पवते। "अश्वं" हयं "रथीरिव" रथीव ऊर्मिं॥ "सृजत्" सृजति॥ ५॥ १५

---

* उ० ४,१,२,१=ऋ० ७,१,३६,४।

† "मारीचः"-इति ऋषि-नैगेयः।

‡ प्र०९२८ पृ० द्र०।

¶ खादेशे रूपम् (७,१,३९)।

§ लेटः सिप्पक्षे रूपम् (३, ४, ९४)।

॥ "पङ्क्तीकृतानामश्वानां नमनोन्नमनालतिः। अतिवेगसमायुक्ता गतिरूर्मिरुदाहृता"-इत्यश्वचिन्तामणिः।

अथ सप्तमी।

१२ ३ १२ ३ १र २र ३१ २
पवस्वदेवआय*षगिन्द्रङ्गच्छतुतेमदः।
३१र २र३१२
वायुमारोहधर्मणा ॥ ७ ॥ १७ †

१ २१र र २ २१ १ २ ५र
ह्वाइ। प्रुक्रासोवा३१इ। रया२३। प्रा२वा२३४औ-
र ३ ५
होवा। ग्वा२३४भी ॥ १० ॥

३ ४ ३४र ५ २ ४ ५र २
आसृक्षतप्रवाजिनाः। ए३। गव्यासोमा। सो३
१ २ २ १ २ ५ २१ ५ ४
आश्वा३या। प्रुक्रा२सो२३४वौ। रयो२३४वा। प्रापु-
५
वोईह्वाइ ॥ ११ ॥ १६

"वाजिनः" बलवन्तः‡ "आशवः" वेगवन्तश्च "सोमासः" सोमाः "गव्या" गवेच्छया¶ "अश्वया" अश्वेच्छया§ "वीरया" वीरेच्छया च॥ "प्रासृक्षत" ऋत्विग्भिः प्रकर्षेण सृज्यन्ते ॥ ६ ॥ १६

---

* "देवा यु०"-इति ऋ०, उ०-व्या० वि० च।

† उ० ५,१,१५,१ = ऋ० ७,१,३४,२ = ऊ० ४,२,१७—१८—१९—२० ;—१७,१,१=ऊच्चे १,२,२।

‡ 'अन्नवन्तः'-इति वि०।

¶ प्र०२२३ पृ० द्र०।

§ ४ प्र० ४११ पृ० द्र०।

॥ अश्वयेतिवत् साध्यः।

अथाष्टमी।

१ २ ३ २ ३ १र २र ३ २
पवमानोअजीजनद्दिवश्चित्रन्नतन्यतुम्।

४ ५ ४ ५ ३ २ १ ३
(ग्रामदे ढे॥) पावस्वदि। वया३। वारया२३४

५र र ३ ५ ४ ५ ४ ५ ३ २
औहोवा। यू२३४षाक्। आइन्द्रंगच्छा। तुताइइ।

१ ३ ५र र ३ ५ २र
तूरता२३४औहोवा। मा२३४दाः। वायू२ऽहो१इ।

१ २ ३ २ १ ३ ५र र ३
आ२३रो। हधा३। हा२धा२३४औहोवा। मा२-

५
३४णा॥ १२॥

३ ४ ५ र र २ ३ ५ १र १
पवस्वदेवयो। हीयेहो२३४या। आयुषागै२हीये

ऽ २ १ र १ ऽ २ १
२हौ३या। इन्द्रंगच्छतुतेमदो२हीये२हौ३या। वायुमा-

२ २१ ५ ४ ५
रो३१२३। हधो२३४वा। मापृणो३ईहाइ॥ १३॥ १७

निध्रुविः काश्यपऋषिः। हे सोम! "देवः" द्योतमानस्त्वं "पवस्व" धारया चर। अपिच तव "मदः" मदकरोरसः "आयुषक्" अनुषक्तं* यथा भवति तथा इन्द्रं प्रति गच्छतु। अपिच

---

* सचते रूपम्। आतुषक् आयुषक् इति शाखाभेदेन पठ्यते "आतुषगिति नामानुपूर्वस्यातुषक्तोभवति"-इति वि०।

१ २ ३ २ ३ २
ज्योतिर्वैश्वानरम्बृहत् ॥ ८ ॥ १८*

४ ५ १ २ ३ २ ३ ५
(जनित्रे द्वे ॥) पावा। मानो। अजीजा२३४नात्।

२ १ ० २ १ १ २
दिवश्चित्राम। नतन्यतूम्। ज्योतिर्वैश्वा२३। नार२३

५ २ ३ ५
४औच्चोवा। बृ२३४च्चात् ॥ १४ ॥

५ २ १ २ २ १ २ १
पवमानाः। अजाइजाइनात्। दिवश्चिा२३ए

२ १ २ ३ ५ ३ ५ ३
च्चाइ। नातन्या२३४तूम्। ज्यो२३४तीः। वार२३४इ

५ ४ ५ ४ ५
"आयवः"§ गमनशीलाः "सोमासः" सोमाः मद्यं" मदकरं मदं आत्मीयं रसं "अभिपवन्तः" अभितो निर्गमयन्ति। कुत्रेत्युच्यते—"समुद्रस्य" अन्तरिक्षस्य "अधिविष्टपे" अधिकं समुच्छ्रितपवित्रे। यद्वा। समुद्रस्य यस्मात्समुद्रवन्ति रसाः तस्य कलशस्य "अधि" उपरि "विष्टपे" स्थाने "पवित्रे" निर्गमयन्ति। कीदृशाः? "मनीषिणः" मनसईप्सितारः "मत्सरासः" मदकराः "मदच्युतः" मदकरेण रसेन चावयितारः॥

"विष्टपे", "विष्टपि"—"मदच्युतः", "खर्विदः"—इति च पाठौ॥ ८॥ ५२

---

* "अव्योवारे"-इति
† "वोङ्गिरस्तमो"-इति,
‡ "भिचनः"-इति च
ऋ०।

¶ ऋ० ७, ५, १३, १।

§ 'आयवः मनुष्याः'-इति वि०। 'आयवः'-इति मनुष्यनामसु सप्तदशं नैघण्टुकम् (२, ३)।

अथ दशमी।

१ २ ३ २ १ १ २ १ २ ३ १
इन्द्रायपवतेमदःसोमोमरुत्वतेसुतः।

५ २ ४ ५ २ ४ २ ५ ४ १ २ २
(सोमसाम॥) पुनानःसोमजागृविरव्याः। वारैःपा-

० १ २ २ ३ २
रिप्रियाऽ२ः। त्वंविप्रोअभवोऽङ्गाइरा२३४। स्तमा३।

१ ३ २ १ १ ३ ५ २ २ ३ ५
माध्वायज्ञा२३म्। मा२इमा२३४औहोवा। ञा२३४णाः।

॥ २२ ॥ ५३

हे सोम! "जागृविः" जागरणशीलः "प्रियः" प्रीणयिता* त्वं "पुनानः" पूयमानः सन् "अव्याः" मेषाः "वारैः" वालैर्निर्मिते दशापवित्रे परिचरसि। "अङ्गिरस्तम" हे अङ्गिरसां वरिष्ठ! "विप्रः" मेधावी त्वं पितॄणां नेता "अभवः"† भवसि। स त्वं "नः" अस्मदीयं "यज्ञं" "मध्वा"‡ मधुना आज्यीयेन रसेन "मिमिक्ष्व"§ सेक्तुमिच्छसि। मिहेः सेचनार्थस्य (भ्वा०प०) सनि रूपम्॥ ९॥ ५३

---

* 'प्रियः प्रियतरः, भूतानां प्रियः'-इति वि०।

† 'सार्वकालिकोलङ्' (३, ४, ६)।

‡ मधु आज्ये रूपम् (३, १, ३९)।

§ 'मिमिक्ष्व सिञ्च' इति वि०।

३ १ २ ६ १र २र ३
सहस्रधारोअत्यव्यमर्षति
१ २ ३ १ २
तमीमृजन्त्यायवः ॥ १० ॥५४*

५ र २ १ १र र
इन्द्रायपा। वता२इमादा२:। सोमोमरुत्वता२इ-
१ १ २र १ १
न्द्रता२:। स। हासहस्रधारः। अतिअव्यमा२र्षातो२।
१ १ २ १
तमा२इमार्जा२। तिआया२३वा३४३:। ओ२३४५ऊइ।
डा ॥ २३ ॥

५ र २ र १
(स्वःपृष्ठमाङ्गिरसम् ॥) इन्द्रायपा। वतेमदाः।
१र र १ १ १ १ २र
सोमोमारु२। त्वतेहो२इ। न्द्रता२:। स। हासहस्रधारः।
१ २ ३ ५ ३ ५ १
अतिअव्यमा। षाताओ२३४वा। ऊ२३४पा। तमीहो-
१ १र २ १
२इ। मार्जा२। तिआया२३वा३४३:। ओ२३४५ऊइ।
डा ॥ २४ ॥

५ र २ ४ ५ ४ ५ १र र
(सोमसाम ॥) इन्द्रायाइपावताइमदाः। सोमोम-
२ २ १ २र १ २
रुत्वता१इन्द्रताः। स। हासहस्रधारः। अतिअव्यमाइ।

---

* ऋ० ७, ४, १५, २।

अथैकादशी।

१२ २१ २३ १२ २२ ३ १ २
पवस्वाजसातमोभिविश्वानिवार्या।
१ २३१ २३१२ २२
त्वꣳसमुद्रःप्रथमविधर्म
३१२ ३२
न्देवेभ्यःसोममत्तरः॥ ११ ॥५५*

४५ २१ २ २ ४ ५ १ ३ ५२ २
षाती। तमाऔ३ह्वोऽ३द्व। माजा। तारषा२३४औह्वो
३ ५
वा। या२३४वाः॥ २५॥

४५ २ ४२ ३ ५ २ १ २२
पवस्वाजसा। इन्द्रा। ता२३४माः। अभिविश्वा-
१ २२ १ ३ ५२ २ १२ १२ २
निवारिया। त्वꣳसा२मू२३४औह्वोवा। द्रःप्रथमेविधर्म-
२ २ १ ३ ५२ २ २ ३
न्। दाद्वायेऽ३। भ्याः२सो२३४औह्वोवा। ममत्तु-
२
रा१ः॥ २६॥ ५४

"मदः" मदकरः "सुतः" अभिषुतः "सोमः" "महत्वते" महद्भिस्तहते "इन्द्राय" इन्द्रार्थं "पवते" क्षरति। ततः "सह-स्रधारः" बहुधारोपेतः सोमः "अव्यम्" अविमयं पवित्रम् "अत्यर्षति" अतिगच्छति तमिमं "आयवः" मनुष्या ऋत्विजः "मृजन्ति" शोधयन्ति॥ १०॥ ५४

---

* ऋ० ९, ५, १६, २।

अथ द्वादशी।

१२ २ २११ ३ १ १
पवमानाअधृष्टतपवित्रमतिधारया।
३ १ २ ३ १ १ २ ३ १ २ २ २
मरुत्वन्तोमत्सराइन्द्रियाहया
३ २ ३ १ २ २
मेधामभिप्रियाएसिच॥१२॥५६*

॥ इति तृतीय-दशति॥

४ ५ २ २ ४ १ २
(पवित्रम्॥) पवमानाअधृष्टतपवाइ। चामतिधार

हे "सोम!" "विश्वानि" सर्वाणि "वार्या" वरणीयानि स्तोत्राणि† "अभि" लक्ष्य "वाजसातमः" अतिशयेनान्नस्य संभक्तृत्व "पवस्व" क्षर। हे सोम! "देवेभ्यः" देवानां‡ "मत्सरः" मदकरः "समुद्रः" समुन्दनशीलः¶ "विधर्मन्" विशेषेण धारक!॥ त्वं "प्रथमे" मुख्ये श्रेष्ठे यज्ञे देवेभ्यस्तदर्थं क्षर॥

"विधर्मन्"-"विधारयम्"-इति, "वाजसातये"-"वाजसातमः"-इति, "वार्या"-"काव्या"-इति च क्रमेण साम्नश्चत्वः पाठाः॥ ११॥ ५५

---

* ऋ० ९, ६, १६, ५।

† 'वार्या वरणीयेन उदकेन' इति वि०।

‡ "षष्ठ्यर्थे चतुर्थीति वाच्यम्"—इति का० (पा० २, ३, ६२)॥

¶ "समुनत्तीतिवा" इत्यादि निरुक्तोक्तेः (२, १०)। 'समुद्रः समुद्रसंस्थानीयः' इति वि०।

॥ "विधर्मन्=विधर्मणि, विविधकर्मणि कर्मकारके देवे' इति वि०।

१ २ २ २ १ १ २
यामरुत्वन्तोमत्सराइन्द्रीइयाः। हयाः। मा२३इधाम्।
१ २ १ ३ ५२ २ ३ ५
अभायेइ। प्रा२या२३४औहोवा। सो२३४चा॥ २७ ॥५६

"पवमानाः" पूयमानाः सोमाः "धारया" आत्मीयया "पवित्रम्"* "अति" अतीत्य "असृक्षत" सृज्यन्ते। कीदृशाः? "मरुत्वन्तः" मरुद्भिर्युक्ताः "मत्सराः" मदकराः "इन्द्रियाः" इन्द्रजुष्टाः। "मेधां"† स्तुतिं "प्रियांसि" अन्नानि च "अभि" लक्ष्य स्तोतृभ्य उभयं कर्तुं वा "हया" यज्ञे गन्तारः सृज्यन्ते ॥१२॥५६

इति श्रीमत्सायणाचार्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने पञ्चमस्याध्यायस्य पञ्चमखण्डः ॥ ५ ॥

॥ इति वार्हतम् ॥

---

* "पवित्रं पुनातेः। मन्त्रः पवित्रमुच्यते। 'येन देवाः पवित्रेण आत्मानं पुनते तद्वत्' इत्यपि निगमो भवति॥ रश्मयः पवित्रमुच्यन्ते। 'गभस्तिपूतो नृभिरद्रिभिः सुत' इत्यपि निगमो भवति॥ आपः पवित्रमुच्यते। 'अतपवित्राः खन्वेता मदन्ती' ब्राह्मणकाः॥ अग्निः पवित्रमुच्यते। वायुः पवित्रमुच्यते। सोमः पवित्रमुच्यते। सूर्यः पवित्रमुच्यते। इन्द्रः पवित्रमुच्यते। 'अग्निः पवित्रं स मा पुनातु वायुः सोमः सूर्य इन्द्र पवित्रं ते मा पुनन्तु' इत्यपि निगमो भवति" इति (नि० ५, ६)।

† 'मेधां प्रज्ञाम्'-इति वि०।

अथ षष्ठखण्डे—

सैषा प्रथमा।

२२ २२३२१२ ३ १२ २१ १ ३ २ ३ १२ १२
प्रतुद्रवपरिकोशंनिषीदनृभिःपुनानोअभिवाजमर्ष।
२ १ २३ १ २ ३ २ ३१ २ ३
अश्वंनत्वावाजिनंमर्जयन्तोक्षा
१ २ ३ १ २
बर्हीरश्नाभिर्न्नयन्ति ॥ १ ॥ ५७ *

२ ३५ ३२ २१
(अश्नम् ॥) ओइप्रतु। इद्वा३१। द्रवा। परि
२ २ ३ ४ ५ २ ३५ ३२ २१
कोइ। अन्निषीदा। ओइनभिः। इद्वा३१। पुना।
२ १ २ ३ ४५ २ ३ ४ ३२ २ १
नोइअभि। वाजमर्षा। ओअश्वम्। इद्वा३१। नत्वा।
२ १ २ ३ ४ ५ २ ३ ५ ३२ २ १
वाइजिनम्। मर्जयन्ताः। ओअक्ष। इद्वा३१। बर्हाइः।
१ ३ २ २ ४
रश्ना। भा३४३इः। नाइयापून्ना६५६इ ॥ २८ ॥

४५ ४५ २१ २ १
(वृषौशनं साम ॥) प्रतु। एप्रतू। द्रवा। द्रवा।
२ २ ३ ४ ५ ४ ५ ३ ५ २ १
परिकोइ। अन्निषीदा। नृभिः। एनृभिः। पुना।
२ १ २ १ २ ३ ४ ५ ४ ५ ४ ५
पुना। नोइअभि। वाजमर्षा। अश्वम्। एअश्वाम्।
२ १ २ १ २ १ २ ३ ४ ५ ४ ५ ४ ५
नत्वा। नत्वा। वाइजिनम्। मर्जयताः। अक्ष। एअक्षा।

* उ० १, १, १०, १=ऋ० ७, ३, २२, १=अर्चे १, १, ४—१९, १, ७।

२१ २१ २ २२ २ ३२ ५ ५
बर्हाइः। बर्हाइः। रशनाभिः। नये३४। ह्वियाऽहा-
२ ११११
उवा। ता२३४५इ ॥ २८ ॥

४५४ १ २
(जानस्याभीवर्तौद्वौ ॥) प्रतुदा। वापरिकोशाम्।
२ २ १ २, ३२ २, ३२ ऽ २ १
निषीदा। साददा। औहोइ। औहोइवा। नृभिः
२२ ७ २ १ २, ३२ २,
पुनानोअभिवा। जमा२र्षा। आर्षा। औहोइ।
३२ ऽ २ १ २ २ ७
औहोइवा। अश्वन्नत्वावाजिनम्मा। जया२इन्ताः।
१ २, ३२ २, ३२ ऽ २ १२२ १ २
यांता। औहोइ। औहोइवा। अछावर्हाइः। रश-
१२२ ३२ ५ ५ २ ११११
नाभिः। नये३४। ह्वियाऽहाउवा। ता२३४५इ ॥ ३० ॥

५२ ५ २ २ ५ ५ २ १
हाओ३ऽहा। उऊवा३४। ओ३ऽहा। प्रतुद्रवा।
२ २ ३४ ५ २१ २ १ २ १
परिकोइ। शन्निषीदा। नभाइःपुना। नोइअभि।
२, ३४५ २ १ २ १ २३४५
वाजमर्षा। अश्वन्नत्वा। वाइजिनम्। भर्जयन्ताः।
२ ५ ३ २ ५ ५ २१२ २ १
हाओ३ऽहा। उऊवा३४। ओ३ऽहा। अच्छावर्हाइः।
२१२ २ २ ४
रशना। भाइ४३इः। नाइया५०ताऽ५६इ ॥ ३१ ॥

४ ५ १ २
(त्रिष्टुवौशनम्॥) प्रातू। द्रवापरिकोशाम्।

२ २ १ २ १ २ १ २ ३ ४ ५
निषीदा। नृभाइःपुना। नोऽअभि। वाजमर्षा।

१ २ २ ७ २ १२ २ २
अश्वन्नत्वावाजिनम्मा। जयाऽ३°ताः। अक्षावर्हाइः।

२ १ २ २ १ ४
रशना। भाऽ४३इः। नाऽयाऽ°ताऽ५ऽ६इ॥ ३२॥ ५७

उशनाऋषिः*। हे सोम! "नु" क्षिप्रं + "प्रद्रव" प्रगच्छ आगत्यच "कोशं" द्रोणकलशं परिनिषीद" निषण्णोभव। "नृभिः" नेतृभिः "पुनानः" पूयमानः "वाजम्" अन्नं यजमानार्थ-मुद्दिश्य "अर्षसि" [वाजं सङ्ग्रामं वा] "वाजिन" बलवन्तं "अश्वं न" अश्वमिव तं यथामार्जयन्ति तद्वत् ताम् "अर्जयन्तः" शोधयन्तः "बर्हिः" यज्ञम् अच्छ "प्रतिरशनाभिः" रशनावदाय-ताभिरङ्गुलीभिः "नयन्ति" अध्वर्युप्रमुखाः॥ १॥ ५७

---

* "काव्यः"-इति ऋषि नै०।

† 'अच्छ आशुम्'-इति वि०। मन्त्रश्रुतौ 'अच्छा'-इति दीर्घो निपातत्वात् (६, ३, १३६ पा०।)

‡ 'रशना यूपयोजनी'-इति वि०।

¶ "नु-इत्येषोनेकक्रमा, इदन्नु करिष्यतीति क्षेपपदेशे, कथन्नु करिष्यतीत्यनुपृष्टे, नन्वेतदकार्षीदिति चाथाप्युपमार्थे भवति इत्तस्य नु ते पुरुहूतवयाः इत्तस्येव ते पुरुहूत शाखाः"-इत्यादि नि० १, ४। "नु"-इति क्षिप्रनामसु च प्रथमन्नैघण्टुकम् (२, १५)।

§ 'बर्हिः प्रवृद्धम्'-इति वि०।

‖ 'रशनाः'-इति अङ्गुलिनामसु षष्ठं नैघण्टुकम्।

अथ द्वितीया।

१ २र ३ १ २ ३ २ ३ २ ३ १ ३ १ २
प्रकाव्यमुशने वब्रुवाणोदेवो देवानांजनिमाविवक्ति।
१ २ ३ १ २ ३ २
मह्विव्रतःशुचिबन्धुःपावकः
३ १ २ ३ २ ३क १र ३ १ २
पदावराद्वोअभ्येतिरेभन् ॥ २ ॥ ५८*

४ऽ १र १
(वाजसनीद्वे ॥) प्रा। काविया२म्। उशनेवा२।
१ २ १र र १र १
ब्रुवा२३णाः। देवोदेवा२। नाञ्जनिमा२। विवा-
२ १ १ १ १
२३क्तो। मह्विव्राता२ः। शुचिबन्धू२ः। पवा२३काः।
१ र १र ३ २ ५र र ३
पदावारा२। द्वोअभियाइ२। तिरा३४औद्वोवा। भा
१ १ १ १
२३४५न्॥ ३३ ॥
१ र १ १ १र र
प्रकाविया२म्। उशनेवा२। ब्रुवाणा२ः। देवो
१र १ १
देवा२ः। नाञ्जनिमा२। विवाक्तो२। मह्विव्राता२ः।
१ १ १ र १ १
शुचिबन्धु२। पवाकाः२। पदावारा२। द्वो२।
२ २ ५र र २ १र ३ १ १ १ १
भियाइ३४औद्वोवा। तिरेभा२३४५न्॥ ३४ ॥

---

* उ० ४, २, १, १= ऋ० ७, ४, १२, २=जद्वे ६, २, ५;— १६, २, १९;— २१, १, ३—६।

(वाजजित्साम॥) प्रकाव्यमुशनेवब्रूइवाणो। देव-
३४वाः। देवानाच्छनिमावी३वाक्षी। मा३३४क्षी। व्रतः
प्रुचिवन्धुः पा३वाकः। पा२३४दा। वराद्दोअभ्येतिरा
२३। ह्वाउवा३। भा२३४५न्॥ ३५॥

(वाराहम्॥) ह्वाउह्वाउ। क्रुप्। प्रकावियाम्।
उशने। वब्रुवाणाः। देवोदेवा। ना३०जनि। मावि
वक्षी। मच्चित्रताः। प्रुचिवा३। धुःपवाकाः। ह्वाउ
ह्वाउ। क्रुप्। पदावरा। द्दो३अभि। आ३४३इ।
तीरा५इभा६५६न्॥ ३६॥

॥ इति पञ्चदशस्यार्द्धः प्रपाठकः॥

वृषगणो वासितऋषिः*। "उशने एव" तन्नामकऋषिरिव "काव्य" कविकर्म स्तोत्रं "ब्रुवाणः" "देवः" स्तोता†

---

* "वृषगणो वासिष्ठः"-इति ऋषि- नै०।

† 'देवः सोमः'-इति वि०।

अयमृषिर्वृषगणोनाम "देवानाम्" इन्द्रादीनां "जनिमा" जन्मानि* "प्रविवक्ति" प्रकर्षेण वदति। [वच परिभाषणे (अदा०प०)। व्यत्ययेन विकरणस्य श्लुः (३,१,८५) बहुलं छन्दसीति (७,४,७८) अभ्यासस्य इत्वम्] "महिव्रतः प्रभूतकर्मा"†। "शुचिबन्धुः" बध्नन्ति यत्र णिति बन्धूनि तेजांसि बलानि वा दीप्ततेजस्कः‡ "पावकः" पापानां शोधकः "वराहः" वरञ्च तद्दृश्य वराहः ["राजाहःसखि भ्यष्टच्"-इति टच् समासान्तः। तस्मिन्नहनि अभिषूयमाणत्वेन तदहान्। अर्शआदित्वान्मत्वर्थीयोऽच्] तादृशः¶ सोमः "रेभन्" शब्दं कुर्वन्§ "पदानि" स्थानानि पात्राणि "अभ्येति" अभिगच्छति। यद्वा। यदा कश्चन वराहः "पदा" पदेन भूमिं विक्रियमाणः शब्दं करोति तद्वत्॥ २॥ ५८

---

* 'जन्मानि कर्माणि वा'-इति वि०।

† 'महिव्रतः महतः कर्मणः अन्नस्य वा धारयिता' इति वि०।

‡ 'शुचिबन्धुः शोभनबन्धुः शुद्धबन्धुर्वा'-इति वि०।

¶ 'वराहः सोमः'-इति वि०। "वराहो मेघो भवति वराहारः। वरमाहार माहारयतीति च ब्राह्मणम्। विध्यद्वराहस्तिरोअद्रिमस्तेत्यपि निगमो भवति। अयमपीतरो वराह एतस्मादेव। दृहति मूलानि वरं वरं मूलदृहतीति वा। वराहमिन्द्र मुषमित्यपि निगमो भवति। अङ्गिरसोऽपि वराहा उच्यन्ते 'ब्रह्मणस्पति दृषभिर्वराहैः। अथाप्येते माध्यमिका देवगणा वराहव उच्यन्ते—'पश्यन् हिरण्यचक्रान्यो दंष्ट्रान् विधावतो वराहून्"-इति नि० ५, ४।

§ 'रेभन् स्तुवन्' इति वि०।

अथ तृतीया।

१ १र २र ३ १र ३र १ २ १ १र २र १ २
तिस्रोवाचईरयतिप्रवक्रिक्रीतस्यधीतिंब्रह्मणोमनीषाम्।
१ २ ३ १ २ ३ १ २ ३
गावोयन्तिगोपतिंपृच्छमानाः
१ २३ १ ३ २
सोमंयन्तिमतयोवावशानाः॥ ३॥ ५९*

(संक्रोशाख्यः॥) १ २ १
हेाइ। हेा। हा३हेाइ।
२१र र २ १ २३४५ १ १
तिस्रोवाचा। ई३रय। तिप्रवक्रीः। हेाइया२३हेाइ।
२१र र २ १ २३४५ २र १ १
तिस्रेवाचाः। ई३रय। तिप्रवक्रीः। आ। हेाइया२३हेाइ।
२१र र २ १ २३४५ १ २१
तिस्रेवाचाः। ई३रय। तिप्रवक्रीः। हेाइहा। इहेाइहा।
ऽ २ २१र र २ १ २३४५
औ३हेा३१इ। इहा। तिस्रेवाचाः। ई३रय। तिप्रवक्रीः।
१ २१ ऽ २ २१र र
हेाइया। इयेाइया। औ३हेा३१इ। इया। तिस्रेवाचाः।
२ १ २३४५
ई३रय। तिप्रवक्रीः॥ १॥

(वेणोर्विशाले द्वे॥) ३ २ ३५ २र १
इहेाइह। इहेाइहा३हेा।
३र २ ३५ २ १र र ० १ २३४५ ४र
वाहेाइह। तिस्रेवाचाः। ई३रय। तिपवक्रीः। इहेा

---

* उ० २, २, १०, १=ऋ० ७, ४, १७, ४=जहे २, १, १७=जक्षे ३, २, ६।

२ १ २ ५ ४ ४
वाप्। इहोवा२३। ई३४हहाइ। ई५। इहा।

२१२ २ १ २ ३ ४ ५ २ १
तिस्रोवाचाः। ई३रय। तिप्रवक्षीः। इहोवा२३।

२ ५ ४ २१२ २ १ २ ३
ई३४हहाइ। इहा। तिस्रोवाचाः। ई३४रय। तिप्र-

४ ५ १ २ २ १ २ २ ५२ २
वक्षीः। आआऔ३हो। आआऔ३हो३४। औहोवा।

२ २ १२ २ २ १ २३४५ १
हाइहाइ। तिस्रोवाचाः। ई३रय। तिप्रवक्षीः। आ।

२ २ २ ३२ ४२ ५ २१२ २ २
औ३होवाहा३४। औहोवा। तिस्रोवाचाः। ई३

१ २३४५
रय। तिप्रवक्षीः॥ २॥

२२ २ ४ ५ ४ २ २ १ २ १
ओहो३। ओहाओहा। कतस्यधाइ। तौ३०ब्रह्म।

२ ३ ४ ५ १ २ १ २ ३२ २ १ १२ १२
णामनीषाम्। हहहोइ। हहहाहहो३। गावोयन्ताइ।

२ १ २ ३ ४ ५ १ २ १ २ ३२ २ १
गो३पतिम्। पृच्छमानाः। इहहोइ। इहहाहहोइ।

२२ १ २ १ २ २ ४
सोमंयन्ताइ। मतयः। वा३४३। वा३शा५ना६५६ः॥

॥ ३ ॥ ५९

पराशरऋषिः*। "वक्रिः" वोढा यजमानः "तिस्रो वाचः" ऋग्यजुःसामात्मिकाः स्तुतीः प्रेरयति। तथा "ऋतस्य" यज्ञस्य "धीतिं" धारयित्रीं† "ब्रह्मणः"‡ परिवृढस्य सोमस्य "मनीषां" मनस ईशित्रीं कल्याण-वाचं च प्रेरयति। किञ्च। "गोपतिं"¶ वृषभं यथा गावोऽभिगच्छन्ति तद्वत् गवां स्वामिनं सोमं "गावः" "पृच्छमानाः" पृच्छन्त्यः सत्यो "यन्ति" स्व-पयसा माप्यायितु मभिगच्छन्ति। तथा "वावशानाः" कामयमानाः "मतयः" स्तोतारः§ "सोमं" "यन्ति" स्तोतु मभिगच्छन्ति॥ ॥ ३ ॥ ५९

---

* "ऋत्य"-इति ऋषि-नै०। "पराशरः पराशीर्णेषु वसिष्ठस्य स्थविरेषु जज्ञे। पराशरः शतयातुर्वसिष्ठ इत्यपि निगमो भवति। इन्द्रोऽपि पराशर उच्यते पराशातयिता यातूनाम् इन्द्रो यातूना मभवत् पराशर इत्यपि निगमो भवति"-इति नि० नै० ६,३०॥

† 'धीतिं कर्म'-इति वि०।

‡ 'ब्रह्मणो मनीषां वेदोक्तानि कर्माणि'-इति वि०।

¶ 'गोपतिं यजमानं दक्षिणासम्बन्धेन पृच्छमाना इव, वृषभं वा' इति वि०।

§ मतय इति स्तोतृनामसु न दृश्यते परं मेधावि-नामसु द्वाविंशतितमत्वेन घण्टुकै-र्निगदि लक्ष्यते (३,१५)। 'मतयः बुद्धयः'-इति वि०।

॥ यास्कव्याख्यानन्त्वित्थम्—"वक्रिरादित्यो भवति स तिस्रो वाचः प्रेरयत्यृचो यजूंषि सामान्येतस्यादित्यस्य कर्माणि ब्रह्मणो मतान्येष एवैतत् सर्वमचरमधीत्यधिदैवतम् अथाध्यात्मं वक्रिरात्मा भवति स तिस्रो वाच ईरयति प्रेरयति विद्यामतिबुद्धिमतो ऋतस्यात्मनः कर्माणि ब्रह्मणो मतान्ययमेवैतत् सर्वमनुभवत्यात्मगति माचष्टे"-इति (प० २,१४)॥ विवरणकारस्तु पूर्वं यथावत् व्याख्यायानन्तरमपरमपि व्याख्यानजालमा-विश्चक्रवान्। तथा—"यद्यपि पावमानीषु सोममुक्त्वा अन्या देवता न सम्भवति तथा-प्यष्टादशे व्याख्यातेति ज्ञात्वा तेनापि आत्मनानुस्मरणार्थं मालिख्यत। तिस्रो वाचः। ऋग्यजुःसामानि अथवा तिस्रो वाचः सत्वरजस्तमांसि अथवा जाग्रत्स्वप्नसुषुप्ति-वृत्तयः। ईरयति प्रेरयति उदकरश्मींश्च वहतीति वक्रिरादित्यः। ऋतस्य आदित्यस्य

अथ चतुर्थी।

३ २ ३२ ३१२ ३१२ ३ २३२ ३ १२ ३१२
अस्यप्रेषा हेमनापूयमानोदेवोदेवेभिःसमपृक्तरसम्।
३ १ ३२ ३१२ ३१२ ३२३१२ ३ २ ३१ २
सुतःपवित्रमत्येतिरेभन्मितेव सद्मपशुमन्तिहोता॥४॥६०॥*

३ १ ३र ४र ५ १र २
(अगस्त्यस्य यमिकेद्वे॥) अस्या३४औहोवा। प्रेषा। हेइ
१ र २ ३ ४ ५ ३ २ ४ २ ३र ४र ५
मना। पूयमानाः। उक्थाइ। अस्या३४औहोवा।
१र २ १ र २ ३ ४ ५ २
प्रेषा। हेइमना। पूयमानाः। हाइ। उक्थावा।
३र२ ३र४र५ १र २ १ २ ३ ४ ५
देवा३४औहोवा। देवाइ। भीइःसम। पृक्तरसाम्।

धीतिः। अथवा ऋतस्य सत्यस्य ब्रह्मणः। अथवा ऋतस्य धीति यज्ञस्य वा आदित्यस्य वा हव इव 'अग्नौ प्राप्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते'। 'ब्रह्मणो मनीषां गावः रश्मयः तेन विसृष्टा अथवा उदकानि। एतमेव गोपतिं रश्मि-स्वामिनं वा पृच्छन्त इव सोमं यन्ति पृथिवीं वसाना सर्वोपकाराय सोमं आदित्यं मतयः। प्रज्ञायते विषयाः अतिप्रकाशत इति रश्मयः। वावशाना आदित्यं यन्ति प्रविशन्ति। अध्यात्मं वह्निरात्मा भवति। वश्यादिगुणसंयोगात्। सः तिस्रो वाचः प्रेरयति। विद्या बुद्धिमनांसि। विद्या महान्। बुद्धिरहङ्कारं मनइति प्राधान्याद् भूतेन्द्रियाणि ऋतस्यात्मनः धीतिं मनसः इष्टानि कर्माणि प्रेरयन्ति ब्रह्मणः आत्मनः। गोपाः गोपायति। आत्मानं इन्द्रियाणि स्वामिनं पृच्छमानाः। आत्मानं तदभिप्रायेण शब्दाद्यनुगमनात्। एतमेवमात्मानं सोमङ्कामयमाना इव यन्ति न भयः तटर्थं प्रादुर्भवन्ति'-इति।

* ऋ० ६, २, ८, १ = ऋ० ७, ४, ११, १ = ऊह६'२। ७,

२ १ २ २ ३र ४र ५ १ २ १
हाउ। हो३इ। सुता३४औहोवा। पवाइ। चाऽम्परि।
२ ३ ४ ५ २ र १ ३ २ ३र ४र ५ १
एतिरेभान्। हा। हाऔहोइ। मिता३४औहोवा। वसा।
२ १ २ ३ ४ ५ १ २ २ ४
ह्माऽपशू। मन्तिहोता। पशू। मा३४३। तीऽहोपू
ताई५६ ॥ ४ ॥

१र २र ३र २ १ ३ २ १ र १ २र
औहोवाहाऽहोइ। इहा। अस्यप्रेषा। हेऽमना।
२ ३ ४ ५ २र १र र २ १ २ ३ ४ ५
पूयमानाः। देवोदेवाइ। भीऽःसम। पृक्तरसाम्।
२ १ २ १ २ ३ ४ ५ १र २र ३र २
सुतःपवाइ। चाऽम्परि। एतिरेभान्। औहोवाहा-
१ ३ २ १र २ १ २
ऽहोइ। इहा। मितेवसा। ह्माऽपशू। मा३४३।
२ ४
तीऽहोपूताई५६ ॥ ५ ॥ ६०

वसिष्ठऋषिः*। "अस्य" सोमस्य "प्रेषा" [प्रेषतिर्गत्यर्थः (भ्वा०प०) क्विपि रूपं। सावेकाच इति विभक्तेरुदात्तत्वं† प्रेषा] प्रेरकेण‡ "हेमना"¶ हिरण्येन "पूयमानः" हिरण्य-

* "मैत्रावरुणः"-इति ऋषि-नै०।

† "सावेकाचस्तृतीयादिर्विभक्तिः"-इति पा० ६, १, १६८।

‡ 'प्रेषा प्रकर्षेच्छया'—इति वि०।

¶ बाऽलुकादलोपाभावः।

अथ पञ्चमी।

१ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ६ २
सोमःपवतेजनितामतीनाञ्जनितादिवोजनितापृथिव्याः।

७ १र २र ३ १र २र ३ १ २ ३ १र २र
जनिताग्नेर्जनितासूर्यस्यजनितेन्द्रस्यजनितोतविष्णोः॥ ५॥ ६१*

२र र र १
(कालकाक्रन्दौ॥) सोमःपवतेजनितामाऽताइनाऽरम्।

र र र १ १र र र
जनितादिवोजनितापृऽथाइव्याऽरः। जनिताग्नेर्जनितासू।

पाणिरभिषुणोतीति हिरण्यसम्बन्धः। तादृशः "देवो" दीप्यमानः अंशुः "रसम्" आत्मीयं "देवेभिः" देवैः सह† "समपृक्त" सम्पर्कयति संयोजयति। [पृची सम्पर्के (अदा० आ०] ततः "सुतः" अभिषुतः सोमः "रेभन्" शब्दायमानः सन् "पवित्रम्" उर्णास्त्रुकेन निर्म्मितं‡ "पर्येति" परिगच्छति। कथमिव? "होता" देवाना माह्वाता¶ ऋत्विक् "मितेव" निर्म्मातेव§ "पशुमन्ति" बह्वपशून् "सद्म" सदनानि यज्ञगृहान् यथा पर्येति तद्वत्॥ ४॥ ६०

---

* उ० ३, १, १९, १ = ऋ० ७, ४, ६, ५ = जदे ३, २, १९;—८, २, १;—१२, १, १०—१६।

† 'देवेभिः देवेभ्यः वसादिभ्यः'-इति वि०।

‡ दशापवित्रमित्यर्थः।

¶ होतेति ह्वेञोरूपम् (६, १, ३४ पा०)।

§ 'मिता कर्त्ता' इति वि०।

७ २ १र २ १ २ २
रियाऽ२स्या। जनितेन्द्रा। स्याऽजनि। तोऽ४३। ताऽ२
४
वाऽ५इष्णेऽ६५६ः॥ ६॥

३ ४ ५ र र २ २ ४ १
सोमःपवतेजनिता। एऽ। औऽहोऽ५वाऽ। माता
२ १र २१र २१र २ १र
२३४५इनाऽ६५६म्। जनितादिवोजनितापृथिव्याः। जना-
३ ५ २ र २ ४
ऽ१इताऽ२३४ग्नेः। जनिता। सूऽ४३। रीऽयाऽ५स्याऽ६५६।
२ १र २ १र ३ १ १ १ १
जनितेन्द्रस्यजनितोतविष्णोऽ२३४५ः॥ ७॥

५र ४ ४ ५
(जनिञे द्वे॥) हाउजनन्। ३। जनद्धाउ। ३।
१ १ २र १ २
होइ। जनत्। २। होइ। जनात्। सोमःपवा। तेऽ
१ २ ३ ४ ५ २ १र २ १ २ ३
जनि। तासतीनाम्। जनिताद्दाइ। वोऽजनि। तापृ
५ ५ २ १र २ १ र २ ३ ४ ५ ५र
थिव्याः। जनिताग्नाइः। जनिता। सूरियस्या। हाउ
४ ४ ५ १
जनत्। ३। जनद्धाउ। ३। होइ। जनत्। २। होइ।
१र २ २ २ ४
जनात्। जनितेन्द्रा। स्याऽजनि। तोऽ४३। ताऽवा।
५इष्णेऽ६५६ः॥ ८॥

४ ५ ४ ५ १
जनद्वाउ। ३। जनदाउ। ३। जनत्। होइ। ३।
२र १ २ १ २ ३ ४ ५ २ १र
सोमःपवा। तेऽजनि। तामतीनाम्। जनिताद्दाइ।
२ १ २ ३ ४ ५ २ १र २१र २ ३ ४ ५
वोऽजनि। तापृथिव्याः। जनिताग्नाइ। जनितासूरियस्या।
४ ५ ४ ५ १ र २
जनद्वाउ। ३। जनदाउ। ३। जनत्। होयि। ३। जनि-
१ र २ १ २ २ ४
तेन्द्रा। स्याऽजनि। तोऽ३३। ताऽवापृयिष्णोऽ५६ः

॥ ९ ॥ ६१

प्रतर्दनऋषिः*। "सोमः" अभिषूयमाणः "पवते" पात्रेषु क्षरति। कीदृशः? "मतीनां" बुद्धीनां। यद्वा। मननीयानां स्तुतीनां "जनिता" जनयिता† ["जनिता मन्त्रे" (६,४,५३) इति निपातेन णि-लोपः] किञ्च "दिवः" द्युलोकस्य "जनिता" प्रादुर्भावयिता। तथा "पृथिव्याः जनिता"। "अग्नेः" "जनिता"

---

* "दैवोदासिः"-इति वि०।

† अयमेवं विवरणम्—'सोमः पवते। विनियोगोऽस्य चतुर्थेऽहनि। अधियज्ञपक्षे पर्वसोमस्य पृथिव्यादीनां। जनयितृत्वेन सम्भवात्। यज्ञद्वारेण स्थितिहेतुत्वात् जनयतीति जनिता मतीनां जनयिता दिवः जनयितात्रे जनयिता सूर्यस्य जनयिता। इन्द्रस्य जनयिता। उत अपि विष्णोर्व्याप्नुमतश्च। जनयिता पृथिव्यादिभ्यः रसेन वर्द्धयिता। अधिदैवेनेन्द्रः सोमः यदात्मनि तदायमर्थः। सर्वमिदं अयति। आत्मा सोमः पवते साधयति भोक्तृत्वात्। आत्मा सत्कारणं वा। प्रधानभूतेन्द्रियाणां जनयिता पृथिव्यादीनाञ्च द्यौर्हेतुनाम्निच्यापि अन्नादीनाञ्च स्थानानां तिसृणां विष्णोश्च व्याप्नुमतः॥"

अथ षष्ठी।

३१ २ ६१र २र ३ १ २ ३ १ २ ३ १ २
अभिचिपृष्ठंवृषणंवयोधामङ्गोषिणंमवावशन्तवाणीः।
३१२ ३ १ २ ३ २उ ३ १ २ ३ १ २ ३१ २
वनावसानोवरुणोनसिन्धुर्विरत्नधादयतेवार्याणि ॥ ६॥६२॥*†

(अङ्गिरसां व्रतोपोहः॥) २ १ ऽ २ ७र २
ओ३ह्वायि। ओ३ह्वा। ओहा।
१ ऽ २ २ १ २ १ २३
इया२। ओ३ह्वाइ३ए। अभिचिपा। ष्ठा३०वृष। णंव-
४ ५ २ १र २ १र २ ३ ४ ५
योधाम्। अङ्गोषिणाम्। अवाव। शन्तवाणीः।
२ १र २ १ ० ३ ४ ५ २ १ १ २
वनावसा। नोऽवरुणोनसिन्धूः। ओ३ह्वायि। ओ३-
ऽर २ १ ऽर २ २ १
ह्वा। ओहा। इया२। ओ३ह्वाइ३ए। विरत्नधाः।
२ १ र २ २ ४ ५
दयते। वा३४३। रो३याषुणा६५६यि॥ १०॥ ६२

प्रकाशयिता। 'सूर्य्यस्य' सर्व्वप्रेरकस्यादित्यस्य "जनिता" "इन्द्रस्य" जनिता पानेन मदस्य जनयिता। "उत" अपि च। "विष्णोः" व्यापकस्य "जनिता" जनयिता¶। एतत्सर्वं सोमेऽभिषूयमाणे भवति सोमेन हि देवताप्यायन्तइति॥ ५॥ ६१

---

* "आङ्गूषाणाम्"-इति,
† "सिन्धून्"-इति च
} ऋ०।

‡ उ० ६, २, ११, १=ऋ० ७, ३, २६, २ = ऋचे ७, २, १७।

¶ अवाच्च याज्ञः—"सोमः पवते सोमः सूर्यः प्रसवनाज्जनिता मतीनां प्रकाशकर्मणा सादित्यरश्मीनां दिवो द्योतनकर्मणा सादित्यरश्मीनां पृथिव्याः प्रथनकर्मणा

अथ सप्तमी।

१ २ ३१ २ ३१२ २२ ३ १ ३ ३१२ २२ १ २

अक्रांत्समुद्रःप्रथमेविधर्म्ज्जनयन्प्रजाभुवनस्यगोपाः*।

वसिष्ठऋषिः†। "त्रिपृष्ठं" त्रीणि पृष्ठानि द्रोणकलशादिस्थानानि सवनानि वा यस्य स तथोक्तस्तम्। "वृषणं" वर्षकम्। "वयोधाम्" अन्नस्य दातारम्‡। "अङ्क्तोषिणं" आघोषयन्तं सोमं¶ "वाणीः" स्तोत्ररूपा वाचः "अवावशन्त" कामयन्ते शब्दायन्ते वा। "वना" वनानि उदकानि "वमानः"। आच्छादयत् "वरुणो न" वरुण इव§ "सिन्धुः" अपां स्यन्दयिता पर्यन्तप्रदेशानाच्छादयति तद्वत्। "रत्नधाः" रत्नानां दाता सोमः "वार्याणि" धनानि‖ "दयते" स्तोतृभ्यः प्रयच्छति॥ ६ ॥ ६२

त्मादित्यरश्मीनां, सूर्यस्य स्वीकरणकर्मणात्मादित्यरश्मीनां, विष्णोर्व्याप्तिकर्मणा त्मादित्यरश्मीनामित्यधिदैवतम्। अथाध्यात्मं सोम आत्माप्येतस्मादेवेन्द्रियाणां जनितेत्यर्थः। अपिवा सर्वाभिर्विभूतिभिर्विभूतत आत्मेत्यात्मगतिं माचष्टे"—इति प० २, १२।

* "भुवनस्यराजा"—इति ऋ०।

† "मैत्रावरुणः"—इति ऋषि नै०।

‡ "सुतः", "सुतं", "वयः"-इति त्रीण्यपि पदानि पाठभेदात् सप्तमनैषङ्गकलेन अश्नते (२, ७)। 'वयोधा मन्नानां धातारं यज्ञस्य वा'—इति वि०।

¶ "आङ्पूर्वस्योषतेरोषः "एनाङ्क्तोषेण वयमिन्द्रवन्तः" अनेन सोमेन वयमिन्द्रवन्तः"—इत्यादि नि० ५, ११।

§ "वरुणः वृणोतीति सतः"—इत्यादि नि० १०, ३—४।

‖ 'वार्याणि वरणीयानि धनानि'—इति वि०।

१ २ ३ २ ३ २ ३ २ ३ १ २३१२ २२ ३ १२
वृषापवित्रेअधिसानोअव्येवृहत्सोमोवावृधेस्वानो*-
२२
अद्रिः ॥ ७ ॥६३॥†

२ १ १ २२ १ २ १२ २ १
(सम्यावैयश्वम् ॥)हो। होपि। अक्रांत्समुद्रःप्रथमेविधामान्।
१ २ १ २ १ २ २ १ १ १ २
होहोयि। जनयन्प्रजाभुवनस्यगोपाः। हो। होयि वृ
२२ १ २२ १ २ १२ २ ३ १ २ १
षापवित्रेअधिसानो१२अ। व्यायि। हो। हो। वृह
२ २ ७ २ २ २ १२ २ २ २ २
त्सोमो२वावृधेस्वानो३अ। द्रा। औ३। होवाहाउवा
२ २२ १२ १ १ १ १
३। ए३। स्वानाअ। द्रीर२३४५ः ॥ ११ ॥ ६३

पराशरऋषिः‡। "समुद्रः" अस्मादापः सन्द्रवन्ति स समुद्रः अपां वर्षकः। "गोपाः" यज्ञस्य रक्षकः सोमः "प्रथमे" विस्तृते "भुवनस्य" उदकस्य¶ "विधर्म्मन्" विधारकेऽन्तरिक्षे "प्रजाः" "जनयन्" उत्पादयन्"अक्रान्"सर्व्वमतिक्रामति[क्रमते-र्लुङि, तिपि, दृड़भावे हल्ङो च क्ङतायां सिज्लोपे मकारस्य

---

* "स्वान"—इति ऋ०।

† उ० ५, २, १, १=ऋ० ७, ४, १८, प= ऊचे १७, २, १;—२३, २, ५—८—९; ऊचे६, २, ५।

‡ "ग्राक्षाः"—इति ऋषि-नै०।

¶ "भुवनम्"-इति उदकनामसु पद्याग्रन्थं नैघण्टुकम् (१,१२)।

अथाष्टमी।

१ २ ३ २ ३ २ ३ १ २ ३ २ १ २ ३ १ १ २ ३ १ २ ३ २

कनिक्रन्तिहरिरा॒ह्यमानःसीद॒न्वनस्यजठरेपुनानः।

१ २ ३ १ ३ ३ २ ३ १ २ ३ १ २

नृभिर्यतःकृ॒णुतेनिर्णिजं॒गामतोमतिञ्जनयतस्वधाभिः॥८॥६४ *

मोनोधातोरिति नकारे रूपम्] "हृषा" कामानां वर्षिता "खानः" अभिषूयमाणः† ॥

"अद्रिः"-"इन्द्रः" इति च साम्नऋचः पाठौ ॥ ७ ॥ ६३

---

* ऋ० ७, ५, ५, १।

† अवेदं विवरणम्—

अक्रान् समुद्रः विनियोगोऽस्य नवमेऽहनि क्रान्तत्वात् प्रथमे परमे उत्तरे विधर्मणि धारणेन नयन् प्रजाः प्रजायन्त इति प्रजाः देवाः याः भुवनस्य गोपाः भूतानां रक्षिता हृषा सक्ता पवित्रे वा स्वमाय। अधि उपरि खानो समुत्थन्नो अव्ये अविमये। बृहत् सोम वावृधे वर्द्धते खानः अद्रिः अदरणः। यज्ञः अक्रान् समुद्रः सामर्थ्यात् अत्यक्रामीत् अतीतं गच्छत्युदयादस्तं सदा समुद्रः। आदित्यः प्रथमे प्रकृष्टे व्योमन् सामर्थ्यादन्तरिक्षे प्रजा जनयन् वर्षकर्मणा। भुवनस्य चैलोक्यस्य गोपा रक्षिता हृषा वर्षणशीलः। पवित्रे वायुमये अधिसानः अभिषिच्यमाणः सोम्यैः। वावृधे वर्द्धते बृहदिति बृहद्विशेषणम्। खानः सुतः अद्रिरादित्य अदरणः अत्यक्रामत् अधिष्ठितवान्। समुद्रः आत्मा अभिद्रवत् तं भूतानि परमेभ्यः घने भूतेन्द्रियमिश्रशरीरे जनयन् ज्ञानकर्मणा बोधं मुत्पादयन् प्रजा वर्द्धयन्। भुवनस्य गोप्ता प्रकाशरूपत्वात्। वृषा पवित्रे सत्यमये आत्मा वर्षिता भवति शरीररूपेण पवित्रे ज्ञानमये अवतेर्गत्यर्थः। गत्यर्थास्तु बुद्ध्यर्थाः। अधिसानो सम्बध्यमान-शब्दादिषु महत्तत्त्वे सुष्ठु वर्धितं पवित्रे। प्रवः अद्रिः अदरणः"—इति॥

यास्कस्त्वेवं व्याख्यातवान्—"अत्यक्रामीत् समुद्र आदित्यः परमे व्यवने वर्षकर्मणा जनयन् प्रजा भुवनस्य राजा सर्वस्य राजा। वृषा पवित्रे अधिसानो अव्ये बृहत्सोमो वावृधे सुषान इन्दुरित्यधिदैवतम्। अथाध्यात्ममत्यक्रामीत् समुद्र आत्मा परमे व्यवने ज्ञानकर्मणा जनयन् प्रजा भुवनस्य राजा सर्वस्य राजा। हृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे सुषान इन्दुरित्यात्मगतिमाचष्टे"—इति प० २,१६।

(सामसामनि द्वे॥) कानी। क्रान्तो२क्रान्तो२। हरिराह्रज्य-
मा२३नाः। साधिदान्। वाना२वाना२। स्वजठरेपुना२३-
नाः। द्रभीः। याता२याता२ः। क्षणुतेनिरिर्णिजा२३-
गाम्। आताः। माती२म्माती२म्। जनयता२३स्वा२न्धा
२३४ओहावा। भो२३४युः॥ १२॥
कनिक्रन्तिचा। होयि। हरिराह्रज्य। मा२३४ना।
हाहोयि। सोदन्वनस्यजठरेपुना२३नाः। हाहोयि। नृभि
र्यतःकुण्डतेनिर्णिजा२३ङ्गाम्। हाहोयि। अतोमतायिम्
जनयता२३। स्वा२धा२३४ओहावा। भो२३४युः॥१३॥६४

प्रस्कण्वऋषिः*। "ह्रज्यमानः" आ समन्तादिह्रज्यमानो-ऽभिषूयमाणः† "हरिः" हरितवर्णः सोमः "कनिक्रन्ति" पुनः पुनः शब्दायते [क्रन्दतेर्यङ्लुकि, तिपि, इडभावे, "दाधर्त्तिदर्धर्ती त्यादिना‡ निपातनाद्भ्यासस्य निगागमः। अभ्यस्तस्वरः¶]

* "कण्वः"-इति ऋषि-नै०।

† 'सूयमानः संसूयमानः'-इति वि०।

‡ "दाधर्त्तिदर्द्धर्तिदर्द्धर्षिबोभूतुतेतिक्ते ऽलर्ष्यापनीफणत्संनिष्यदत्कनिक्रत् कनिक्रदद्भरिभद्धरिभ्रतोदविद्युतत्तरित्रतःसरीसृपतं वरीवृजन्मर्मृज्यागनीगन्तीति च" —इति पा० ७, ४, ६५।

¶ "अभ्यस्तानामादिः"-इति पा० ६, १, १८९।

अथ नवमी।

३ २उ ३ १ २ ३ २ ३ १३२ ३ १ २ ३ १ २
एषस्यतेमधुमाꣳइन्द्रसोमोवृषावृष्णःपरिपवित्रेअक्षाः।
३ १ २ ३ १ २ ३ १ २ ३ २ ३ उ ३क २र
सहस्रदाःशतदाभूरिदावाशश्वत्तमम्बर्हिरावाज्यस्यात्॥८॥६५*
४ ५ ४ ५ ३ २ ४ ५ र ४र ५
(ऐषम्॥) एषाएषाः। स्यता३१२३४यि। मधुमाꣳइन्द्रसोमः।
र ३ २ ५ ४ ५र र
वृषावृषा६ए। वृष्णो३१२३४ः। परिवित्रेअक्षाः। सहस्रा
५ ३ २ ५ ४र ५ ४र ५र ५
६ए। सदा३१२३४ः। शतदाभूरिदावा। शश्वच्छश्वा६दे।
१ २ र ५र ४ ५ ५ ५
तमा३१२३४म्। बर्हिरावाजिपे। दिया६हाउवा स्या२
१ १ १ १
२३४५त्॥ १४॥ ६५

तथा "पुनानः" पूयमानः "वनस्य" वननीयस्य चास्य द्रोण-कल-शस्य "जठरे" "सीदन्" उपविशन् शब्दायते। किञ्च "नृभिः" कर्मनेतृभिर्ऋत्विग्भिः "यतः" संयतः सोमः "गाः" गो-विकारान् क्षीरादीन् आच्छादयन् "निर्णिजं" शुद्धम् आत्मनोरूपं† "क्षणुते" ग्रहादिषु करोति। अतोऽस्मै सोमाय "मतिं" मननीयां स्तुतिं "स्वधाभिः" हविर्भिः सह "जनयत" स्तोतारोऽजनयन् [ऋस्यान्तादेशाभावः छान्दसः। अदादेशः] यद्वा हे स्तोतारः अस्मै सोमाय स्तुतिं जनयत उत्पादयत कुरुतेति यावत्॥ ८॥ ६५

* ऋ० ७, ३, २९, ४।
† "निर्णिक्"-इति रूपनामसु प्रथमं निघण्टुषु कम् (२, ७)।

अथ दशमौ।

१२ ३१२ ३२ ३१२ २२३ १ ३२ ३ १ २
पवस्वसोममधुमाँ ऋतावापोवसानोअधिसानोअव्ये ।

३१ २ ३१२ ३११ ३१२३
अवद्रोणानिघृतवन्ति*रोहमदिन्तमोमत्सरइन्द्र-

१ २
पानः ॥ १० ॥ ६६†

॥ इति चतुर्थ-दशति ॥ ४ ॥

उशनाऋषिः‡। हे इन्द्र! "वृषणः" वर्षकस्य "ते" तुभ्यं [चतुर्थ्यर्थे षष्ठी¶] "एषः" "स्यः§" स सोमः "मधुमान्" माधुर्योपेतः "वृषा" वर्षकः "पवित्रे" "पर्यक्षाः" पर्यस्रवत् [चरतेर्लुङि रूपम्] स एव "सहस्रदाः" सहस्रसङ्ख्याकस्य धनस्य दाता "शतदाः" शतसङ्ख्याकस्य दाता "भूरिदावा"॥ ततोऽपि भूरेर्दाता 'वाजी' बलवान् सोमः "शश्वत्तमम्" अतिशयेन पुराणं "बर्हिः" यज्ञम् "अस्थात्" अधितिष्ठति ॥

"वृषा वृष्णः"-"वृषा वृष्ण"—इति, "सहस्रसाः"-"शतसाः" इति च साम्नऋचः पाठाः ॥ ८ ॥ ६५॥

---

* "घृतवान्ति"—इति ऋ०।

† ऋ० ७, ४, ८, ३।

‡ "काव्यः"—इति ऋषि-नै०।

¶ "षष्ठ्यर्थे चतुर्थीति वाच्यम् (२, ३, ६२)"—इति कात्यायनवचनादित्यर्थः।

§ "स्यश्छन्दसि बहुलम् (पा० ६, १, १३२)"-इतीह मन्त्रे स्य इत्यस्य सोर्लोपः।

॥ "आतोमनिप्क्वनिब्वनिपश्च (पा० ३, २, ७४)"—इति वनिपि रूपम्।

२ ३ ५ ३ २
(माधुच्छन्दसम्॥) हाओ२३४हाइ। इहा३१।
२१ २ १ २ ३ ४ ५ २ १ २
पवस्वसो। मा३मधु। माऽऋतावा। अपोवसा।
२ १ २ ३ २ ४ ५ २ १ २ १
नो३अधि। सानोअव्याइ। अवद्रोणा। नी३घृत।
२ ३ ४ २ २ ३ ५ ३ २ २ १
वन्तिरोहा। हाओ२३४हाइ। इहा३१। मदिन्तमो।
२ १ २ २ ४
मत्सरः। आ३४३इ। द्रा३पाऽनाई५ऽईः॥ १५॥ ६६

प्रतर्दनऋषिः*। हे "सोम!" "मधुमान्" [मत्वर्थीयः] तादृशस्त्वं "अपः" वसतीवरीः एकधनाः "वसानः" आच्छादयन् "अधि" अधिकं "सानौ" समुच्छ्रिते "अव्ये" अविभवे-पवित्रे "पवस्व" चर। ततः "मदिन्तमः" अतिशयेन मदकरः "इन्द्रपानः" इन्द्रेण पातव्यः "मत्सरः" मादयिता सोमः "घृत-वन्ति" उदकवतः† "द्रोणानि" द्रोणकलशान् "अवरोह" प्रादुर्भवसि॥

"रोद"-"सीद"—इति पाठौ॥ १०॥ ६६

इति श्रीमत्सायणार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे
छन्दोव्याख्याने पञ्चमस्याध्यायस्य षष्ठः खण्डः॥ ६॥

---

* "दैवोदासिः"—इति ऋषि-नै०।

† "घृतम्"—इत्युदकनामसु दशमं नैघण्टुकम् (१, २)।

अथ सप्तमे खण्डे--

सैषा प्रथमा।

१२३२र ३२३१२ ३१२३१२ २१२
प्रसेनानीःशूरोअग्नेरथानाङ्गव्यन्नेतिहर्षतेअस्यसेना।
३२ २१२ २१र २र३२उ ३१२ ३१२
भद्रान्क्रण्वन्निन्द्रहवांत्सखिभ्यआसोमोवस्त्वारभसानि-

दृप्ते ॥ १ ॥ ६७*

३ ५ ३ ५
(कुत्सस्याधिरथीयानि त्रीणि ॥) हो४वा। उङ्गवा
४ ५ २१र२र१ र र २ २, ३४
३। होवा। प्रसेनानाइः। शूरोआइ। शाइरथा
५ २१२र१ २ २३४५ २१र
नाम्। गव्यन्नेताइ। हर्षताइ। अस्यसेना। भद्रा
१ १ २ २, ३ ४ ५ २र१र२र १
न्क्रण्वान्। इन्द्रहाइ। वांत्सखिभ्याः। आसोमोवा।
२ १ २र १ ४ ५ ३ ५ ३ २ ४
स्त्वाइरभ। सानिदृप्ताइ। हो४वा। उङ्गवाइ। हो
५ ५
वाइ। हाउवा ॥ १६ ॥
५र४ २, १११ २१र२र१ र र २ २,
औहोइवा३४५। प्रसेनानाइः। शूरोआइ। शोइ
१४ ५ २१२र१ २ १२४५
रथानाम्। गव्यन्नेताइ। हर्षताइ। अस्यसेना।
२१र २ १ २ २, ३४ ५ र ४
भद्रान्क्रण्वान्। इन्द्रहाइ। वांत्सखिभ्याः। औहोइ

* ऋ० ७, ४, ६, १।

२ १११ २र १र २र १ २ १ १ २
वा३४५। आसोमोवा। स्ला३रभ। सा३४३। नौ३

४
दा५ऊत्ताई५६इ ॥ १७ ॥

५र४ २ १११ ३र३र१ र र २ २
औहो३वा३४५। प्रसेनानाइः। शूरोआ३। ग्राइ

३ ५ ५ ३ २र१ २ २ ३ ४ ५
रथानाम्। गव्यन्नेताइ। हर्षता३इ। अस्यसेना।

३ र २ १ १ २ ३ ४ ५ र ४ २
भद्रान्क्रण्वान्। इन्द्रहा३। वांत्सखिभ्याः। औहो३वा

१११ ३र र २र १ २ १ १ २ ४
३४५। आसोमोवा। स्ला३रभ। सा३४३। नौ३दा५।

१ १ १ १
ता२३४५इ ॥ १८ ॥ ६७

प्रतर्दनऋषिः*। "सेनानीः" सेनाना मध्ये नेता। "शूरः" शत्रूणां बाधकः "सोमः" "गव्यन्" † इच्छन् यजमानानां पश्वादिकं इच्छन् "रथानाम्" "अग्रे" पुरतः "प्रैति" प्रकर्षेण सङ्ग्रामं गच्छति। "अस्य" सोमस्य "सेना" च "हर्षते" हृष्यति [वाक्यभेदादनिघातः] किञ्च "सखिभ्यः" समानख्यानेभ्यो यजमानेभ्यः "इन्द्रहवान्" तैः कृतानि इन्द्रस्य आह्वानानि "भद्रान्" कल्याणानि यज्ञार्थानि "क्रण्वन्"। आहूतो ह्यिन्द्रः सोमं पीत्वा

* "देवोदासिः"—इति ऋषि-नै०।

† "छन्दसि परेच्छायां नामि क्यच् वक्तव्यः"—इति वार्तिकाध्यायीय-कात्यायनवचनादिह क्यचि रूपम्।

अथ द्वितीया।

२ ३ १ १ १ २ ३ २ २ ३ २ १ २ २
प्रतेधारामधुमतीरसृग्रन्वारंयत्पूतोअत्येष्यव्यम्।
१ २ ३ १ २ ३ १ २ १ २ ३ २ ३ १ २ १ २
पवमानपवसेधामगोनाऽजनयत्सूर्यमपिन्वोअर्कैः ॥२॥६८*

(वैयश्वज्योतिषाणि त्रीणि॥) १ २ २ १ २ २ १ २
हाउहोवाऽहाइ।
२ २ २ १ ७ १ १ १ १ १ २ २ १ २
प्रतेधारामधुमाऽताइरसृग्राऽ२३४५न्। हाउहोवाऽहाइ।
२ १ २ २ १ ७ १ १ १ १ २ २ २
वारंयत्पूतोअतौऽयाइषिआव्याऽ२३४५म्। हाउहोवाऽ
१ २ १ २ २ १ ७ १ १ १ १ २ २ २
हाइ। पवमानपवसेऽधामगोनाऽ२३४५म्। हाउहोवा

कामान् प्रयच्छतीति। "रभसानि" इन्द्रस्य वेगेनागमन-निमित्तानि "वस्त्रा" वस्त्राण्याच्छादकानि पयःप्रभृतीन्याश्रयणानि "आ दत्ते" आ गृह्णाति † ॥ १ ॥ ६७

---

* ऋ० ७, ४, १७, १।

† अत्र विवरणं यथा—"प्रसेनामी। सेनां नयति इति सेनानीः। शूरः विक्रान्तः। अग्रे रथानां ये देवरथाः गच्छन्। धनं पृथिव्यां भवं प्रेति प्रयाति। हर्षति अस्य सेना भद्रान् भन्दनीयानि। कुर्वन् क्षणन्। इन्द्रवान् इन्द्रियाणि। सखिभ्यः ऋत्विग्भ्यः। एवं गुणविशिष्टः। सोमः वस्त्राणि रभसानि पवस्व। आदत्ते मरुत्सैन्येभ्यः। अथवा सेनानीः स्कन्दः शूरः विक्रान्तः। अग्रे पुरतः देवरथानां गच्छन्। पृथिव्यां भवन्नन्नम्। राति गृह्णाति ददाति सैन्येभ्यः सोमइव रश्मीन् वस्त्राणि सैन्येभ्यो ददाति॥"—इति॥

अथ तृतीया।

१२ १क२र १२र २र ३१र २र
प्रगायताभ्यर्चामदेवांत्सोमꣳहिनोतमहते धनाय।

३ १२ ३ २ १२ ३२३१ २ ३१२३ १ २र
स्वादुःपवतामतिवारमव्यमासीदतुकलशन्देवइन्दुः॥३॥६८*

२ र १ ७र ११११ २र
३ह्वाइ। जनयंत्सूर्यमा३पाइन्वोअर्का३३४५इः। ह्वाउ

र २ १११ १
ह्वोवा३ह्वाउ। वा३४५॥ १८॥ ६८

परावसुरृषिः†। तदा प्रसूज्यन्ते "यद्" यदा "पूतः" वसतीवरीभिरुक्षं "अव्यम्" अविभवं "वारं" वालं पवित्रम् "अत्येषि" अतीत्य गच्छसि। किञ्च हे "पवमान" शोध्यमान सोम! "गोनाꣳ" गवां‡ "धाम" धीयते पीयत इति धाम पयः तत् वसनीकृत्य "पवसे" क्षरसि। ततः "जनयन्" जायमानस्वं "अर्कः" अर्चनीयैः स्व-तेजोभिः "सूर्यम्" आदित्यम् "अपिन्वः" पूरयसि॥

"वारं यत्पूतोअत्येष्यव्यम्"--"वारान्यत्पूतो अत्येष्यव्यान्"—इति, "जनयन्"-"जज्ञानः"—इति च साम्नऋचः पाठौ॥ २॥ ६८

---

* ऋ० ७, ४, ११, ४।

† "शाक्त्यः"—इति ऋषि-नै०।

‡ "गोः पादान्ते (७, १, ५७)"—इति सिद्धं गोमामिति।

¶ 'गवां रश्मीनां मरुतानां वा'—इति वि०।

२।१ २ १ २।३ ४ ५ २ १
प्रगायता। अभिय। चामदेवान्। सोमꣳ-
२ १ २ ३ ४ ५ २ १ २
हिनो। ताꣳमच्छ। तेधनाया। स्वादुःपवा। ताꣳ
१ २ ३ ४ ५ २ १ २ १ २ १ २
मति। वारमव्याम्। आसीदतु। कलशम्। दा-
२ ४
३४३ड्। वाꣳआ५ड्इन्दू३५ः॥ २०॥ ६९

इन्द्रप्रमतिर्वासिष्ठऋषिः। हे स्तोतारः! "प्रगायत" "सोमं" प्रकर्षेणाभिष्टुत। वयन्तु "देवान्" "अभ्यर्चामः" अभिष्टुमः*। यद्वा। देवानभ्यर्चामोऽभ्यर्चत [पुरुष-व्यत्ययः]। किञ्च। "महते" महत् प्रभूतं धनाय धनं प्राप्तुं सोमं "हिनोत"† अभिषवार्थं प्रेरयत [क्रियार्थोपपदस्य च कर्म्मणि स्थानिनः (२,३,१४,)-इति धन-शब्दस्य चतुर्थी] ततः "स्वादुः" मधुरः सोमः "अव्यम्" अविभवं "वारं" वालं पवित्रम् "अतिपवित्राम्" अतीत्य क्षरतु। "देवः" द्योतमानः। सोमः "इन्दुः" दीप्तः सन् "कलशं" द्रोणम् "अति आसीदतु" आभिमुख्येन तिष्ठतु॥

"पवतां"-"पवाते"—इति, "देवइन्दुः"-"देवयुर्न"—इति साम्नक्रचः पाठौ॥ ३॥ ६९

---

* 'सोमरश्मेव'—इति वि०।

† "तप्तनप्तनथनाश्च (७, १, ४५. पा०)"—इति तर्प सिद्धं हिनोतेति।

अथ चतुर्थी।

१ २ ३ १ २ ३१२ २२१ २ ३ १२ २२ ३ १ २
प्रहिन्वानोजनितारोदस्योरयोनवाजꣳसनिषन्नयासीत्।
३ १ ३ १ २ ३ १ २ १ २ ३ २३१ २ ३ १
इन्द्रङ्गच्छन्नायुधासꣳशिशानोविश्वावसुर्दस्तयोरादे-
२
धानः॥ ४ ॥७०*

२२ २ २ २ २ २ १ ३२ ५२
ह्याउहोवाऽहाइ। प्रहिन्वानोजनितारो३४३दसीयोः।
२२ २ २ २ २ १ ३२ ५२
ह्याउहोवाऽहाइ। रयोनवाजꣳसनिषा३४३नयासीत्।
२२ २ २ २ २ १ ३२ ५
ह्याउहोवाऽहाइ। इन्द्रङ्गच्छन्नायुधासा३४३ꣳषिशानः।
२२ २ २ २ २ १ ३२ ५ ४
ह्याउहोवाऽहाइ। विश्वावसुर्दस्तयोरा३४३दधानः। दधा

धुनाउ। वा॥ २१ ॥७०

वसिष्ठऋषिः†। "प्रहिन्वानः" अध्वर्युभिः प्रेर्यमाणः‡ "जनिता"¶ उत्पादयिता "रोदस्योः" द्यावापृथिव्योः§ तयोर्जनयितृत्वं वृष्टिप्रदान-हविःप्रापणाभ्याम्। तादृक् सोमो "वाजम्" अन्नं "सनिषन्" दास्यन्॥ "प्रायासीत्" प्रगच्छति।

* ऋ० ७, ३, २९, १। † "मित्रावरुणः"—इति ऋषि-नि०।

‡ 'प्रीणानः गच्छन् वा'—इति वि०।

¶ "जनिता मन्त्रे (६,४,५३)"—इति पा०।

§ "रोदसी"—इति द्यावापृथिवी-नामसु चतुर्थं निघण्टुकम् (३, ३०)।

॥ 'सनिषन् सम्भजमानः'—इति वि०।

अथ पञ्चमी।

३ २ ३ १ २ ३ १ २ ३ १ २ २ २ ३ १ २ ३ १ २ २
तक्षद्यदीमनसोवेनतोवाग्ज्येष्ठस्यधर्मन्द्युक्षोरनीके।
१ २ ३ २ ३ १ २ ३ २७ ३ १ २ ३ २ ३ २ ३ १ २
आदीमायन्वरमावावशानाजुष्टम्पतिङ्कलशंगावइन्दुम्॥७१

३ ४ ५ २ ३ १ १ १ १ ३ ४
(वाचःसामनी द्वे)॥ तक्षद्यदी। क्षो२३४५इ। मन-
२ ३ २ ४ ५ ३ १ १ १ १ ३ २ ४ ५ ३ १ १ १ १
सोवेनतः। वा२३४५क्। ज्येष्ठस्यधा। क्षो२३४५।
४ ३ २ ४ ५ २ ३ १ १ १ १ ३ २ ४ ५ २ ३ १ १ १ १
मन्द्युक्षोरनी। का२३४५इ। आदीमायन्। क्षो२३४५इ।
३ ४ ३ २ ४ २ ५ २ ३ १ १ १ १ ३ ४ ५ ३ १ १ १ १
वरमावावशा। ना२३४५ः। जुष्टम्पतिम्। क्षो२३३५इ।
४ २
कलशेगा५वः। इ। दाउ। वा॥ २२॥

२ १ २ ३ ४ २ ३ २ ४ ५ ३ १ १ १ १
तक्षद्यदा३१२३४इ। मनसोवेनतः। वा२३४५क्।
२ २ १ २ ३ २ ४ ५ २ ३ १ १ १ १ २ २ १
ज्येष्ठस्यधा३१२३४। मन्द्युक्षोरनी। का२३४५इ। आदा-

"इन्द्रङ्गच्छन्" प्राप्नुवन् "आयुधा" "आयुधानि" "संशिशानः" सम्यक् तीक्ष्णीकुर्वन् इन्द्रं सहायगमनार्थं तीक्ष्णायुधः सन् "विश्वा"† सर्वाणि "वसु"‡ वसूनि धनानि "हस्तयोरादधानः" अस्मभ्यन्दानाय एवं कुर्वन् प्रायासीत्॥ ४॥ ७०

---

* ऋ० ७, ४, १५, २।

†,‡ 'विश्वा'—इति सुप आत्वे, 'वसु'—इति सुपो लुकि च रूपम् (७, १, ३९)।

२ ३४,३२ ४२५ २ ७ १११११ २१
इमायाइ१२३४न्। वरमावावशा। नाइ३४५ुः। जुष्ट-

२ २
म्यताइ१२३४इम्। कलशेगाप्ुवः। इ। दाउ। वा।

॥ २३ ॥ ७१

मृडीको वासिष्ठऋषिः। "वेनतः" [वैनो वेनतेः कान्ति-कर्म्मणः (दे,४,३८)"—इति यास्कः] कामयमानस्य "मनसः" [मनो मन्यतेः स्तुतिकर्म्मणः*] स्तोतुः "वाक्" स्तुतिलक्षणा+ यद्येनं "तक्षत्" संस्करोति‡। "धर्म्मन्" धारके¶ यज्ञे "ज्येष्ठस्य" प्रशस्यस्य "द्युक्षोः" दीप्त-स्तुतिकस्य [टुक्षु शब्दे(अ०प०)इत्यस्मात् कु-प्रत्ययः] सवनस्य "अनीके" प्रमुखे यदा यज्ञेषु सवन-मुखे स्तोतुर्वाक् सोमं स्तौतीत्यर्थः। "आ" अनन्तरमेव "वरं" वरणीयं "जुष्टं" देवानां मदाय पर्याप्तं "पतिं" सर्वस्य पालकं "कलशे" स्थितं "इन्दुम्" "ईम्" एनं सोमं "वावशानाः" कामयमानाः "गावः" "आयन्" पयसा स्वीयेन मिश्रयितुं मागच्छन्।

"धर्म्मन्"-"धर्म्मणि"—इति पाठौ ॥ ५ ॥ ७१

---

* "मन्यते"—इति स्तुति-कर्मसु चतुर्विंशत्यधिकं षष्टं कम् (३, १४)।

+ 'वाक सखित्वम्'—इति वि०।

‡ 'तक्षत् करोति'—इत्येव वि०।

¶ धारणार्थ-धृ-धातोः कर्त्तरि मनिपि धर्म्मन्निति ततश्छान्दस-लुकि रूपम्।

अथ षष्ठी।

३ १२ ३१२ ३२३१२ ३२३ १२
साकमुक्षोमर्जयन्तस्वसारोदशधीरस्यधीतयोधनुत्रीः।

३१२ ३१२ १२३१ २ ३२३२३ २
हरिःपर्यद्रवज्जाःसूर्यस्यद्रोणंननक्षेअत्योनवाजी॥ ६॥७२*

४ ५ १ २ २१
(दाश्वस्पत्ये द्वे॥) साकाम्। उक्षोमर्जयन्त। स्वसा

२ १ १२ २१ २ १
२३राः। दाश्वा२। धीरस्यधीतयोधनू२३त्रीः। हारी

१ २ ७ २ १ १
२ः। पर्यद्रवज्जाःहरिया२३स्या। द्रोणा२म्। नन-

२ २ १ ११११
क्षेअत्योनवा२३। हाउवा३। जी२३४५॥ २४॥

५२ ५ २ ५ ४ ५२
साकमुक्षाई९ए। ए३१२३४। मर्ज्जयन्तस्वसारः।

२ ५ २ ५२४ ५२ ४ ५ ४ ५
दशधीराई९ए। ए३१२३४। स्यधीतयोधनुत्रीः। हरिः

५ २ ५ ४२ २५ २ ५
पर्याई९ए। ए३१२३४। द्रवज्जाःसूर्यस्य। द्रोणन्नाई९ए।

२ २ ५२ ४ ५ ५ ३ १११११
ए३१२३४। क्षेअत्योनवाई। हाउवा। जी२३४५॥२५॥ ७२

---

* उ० ६,२,१५,१=ऋ० ७,४,३,१=जक्षे ८,१,७–१२,१,९–१८,२,४।

अथ सप्तमी।

३ १ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ २
अधियद्स्मिन्वाजिनीवप्रुभस्पर्द्धन्तेधियःसूरेनविशः।

३ १ २ ३ १ २ ३ १ २ ३ १ २ २ ३ १ २ ३ १ २
अपोवृणानःपवतेकवीयान्व्रजन्नपप्रुवर्द्धनायमन्म ॥ ७ ॥७३*

नोधाऋषिः†। "साकमुक्षः" [उक्ष सेचने (भ्वा० प०) क्विपि रूपम्] तादृश्यः "खसारः" कर्म्म-करणार्थं मितस्ततः सुष्ठु गच्छन्त्यः‡ अङ्गुलयः¶ "मर्जयन्त" सोमं शोधयन्ति [मृज् शौचालङ्कारयोः (चु० उभ०] ताः दशसङ्ख्याकाः "धीतयः" [अङ्गुलिनामैतत् (नै०२,५,७] अङ्गुलयः "धीरस्य" समर्थस्य प्राज्ञस्य वा देवैर्ध्यातव्यस्य काम्यमानस्य वा सोमस्य "धनुत्रीः" प्रेरयित्र्यो भवन्ति§। ततः "हरिः" हरितवर्णः सोमः "सूर्य्यस्य" "जाः" प्रादुर्भूता जाया दिशस्ताः॥ "पर्य्यद्रवत्" परितो गच्छति। सूर्य्यस्य तेजसा हि आविर्भवतीति दिशां तस्य जायात्वम्। "अत्यः" अतनशीलः "वाजी न" अश्व इव स्थितः सोमः "द्रोणं" कलशं "ननक्षे' व्याप्नोति [नक्षति-र्व्याप्ति-कर्मा (नै०२,१८,२) ॥ ६ ॥ ७२

---

* ऋ०७,४,४,१।

† "गौतमः"—इति ऋषि नै०।

‡ खृ शब्दोपतापयोः (भ्वा० प०)—इत्यस्य रूपं खसेत्यभिप्रायः।

¶ "खसारः"—इत्यङ्गुलि-नामसु त्रयोदशतमं नैघण्टुकम्।

§ "वायन्ति"—इति वि०।

॥ "अपत्यम्"—इति वि०। "जाः"—इत्यपत्यनामसु नवमं नैघण्टुकम् २,२।

४ ५ ४ ३ ऽर २
(कश्यपस्य च शोभनम्॥) अधियदा। स्राइन्वारजि
ऽर १ २ र १ र २ ३ ४ ५
नीरवभ्रु। भाः। स्पर्ह्यन्तेधियःह्व। राइनविशाः।
२१र र ७ २ १
अपोवृणानःपवताइ। कवी२३यान्। व्रजन्न। पा।
२१ २ २ ४
शुवर्ह्व। नाइ४३। याइमापून्माई५ई॥ २६॥ ७३

कण्वऋषिः*। "यद्" यदा "अस्मिन्" सोमे "वाजिनीव शुभः"† अश्वे यथा वस्त्रप्रभृत्यलङ्कारा भवन्ति। यदा वास्मिन् सोमे "सूरे न" सूर्ये न यथा सूर्ये "विशः" रश्मयः उदिता भवन्ति तदा "धियः" अङ्गुलयः "अधिस्पर्ह्यन्ते" अहं पुरस्ताच्छोधयाम्यहं पुरतः शोधयामीत्यहमिकया उपतिष्ठते। ततोऽयं सोमः "अपः" वसतीवरीः "वृणानः" आच्छादयन् "पवते" पात्रेषु चरति कलशानभिगच्छति। कीदृशः? "कवीयान्" कविरिवाचरन्। यद्वा। कवयः स्तोतारः तानिच्छन्। तच दृष्टान्तः—"व्रजं न" "मन्म" मननीयं बोद्धव्यं रक्षितव्यं गवां गोष्ठं पशुवर्द्धनाय गोपालः परिगच्छति यथा तथा देवानां प्रीणनाय पात्राणि पवते॥

"सूर्ये"-"सूरे"—इति, "कवीयान्"—"कवीयन्"—इति च साम्न ऋचः पाठः॥ ७॥ ७३

---

* "घौरः"—इति ऋषि० नै०।

† शुभदिति शुभ शोभायाम् (भ्वा०आ०)—इत्यस्य रूपम्। विसर्गस्तु न दृश्यते मूले।

अथाष्टमी ।

१ १ २ १ २ २ १ २ २ २ १ २ २ २ १ २ २ २ १ २
इन्दुर्वाजीपवतेगोन्योघाइन्द्रेसोमःसचइन्वन्मदाय ।

२ २ २ १ २ २ १ २ २
हन्तिरक्षोबाधतेपर्यरातिं

१ १ २ १ १ १ २ २ १ २
व*रिवस्कृ†ण्वन्वृजनस्यराजा ॥ ८ ॥ ७४‡

(दाशस्त्यानि चत्वारि ॥) इन्दूऽर्वाजी २ । पवतेगो
२ १ १ १ २
नियोघाः । इन्द्राइसो२३४माः । साचइन्वन्मदाया ।
१ ५ १ २ १ २
हन्ताइरा२३४क्षाः । बाधतेपर्यरातिम् । वराइवा२३४स्कृ ।
२ १ १ ऽ २ २ ५ ४
ण्वन्वृजाना२३स्या । रा३जावाओ२३४वा । हो५इ ।
डा ॥ २७ ॥

४ ५ २ ४ २ ५ २ ४ २ ५ १ ० २
इन्दुर्वाजीपवतौ । हौहोवाहाइ । गोनियौघौ ।
३ ५ १ २ १ २ ऽ २ १ २ १ २ २
वाओ२३४वा । इन्द्र२सोमा२ःसचइ । न्वान्मदायौ । वा-
३ ५ १ २ १ २ १ २ २ १ ७ २ ३
ओ२३४वा । हन्तिरक्षोबाधते । पार्यरातौ । वाओ-

---

* "अरातीर्व"—इति, † "वरिवःकृ"—इति च ऋ० ।

‡ ७०३,२,२०,१ = ऋ०७,४,१२,५ = जद्दे ३,१,१५—८,२,५ ।

५ १ २ १ २ १ ऽ २
२३४वा। वरिवस्कृण्वन्वृजनाइ। स्या। राइजीवा-

५ ४
ओ२३४वा। ह्वोऽइ। डा ॥ २८ ॥

५ २२ २ २ ४ ५ २२ २
इन्दुरीह्वोवाह्वाईयावाजाउ। वाइ। ह्वाउवा।

२२ १ २ २ १ २
पवतेगोनियोघाउ। वाइ। ह्वाउवा। इन्द्राइसोमः।

१ २ २ १ ३ ५२ २
सह्वइन्वाउ। वाइ। ह्वाउवाइ। मा२दा२३४ओह्वोवा।

३ १ १ १ १ २ १ २ २ १ २
या२४५। ह्वन्ताइरह्वो। बाधानाइपाउ। वाइ।

२ १ ३ ५२ २ ३ १ १ १ १ २ ३
ह्वाउवाइ। र्या२रा२३४ओह्वोवा। तीर२३४५म्। वरा-

२ १ २ २ १
इवस्कृ। एवन्वृजनाउ। वाइ। ह्वाउवाइ। स्या२-

३ ५२ २ ३ १ ५ १ १
रा२३४ओह्वोवा। जा२३४५ ॥ २९ ॥

५ २२ २२ ४ ५ ए २
इन्द्वर्जीपवतेगोनियोघाः। इन्द्रे सोमःसह्वइन्वन्म-

४ ५ ३२ २ २ ४ ५
दाया। ह्वन्तिरह्वोबाधतेपर्यरातीम्। वरिवस्कृएवन्वृजः

४ ५ ३ २ २ ५ २ २ २ १ २ ३ १ १ २
नस्यराजा। राजा३४औहोवा। ए३। स्यराजा२३४५

॥ ३० ॥ ७४

॥ इति ग्रामे गेये पञ्चदशः प्रपाठकः ॥

मन्युर्वासिष्ठ ऋषिः। "इन्दुः" चरणशीलः* "वाजी" बलवान् "गोन्योघाः" गमनशील-नीचीनाग्र-रससङ्घातः† "इन्द्रे" "सहः" बलकरं रसम् "इन्वन्" प्रेरयन्‡ "सोमः" "मदाय" तस्य मदार्थं "पवते" चरति। किञ्च। "रक्षः" रक्षःकुलं "हन्ति" हिनस्ति। किञ्च। "अरातीः" अरातीन्¶ अचून् "परिबाधते" परितः संहरति। कीदृशः? "वरिवः" वरणीयं धनं "कृण्वन्" स्तोतॄणां कुर्वन् "वृजनस्य" बलस्य§ "राजा" ईश्वरः॥ सोम इति ॥ ८ ॥ ७४

---

* अतएव "इन्दुः"—इति उदकनामसु दृश्यते च (नै०१,१२,८३) "उन्दो रन् च"—(उ,१)"—इत्यु नञेरिन्दुरिति।

† गो—गमनशीलः, नी—नीचिनः, (नस्य अग्रे विद्यमानः) ओघः—रससङ्घातः। "गोनी"-शब्दो गमनशीलार्थेऽपभ्रंश इत्युदाजहार च पश्यन्ने पतञ्जलिः।

‡ "इन्वति"—इति गतिकर्मसु पञ्चदशाधिकशततं नैघण्टुकम् २,१४।

¶ भाष्यकारस्त्वत्र ऋग्वेदीयपाठ मनुसृत्य व्याचख्यौ, सामवेदीयपाठस्तु "अरातिम्"—इति।

§ "वृजनम्"—इति बलनामसु एकविंशतितमं नैघण्टुकम् २,९।

॥ "राजति"—इति ऐश्वर्यकर्मसु चतुर्थं नैघण्टुकम् २,२१।

अथ नवमी।

१ २ ३ १ २ ३ १र २र ३ १ २ ३ १ २ ३ १ २
अयापवापवस्वैनावसूनिमाꣳश्चत्वइन्दोसरसिप्रधन्व।

३ २ ३ २ ३ २ ३ १ ३ १
ब्रध्नश्चिद्यस्यवातोनजूति

२ ३ १ २ ३ १ २ ३ १ २
म्पुरुमेधाश्चि*त्तकवेनरन्धात्॥ ९॥ ७५†

५ र ४ ५ ४ ५
(श्रीष्ठानि त्रीणि॥) औदोहाइ। अयोहाइ।

१ र र र २ १ २ ऽ २, -१ २ ऽ २
पवापवस्वैनावसू२३नी। औ३होइ। इहा। ई३या।

र १ र २ १ २ ऽ २ ३ २
माꣳश्चत्वइन्दोसरसिप्रधा२३न्व। औ३होइ। इहा।

ऽ २ १ र र २ १ २ ऽ २, ३ २
ई३या। ब्रध्नश्चिद्यस्यवातोनजू२३तीम्। औ३होइ। इहा।

ऽ २ १र र र २ १ २ ऽ २
ई३या। पुरुमेधाश्चित्तकवेनरा२३न्धात्। औ३होइ।

३ २ ऽ, ३ ५ र र २ २र ३ २
इहा। ई२। या२३४। औदोवा। ए३। दोदिचो१॥

॥ १॥

५ ४ ५ ४ ५ १ २ र २ १ २ र
अयोहाइ। पवोहाइ। पवस्वैनावसू२३नी। इहो

---

* "पुरुमेधश्चि"—इति ऋ०।

† उ०४,१,२१,१ = ऋ०७,४,२१,२ = जहे १,२,१७—८,२,१०—२३,२,१।

ऽ २ र १ र २१ २
इयाइ। ईइया। माꣳश्चत्वइन्दोसरसिप्रधा२३न्वा। इ

र ऽ २ १ र र २१ २
होइयाइ। ईइया। ब्रध्नश्चिद्यस्यवातोनजू२३तीम्।

र ऽ २ १र र र २१ २
इन्होइयाइ। ईइया। पुरुमेधाश्चित्तकवेनरा२३न्धात्।

र १ २ ५र र २ २र
इन्होइयाइ। ईइ। या२३४। औहोवा। ए३। दो

१ १ १ १ १
दया२३४५त्॥ २॥

२ २ ५ २ १ ५ २ १र
हाओ२३४वा। २। हाइओ२३४वा। हाउवा। अया-

२ १र २ र १र २र १२ १ १ २ १ २
पवापवस्वनावसूनि। इहइ। हिया२। इहा। इहा।

र १ २र १ २ १ २ १ २ १ २
माꣳश्चत्वइन्दोसरसिप्रधन्व। इहइ। हिया२। इहा।

१ २ १ २ १ २ १र २र १ २र १ २ १
इहा। ब्रध्नश्चिद्यस्यवातोनजूतिम्। इहइ। हिया२।

१ २ १ २ २ ३ ५ २ १ ५
इहा। इहा३। हाओ२३४वा। २। हाइओ२३४वा।

२ १र २र १ २र १ २र १ २ १
हाउवा। पुरुमेधाश्चित्तकवेनरन्धात्। इहइ। हिया

१ २ २ ३ १ १ १ १
२। इहा। इहा२३४५॥ ३॥ ७५

कुत्सऋषिः*। हे सोम! "अया" अनया "पवा" पवमानया धारया सह "एना" एनानि "वसूनि" धनानि "पवस्व" चर [पवा—पूञ् पवने (क्र्या० उ०) "अन्येभ्योपि दृश्यन्ते (३,२,१०१)" —इति विन् प्रत्ययः। आर्धधातुकलक्षणो गुणः। "सावेकाचः (६,१,१९८)"—इति तृतीयाया उदात्तत्वम्]। तथा हे "इन्दो"! त्वं "मांसले" मन्यमानानां चातके "सरसि" उदके† वसतीवर्य्याख्ये कलशे "प्रधन्व" प्रगच्छ‡। ततः "यस्य" यं "ब्रध्नश्चित्" सर्वेषां प्रज्ञापकः मूलभूतो वा आदित्यः¶ "वातो न" वात इव "जूतिं" वेगं§ कुर्वन्। किञ्च। "पुरुमेधाश्चित्" बहुविधप्रज्ञ इन्द्रश्च "तकवे" [तकतिर्गतिकर्म्मसु पठितः॥। अस्मादौणादिक उन् प्रत्ययः यस्येति (२,३,३७) कर्मणि षष्ठी॥ "न लोकाव्ययेति (२, ३, ६९) षष्ठी-प्रतिषेधश्छान्दसः] सोममभि गच्छता मित्यर्थः॥

"यस्य"-"यच"—इति, "जूतिं"—"जूतः"-इति,—"नरन्धात्"-"नरन्दात्"—इति च साम्न ऋचः क्रमेण पाठाः॥ ९॥ ७५

---

* "आङ्गिरसः"—इति ऋषि-नै०।

† "सरः"—इत्युदकनामसूक्तिं श्रुत्यदम् नै०१,१२।

‡ "धन्वति"—इति गतिकर्मसु चतुःषष्ठितमन्नैघण्टुकम २,१४।

¶ 'ब्रध्नः ब्रह्म, सविता वा महान् वा'—इति वि०।

§ जवतेर्वेगकर्मण ऊतिजूतीत्यादिना (३,३,९७) निपातनात् जूतिरिति।

॥ नि० नै० २,१४,६८।

अथ दशमी।

२१र २र ३१२ २ ३ १र २र ३२
महत्तत्सोमोमहिषश्चकारापांयद्गर्भोवृणीतदेवान्।

१ २ ३ २ ३ १ २ ३ १र
अदधादिन्द्रे पवमानओजो

२र ३ २ ३ २ ३ १ २
जनयत्सूर्येज्योतिरिन्दुः॥ १०॥ ७६*

२ र र १ र
(आत्रम्॥) महत्तत्सोमोमहिषश्चाऽकारा२। अपां

र र १ र र र १
यद्गर्भोवृणीताऽदाइवा२न्। अदधादिन्द्रे पवमानाऽओ

र ऽर १ २ २
जा२:। अजनयत्सूर्येऽज्यो२३। तिरिन्द्राउवा३। ए३।

१ २ १र२र१र २१ १ १ १ १
अजनयत्सूर्येज्योतिरि। दू२३४५:॥ ४॥ ७६

"पराशरऋषिः*। "महिषः" महान्† पूज्यो वा "सोमः" "महत्" प्रभूतं¶ "तत्" कर्म "चकार" अकरोत्। किं तत्?

---

* ऋ० ५,२,१,३ = ऋ० ७,४,१९,१ = ऋग्वे १०,२,१—२३,२,५—२३,२,८—२३,२,९ = ऋग्वे ९, २,५।

† "आत्मा:"—इति ऋषि-नै०।

‡ अत्राह यास्कः—'महत्तत्सोमोमहिषश्चकारापां यद्गर्भोऽदधीत देवानाधिपत्य मदधादिन्द्रे पवमान ओजो ऽजनयत् सूर्ये ज्योतिरिन्दुरादित्य इन्दुरात्मा'—इति नि०प०२,१७।

¶ 'महत् असमाप्यम्'—इति वि०।

अथैकादशी।

१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
असर्जिवक्वारण्येयथाजौधियामनोताप्रथमामनीषम्।

२ १ २ ३ २ २ २ ३
दग्धस्यसारोअधिसानो

१ २ ३ २ ३ १ ३ १ २ ३ १ २
अध्येसृजन्ति*वक्विंसदनेषच्छ॥ ११ ॥ ७७ †

"अपाङ्गर्भः" उदकानां गर्भभूतः‡ जनयितृत्वाज्जन्यत्वाद्वा। स सोमः "देवान्¶" "अदृणीत"§ समभजतेति "यत्" तत् कृतवानिति। किञ्च। "पवमानः" पूयमानः‖ सोमः "ओजः"+ सोमपानजन्यं बलम् "इन्द्रे"÷ "अदधात्" न्यधात् तथा "इन्दुः" सोमः × "सूर्ये"** "ज्योतिः" तेजः†† अजनयत्‡‡॥ १०॥ ७६

---

* "अध्येसृजन्ति"—इति ऋ०।

† ऋ० ७,४,१,१=आरण्ये १,२,२२।

‡ 'अपां यद् गर्भदर्शनमात्रं पशूनां भूतानां गर्भः'—इति वि०।

¶ 'इन्द्रियाणि'—इति वि०।

§ 'अदृणीत अधिष्ठितवान्'—इति वि०।

‖ 'पूयमानः विषयप्रमाणेन'—इति वि०।

+ 'ओजः बलं मणिमादि'—इति वि०।

÷ 'इन्द्रे आत्मनि'—इति वि०।

× 'ज्योतिरिन्दुरादित्यः अध्यात्मम्'—इति वि०।

** 'सूर्ये सरण्यूसंज्ञे'—इति वि०।

†† 'तेजः इन्द्रः'—इति वि०।

‡‡ 'तथाधोक्षः—येन सूर्यस्तपति'—इति वि०।

(वासिष्ठम्॥) असाऔ३हो। जिवाक्रा२। रथ्या
२ ५र ३ १ १ १ १ २ १ २ २ १
इयाइ४। था। जा२३४५उ। धियाऔ३हो। मनो-
१ २ ५र ३ १ १ १ १ २ १ २ २
ता२। प्रथमामा३४। नौ। षा२३४५। दशाऔ३हो।
१ १ २ ५ ३ १ १ १ १ १ १
खसारा२ः। अधिसानो३४। अ। व्या२३४५इ। मृजा
२ २ १ १ ३ ५
औ३हो। तिवाक्रो२म्। सदनादृषू३४। अक्का२उ।
१ १ १
वा३४५॥ ५॥ ७७

कश्यपऋषिः*। "वक्रा" शब्दायमानः [वच परिभाषणे (अदा०प०) वनिप्] तादृशः पवमानः सोमः "आजौ" अजन्ति कर्मार्थं ऋत्विजइति आजिर्यज्ञः तस्मिन् "धिया" कर्मणा स्तोत्रेण या† साकम् "असर्जि" याचेषु सृज्यते‡। तत्र दृष्टान्तः। "रथ्ये यथा" रथे रथार्हे [आजौ सङ्ग्रामनामैतत्¶। अजन्ति प्रक्षिपन्त्या युधान्यत्रेति तस्मिन्] अश्वो यथा सृज्यते तद्वत्। कीदृशः? "मनोता" यस्यां देवानां मनांसि प्रोतानि सा [तथाच ब्राह्मणम्—"तस्यां हि तेषां मनाण्स्योतानि"—इति] "प्रथमा"

---

* "मारीचः"—इति ऋषि-नै०।

† 'धिया प्रज्ञया कर्मणा वा'—इति वि०।

‡ 'सृष्टवान्'—इति वि०।

¶ नि० नै० २,१७,८।

अथ द्वादशी।

३२ ३२१२ १ १ २ ३ १२३१२ १२३१ २
अपामिवेदूर्मयस्तर्तुराणाःप्रमनीषाईरतेसोममच्छ।
३ २३ १ २३२ ३१२
नमस्यन्तीरुपचयन्तिसञ्चा
२२ ३२३१२
चविशन्त्युशतीरुशन्तम् ॥ १२ ॥ ७८*
॥ पञ्चमदशति ॥ ॥ अर्द्धः प्रपाठकः ॥
५ ४२ ५ ४२५२ ४ ५ ४२
(अपाञ्च साम॥) अपामिवेदूर्मयस्तौ। होवा।
५ २ २ ३ ३२ २ १ २२ १ २२
हाइ। तुराणा२३४ः। हाहोइ। प्रमनौ। षाः। ईर-

मुख्या "मनीषा" मनस ईषा मनीषा स्तुतिः तद्वान्। यद्वा। धिया विदधाति स्तुतीरिति धीः स्तोता तेन स्तुतिः प्रेर्यते। किञ्च। "दश स्वसारः" दशसङ्ख्याका अङ्गुलयः† "सदनेषु" यज्ञगृहेषु पात्राण्यभिमुखीकृत्य "वक्रिं" वोढारं सोमं "सानौ" समुच्छ्रिते [अधिः सप्तम्यर्थानुवादकः] "अव्ये" अविभवे अविबालेन कृते पवित्रे "अञ्जन्ति" प्रेरयन्ति‡॥

"प्रथमा मनीषा"-"प्रथमो मनीषी"—इति, "सदनेषु"-"सदनानि"—इति च साम्न ऋचः पाठः॥ ११ ॥ ७७

---

* ऋ० ७,४,५,३।

† "स्वसारः"—इति अङ्गुलिनामसु अष्टमं नैघण्टुकम् २,५।

‡ "अञ्जन्ति"—इति तु ऋग्वेदीयः पाठः, तमेवावावक्ष्यमिनं साधयेन। सामवेदीयपाठस्तु "म्रक्षन्ति"—इति; अतएव 'म्रक्षन्ति शोधयन्ति'-इति वि०।

२, ३ ५ २ ३र २ १
तेऽ३। सोमम। च्छा३४। हाहोइ। नमस्य। ताइः।
२ २ ३ ५ २ ३र २ १ २
उपचाऽ३। यन्तिसम्। चा३४। हाहोइ। आचवि।
१ २ ३ २, ३ ५ २ ३र २ ५र
शा। तियुश्च। तौरुश्च। ता३४म्। हाहा३४। औ
र २ १ १ १ १
होवा। वाऽहा२३४५ः ॥ ६ ॥ ७८

प्रस्कण्वऋषिः*। "अपामिव" यथा उदकानाम् "ऊर्मयः" त्वरन्ते। "इत्"—इति पूरणः। तद्वत् "तर्तुराणाः" कर्मणि देवान् स्तोतुम्त्वरमाणाः। [तुर त्वरणे जौहोत्यादिकः (आ०)। यङ्लुगन्तस्य शानचि रूपम्। अभ्यासस्य उवर्णस्य रेफादेश-श्छान्दसः। अभ्यस्तस्वरः†। ताट्या ऋत्विजः "मनीषाः" मनस ईशित्रीः स्तुतीः "सोममच्छ" सोमं प्रति प्रेरयन्ति। "नमस्यन्तीः" नमस्यन्त्यः सोमं योजयन्त्यः सत्यः तम् "उपयन्ति" च। उप समीपे गच्छन्ति। तमेव "संयन्ति च" सङ्गच्छन्ते। "[च वा योगे प्रथमा (८,१,५९)—इति न निघातः] "उशतीः" कामयमानाः स्तुतयः "उशन्तं" कामयमानं सोमम् "आविशन्ति च" प्रविशन्ति च ॥ १२ ॥ ७८

इति श्रीमत्सायणार्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे
छन्दोव्याख्याने पञ्चमस्याध्यायस्य सप्तमः खण्डः ॥
॥ इति चैष्टुभम् ॥

---

* "काण्वः"—इति ऋषि-नै०।

† "अभ्यस्तानामादिः (६,१,१८९)"—इति पा०।

पुरोजितीति-मुख्यास्तु नवर्चो बृहतीत्यसौ—
"आहर्यतायष्टणवे" शिष्टा अनुष्टुभः स्मृताः* ॥
ऋषीणां विप्रकीर्णत्वात्तत्र तत्राभिदध्महे † ॥

तत्राष्टमे खण्डे—

सैषा प्रथमा।

३१ ३ ३ १२ ३१ २ ३१२
पुरोजितीवोऽन्धसः सुतायमादयिन्नवे।
३१२ ३१२ ३क२र
अपस्वानꣳश्रथिष्टनसखायोदीर्घजिह्वयम् ॥ १ ॥ ७९

५र २ ३ ५ २
(प्रङ्क्तौ द्वौ ॥) पुरोजितौ। वाऽअन्धा२३४साः। सु-
१र २ ५ १
तायाऽआदया३१उवायेऽ३। ला२३४वे। अपस्वाना२ꣳ

---

* पुरोजितीतिमुख्याः 'पुरोजितीवोऽन्धसः'—इतिप्रभृतयः नव ऋचः, ऋचाष्टमे खण्डे सूयन्त इति शेषः। नव आहर्यतायेति सप्तमी ऋक् बृहतीच्छन्दस्का, शिष्टा अष्टौ चानुष्टुप्छन्दस्का इत्यर्थः।

† 'विनियोगस्त्वासां ज्योतिष्टोमे'—इति वि०।

‡ उ० १,१,१८,१ = ऋ०७,५,१,१ = आरण्ये १,२,२२ = जघे १,१,११—१,१,१२—२,२,१८—४,१,१३—४,१,१४—६,२,९—७,२,१० —८,२,१५—८,२,१६—८, २,१७—१०,१,३—१०,१,१७—१२,१,६—१२,२,११—१२,२,१२—१२,२,१३—१२,२,१४—१३, १,६—१३,२,६—१६,१,३—१६,१,८—१६,१,९—१६,२,६—१७,१,३—१७,१,४—१७, १,१७—२०,१,१८—२०,२,११—२०,२,१३—(२१,२,१)—२१,३,३— २१,१,६—२२,१, ७—२२,१,९—२२,२,१३—२३,२,१५—२३,१,९ = जघे ३,१,१—३,१,१८—१,२,३— २,२,५—३,१,१—३,१,१९—३,२,२—४,१,८—४,२,५—४,२,८—४,२,१४— ४,२,१६— (५,१,८—५,१,१२)—५,२,१४—६,१,१२।

२ ५ १ र
अथाइ१उवायेइ। ष्ठाइ२३४ना। सखायोदीऽइर्घजाइ१

२ ५
घायेइ। क्षीइ२३४याम्॥ ७॥

५ र २ १ २ २ १ २ र
पुरोजिती। वोइ३ओम्बाइसाः। हूतायमाऽइ। ऊऽइ।

१ २ २ १ २ र
द्वाऽइ। ओऽ२। दाइ३याइन्नाइवे। आपस्वानाऽइम्।

१ १ २ २ १ २ र
ऊऽइ। द्वाऽइ। ऊऽ२। आइथाइष्टाइता। माखा

र १ १ ३
योदाऽइ। ऊऽइ। द्वाऽइ। ऊइ२३। घाइजाइ३४

५ र र १ १ १ १ १
औद्दोवा। ए३। क्रियाइ३४५म्॥ ८॥

५ र र ३ ५ २ र
(कार्त्तयग्रम्॥) पुरोद्वाद्वाउ। जाइ३४इती। वो

१ २ २ ४ ५ २ १ २ १ ४ ५
आओइद्वोइ। धासाः। सुताओइद्वोइ। यामाई।

५ २ १ र १ २ १ र २ २
द्वाउवा। दयित्नवेइ। उपा। अपस्वानएअथाइष्टा

२ १ २ २ ४ ५ ५ २
इना। सखाओइद्वोइ। योदाई। द्वाउवा। घजि

१ ३ १ १ १ १
क्रियम्। उपाइ३४५॥ ९॥

(औद्वंसम्नम्॥) पुरोजितीवोअन्धसः। ओवा-
ह्वाइ। सुतायमादयित्नवओवा२३ह्वोइ। अपस्वानंश्
श्रथिष्टनओवा२३ह्वोइ। साखायोदाइ। घाजिङ्का२३
४५याई५६म्। सुवृक्तिभिर्नृमादनम्भरे२ध्वा१॥१०॥

(श्यावाश्वम्॥) पुरो३१। जी३ती। वोअ। धा
३सः। एह्यि। सू। तायमादा। यि। त्नवा२इ।
एह्यि२। अपस्वानंश्रा३थी३। ष्टा२३४ना। एहा
२इ। एह्यि२। सखायोदाइर्घा३जी३। ङ्का३४५यो
६ह्वाइ॥११॥

(आन्धीगवम्॥) पुरोजितीवो४न्धासाः। सुताय।
मादा२३या। ऊम्मा२१२। त्नवेअपस्वानंश्रथिष्टन।
साखाइउवा। यो२ही। घा२३जी। ङ्कियाम्। औ
२३ह्वोवा। ह्वोइ। डा॥१२॥७९

अथ द्वितीया।

३ २ ६ २ ३ २उ ३ १ २ २ १ २
अयम्पूषारयिर्भगःसोमःपुनानोअर्षति।

२ १ २ ३ १ १ ३क १र ३ १ २ ३ २
पतिर्विश्वस्यभूमनोव्यख्यद्रोदसीउभे ॥ २ ॥ ८०*

ख्यावाखऋषिः†। हे "सखायः" सखिभूताः समानख्याना वा हे स्तोतारः! "वः" यूयं "पुरोजितौ" [षष्ठ्याः पूर्वसवर्णदीर्घः‡] पुरः-क्षित-जयस्य "अन्धसः" अदनीयस्य सोमस्य स्वभूताय "सुताय" अभिषुताय "मादयित्नवे" अत्यन्तं मदकराय रसाय "दीर्घजिह्वयं" [दीर्घा जिह्वा अस्य स दीर्घजिह्वी "दीर्घजिह्वी च छन्दसि (४,१,६८)—इति "ङीषन्तत्वेन" निपातितः। तादृशं] "ख्यानं" च "अपत्रथिष्टन" अपत्रथयत¶ अपबाधध्वम्। यथा ख्या राक्षसा वा "सुतं" सोमं न लिहन्ति तथा कुरुतेत्यर्थः॥ १ ॥ ७९

---

* उ० ९,१,१६,१=ऋ० ७,५,२,१=आरण्ये १,२,८—२,२,१७—२,२,१८—२,१,१९ ऊहे१,२,८—२,२,९—७,१,९—११,२,१०—११,९,२०—१३,१,१—१५,१,१३—१५,१,१४—१५,१,१७—२०,१,५—२०,२,१८—२२,२,९=ऊहे२,१,६—२,१,८—३,१,११—३,२,११—५,२,९—६,१,८।

† 'आत्रेयः ख्यावाश्विः'—इति ऋषि-नै०।

‡ सुपांसुलुगित्यादिना (७,१,३९)।

¶ 'शिथिलीकरोतु'—इति वि०।

(क्रौञ्चानि त्रीणि ॥) अयम्पूषौन्द्रो। रायिर्भगाः। सो
मःपुनाइ। नोऽर्षापूताइ६५६इ। पतिर्विश्वौन्द्रो। ख्या-
भूमनाः। वियख्यद्रोइ। दासीइऊभाइ६५६इ ॥ १३ ॥

अयम्पूषा। अयम्पूषा। रयिर्भगाः। सोमःपूना
इ। नोऽर्षताइ। पतिर्वाइख्वाइ। ओख्याभू१मानाइः।
ओइवियख्याइद्रो। दासीउभ। इडाइभाइ४इ।
ओइ३४५इ। डा ॥ १४ ॥

अयम्पूषा। न्द्रो। रयिर्भगाइ६इ। सोमाइःपुनाइ।
नऽर्षाइ४५। षाइ३४तो। पतिर्विश्वख्यभूमनः। विय-
ख्याइद्रो। दसीऊइभाइ४इ। ओइ३४५इ। डा ॥
॥ १५ ॥ ८०

अथ तृतीया।

३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
सुतासोमधुमत्तमाःसोमाइन्द्रायमन्दिनः।

३ १ २ ३ १ २ ३ १ २
पवित्रवन्तोअक्षरन्देवान्गच्छन्तुवोमदाः॥ ३॥ ८१*

५ २ २ २ २ १२
(त्वाष्ट्रीसाम॥) सुतासोमा। धुमाऽत्तमाः। सो-

२ २ २ ३ २ २ १ २ २
माइन्द्राऽयमाऽ। ए३। न्दिनमा। पवाऽत्रवाऽन्तो

ययातिर्नाहुषऋषिः†। "पूषा" पोषकः सर्वेषाम्‡। "भगः" भजनीयः¶ "रयिः" धनहेतुः "अयं" सोमः "पुनानः" पवित्रे पूयमानः सन् "अर्षति" कलशमभिगच्छति। तथा "विश्वस्य" सर्वस्य "भूमनः" भूतजातस्य "पतिः" पालयिता§ "सोमः" "उभे" "रोदसी" द्यावापृथिव्यौ "व्यख्यत्" स्व-तेजसा प्रकाशयति। अनेन लोकद्वयपतित्वं सूचितम्॥ ॥ २॥ ८०

---

* स० १,२,१५,१= ऋ०७,५,१,४=ऋचौ २,२,३—२,२,३—२,२,४—७,१,२०—१५,२,२—१९,१,२—२०,१,१२—२७,१,१३—२२,२,११=ऋचौ २,१,१०—४,१,७—५,२,११—५,२,१२—६,१,१०—९,१,१५—६,२,२।

† 'नाऽहुषो मानवः'—इति ऋषि-नै०।

‡ 'पूषा पुष्णातेः। सोमः। अथवा पूषा आदित्यः'—इति वि०।

¶ 'भगः सर्व सोमः सौभनः'—इति वि०।

§ 'आदित्यात्मना'—इति वि०।

॥ 'विनियोगोऽस्य द्वितीयेऽपि'—इति वि०।

२ २३२ १ २ २ २ २३२
३। ए३। ह्वरन्ना। दाइवान्गच्छाइन्तुवाइः। ए३। मदा-
२
आ॥ १६॥

५ ४२ ५२ ४ ५ ४ १
(ऊर्ध्वं डत्वाष्ट्री॥) सुतासोमधुमत्तमाः। सोमा२
१ ३२ ३ ५ २१ २२
इन्द्रा२। यमाइ४५। दी२३४नाः। पवित्रवन्तोअक्ष-
३२२ १ १ २१२ २ १
रन्। देवानगच्छा। तुवोमा२३दाइ४३ः। ओ२३४५
इ। डा॥ १७॥

५ ४२ ५२ ४ ५ २ ४२ ५
(वासिष्ठम्॥) सुतासोमधुमत्तमाः। सोमाइन्द्रा।
२ १ ७ १२ २ १ २
यमन्दिनः। पावित्रावा२। तोअक्षरन्। दाइवान
२ ३ ५ २१ २ ४५ ४
गच्छौवा। तू२३४वाः। मदा। औइह्वोवा। हो५इ।
डा॥ १८॥

५ ४२ ५२ ४ ५ २ ४२
(आप्कारणिधनं त्वाष्ट्री॥) सुतासोमधुमत्तमाः। सो
५ २३२ १ ७ ३२ १ ७
माहाउ। इन्द्राइयामन्दिना२ः। इन्द्राइहो। यमा२

३ ५ २ १ ७ ३ २ १
दा२३४इनाः। पवित्रवाइन्तोअक्षारा२न्। क्षवाइहो।
७ ३ ५ २ २ २ १ २ ३ २
तो२क्षा२३४रान्। देवान्गच्छाइन्तूवो१मादा२ः। देवा
१ ३ ५ १ ३ ५ २ २ ३
इन्क्षोइ। गच्छो२३४हा। नूरवा२३४औहोवा। मदा-
१ १ १ १ १
इआ२३४५॥ १८॥

५ २ २ ५ २ २
(वासिष्ठम्॥) सुतासोमधुमत्तमाइए। सोमाइ
ऽर १ ७ १ १ ७
न्द्राइश्यामन्दिना२ः। दाइना२ः। पवित्रवाइन्तोअक्षा-
१ २ २ १ २
रा२न्। क्षारा२न्। देवान्गच्छाइन्तूवो१मादा२ः।
१ २ २ २ १ ३ ५ १ ३ ५ २
मादा२ः। देवाइन्क्षोइ। गच्छा२३४हा। तूरवा२३४औ
२ २ १ १ १ १ १
होवा। मदाइईर२३४५॥ २०॥

१ २ २ १ २ ३ २ १
(खारत्वाष्ट्री॥) सुतासोमाइहा। धुमत्तामा२ः।
१२ २ २ ३ २ १ १ २ २ २
सोमाइन्द्राइहा। यमन्दाइना२ः। पवित्रवाइहा। तो-
२ १ १२ २ २ ३ १ ५
अक्षारा२न्। देवान्गच्छाइहा। तुवोइहो२३४। वा।
४ ५
मापुदोइहाइ॥ २१॥

५ २ ३२ २ २ २
(द्विरभ्यस्तत्वाष्ट्री॥) सुता। सोमाइ। हाइहा।
२ १ २ २ ५२ ३ २ २ २ १ २
धुमत्तामाइ३४:। सोमा:। इन्द्राइ। हाइहा। यम
१ ५ ३ २ २ २ १२ २ १
न्दाइनाइ३४:। पवि। त्रवाइ। हाइहा। तोअच्छा
२५२ ३ २ २ २ १२ १
राइ३४न्। देवान्। गच्छाइ। हाइहा। तुवोइहोइ
५ ४ ५
३४। वा। माप्रदोइहाइ॥ २२॥

५ २ २ ४ ५ ४ ५ २२ १२
(वासिष्ठम्॥) सुतासोइमाधुमत्तमाः। सोमा
२ १ २ १ २ ३ ५ २ २
इन्द्रा। यमन्दिनः। पावाओइ३४वा। त्रवन्ताअचरन्।
१२ २ २ १ २१२ २ १
देवान्गच्छ। तुवोमाइ३दाइ४३:। ओइ३४५३। डा॥
॥ २३॥ ८१

ययातिर्नाहुषऋषिः*। "मधुमत्तमाः" अतिशयेन माधुर्योपेताः अतएव "मन्दिनः" मदकराः "सुतासः" अभिषुताः सोमाः "पवित्रवन्तः"† पवित्रे वर्त्तमानाः सन्तः "इन्द्राय" इन्द्रार्थम् "अचरन्" पात्रेषु चरन्ति। अथ प्रत्यृचस्तुतिः। "वः" युष्माकं

* 'विनियोगोऽस्य तृतीयेऽहनि'—इति वि०।
† 'दशापवित्रवन्तः'—इति वि०।

अथ चतुर्थी।

१ २ ३ १ २ ३ १ २ ३ १ २
सोमाःपवन्तइन्दवोऽस्माभ्यङ्गातुवित्तमाः।

३ २ ३ १ २ ३ १ २ ३क २र ३ १ २
मित्राःखानाअरेपसःस्वाध्यःसविदः॥ ४॥ ८२*

४ ५ २ १ ७ २
(कौच्चे द्वे॥) हाउसोमाः। पवाइन्ताइन्दावाउ।

२ १ १ ७ २ २
वाइ। हाउवा। अस्माभ्यङ्गातूवित्तामाउ। वाइ। हा

१र र र २ २ २
उवा। मित्राः खानाआरेइपासाउ। वाइ। हाउवा

५र ३ २ १ ४ २ ५
३४। सुवा। धियाइः। हइ२३वाइः। वाइ३४५इदोई३हा

इ॥ २४॥

५र र ३ २ ३ ४ ५ २ १ २ १ २ ३ २ १
सोमाः पवन्तइन्दवाः। अस्माभ्यङ्गा। तुवित्तमाः।

२ ३ ५ १र १र १र १ २ ३ र २ १ १
माइत्राओ२३४वा। खानाअरेपसः। सुवाधियाः। सुव

२ १
र्वा२३इदा३४३ः। ओ२३४५इ। डा॥ २५॥ ८२

"मदाः" मद--हेतवो रसाः "देवान्" इन्द्रादीन्† "गच्छन्तु"॥

॥ ३॥ ८१

* उ० ४,१,२०,१—ऋ० ७,५,२,५=ऊचे ३,२,१३—३,२,१४—३,२,१५—३,२,१६—१५,२,१६—१५,२,१७—१५,२,१८—१६,१,१—२३,१,१४=ऊचे ६,१,२०।

† 'यज्ञादीन्'—इति वि०।

अथ पञ्चमी।

३१२ ३१२ ३१२ ३१२
अभीनोवाजसातमꣳरयिमर्षशतस्पृहम्।
१२३१२ ३१२३१२
इन्दोसहस्रभर्णसन्तुविद्युम्नंविभासहम्॥ ५॥ ८३*

(सोमसामानि त्रीणि॥) ५२२ १३ अभीनोवा। ३२सा२३
५२२ १५ २१ २१२ १२
४ओंहोवा। ता२३४माम्। रयिमरिशतस्पृहम्। इन्दो

मनुः सांवरणऋषिः। "गातुवित्तमाः" अतिशयेन मार्गस्य लब्धकाः† "इन्दवः" दीप्ताः‡ सोमाः "पवन्ते" अस्मभ्यं मदर्थं "चरन्ति" आगच्छन्ति वा। कीदृशाः? "मित्राः" देवानां सखिभूताः "स्वानाः" अभिषूयमाणाः "अरेपसः" पापरहिताः अतएव "स्वाध्यः" शोभन-ध्यानाः "स्वर्विदः" सर्वज्ञाः॥

"स्वानाः"-"सुवानाः"—इति पाठो॥ ४॥ ८२

---

* उ० ५,१,१६,१ = ऋ० ७,४,२३,१ = ऊहे ५,१,३—५,१,४—५,१,५—५,१,६—५,१,७—५,१,८—१२,१,१५—१२,१,१६—१७,१,१२—१७,१,१३—१७,१,१४—१७,१,१६—१८,१,१०—१६,१,२—१६,१,६।

† "गातुः"—इति पृथिवी-नामसु विंशतितमं नैघण्टुकम् १,१। किञ्च निरुक्त-चतुर्थे—"गातुं यज्ञाय गातुं यज्ञपतय इत्यपि निगमो भवति। गमनं यज्ञाय गमनं यज्ञपतये"—इति च यास्कः।

‡ 'ओतिरिन्दुः'—इत्यादि नि० नै० प० २,१७।

१ ७ १ १ २
सहस्रभा२३हो । णसा२म् । तुविद्युम्नं विभा२३होये

२ ३
३ । सहमो२३४५इ । डा ॥ २६ ॥

५ २ २ १ २ २ १ २
अभीनोवा । जासातमम् । रयिम । षाउवा२३ ।

१ २ २ १ २ १ २ १
हेवा३हाइ । शतस्पृहम् । इन्दा२स । हाउवा२३ ।

१ २ २ १ २ १ ३ ५ २ २
हेवा३हा । सभर्णसम् । तुवाये३ । द्यू२म्ना२३४औहो

२ २ १ ३ १ १ १ १
वा । विभासहा२३४५म् ॥ २७ ॥

२ १ २ २ ४ २ ३ ५
अभी२हेाइ । नोवाजा३सा३ । हाता२३४माम् ।

२ १ २ ४ २ ३ ५ २
रयी२ऽहेाइ । अर्षशा३ता३ । हास्पृ२३४हाम् । इ

१ २ ४ २ ३ ५ २
न्दो२हेाइ । सहसा३भा३ । हार्णा२३४साम् । तुवा

१ २ ४ २ ४
२हेाइ । द्युम्नं वी३भा३ । हा३सा५हाई५६म् ॥ २८ ॥

२ १ २ ५ २ ३ २
(क्रौञ्चम् ॥) अभीनोवा३१२३४ । जसा । तमा३

२ १ २ ५ ३ २ २ १
म् । रयिमर्षा३१२२४ । शत । स्पृहा३म् । इन्दो

३ ५ ३ २ २ १ २
साहा३१२३४। सभ। णसा३म्। तुवाहद्यून्ना३१२३

४
म्। विभा५सहाउ। वा ॥ २८ ॥

४ र र र र ४
(सोमसाम॥) अभीनोवी हो५ज्मसातमाम्। रयि

र ४ र र ४
मषी हो५ग्नतस्पृहाम्। इन्दोसहो हो५ग्नभर्णसाम्।

र र ४ ५ ४ ५
तुविद्युन्नी हो५विभासहाम्। सहम। तुविद्युन्नंविभा६।

५ २ १११११
हाउवा। सहा३मे२३४५ ॥ ३० ॥ ८३

अम्बरीषऋजिश्वानौ* हावहो। हे "इन्दो" दीप्यमान सोम! "वाजसातमम्" अत्यन्तं बलप्रद मन्नप्रदं वा धनं पुत्रं "नः" अस्माकम् "अभ्यर्ष" अभिगमय। कीदृशम्? "शतस्पृहं" बहुभिः स्पृहणीयम्। "सहस्रभर्णसं" बहुविधभरणम् अनेक-पोषण-युक्त मित्यर्थः। "तुविद्युम्न" [द्युम्न द्योततेर्यशो वान्नं वेति‡ यास्कः] बह्वन्नं बहुयशोयुक्तं वा। "विभासहं"¶ महतः प्रकाशस्याभिभवितारम् अतितेजस्विन मित्यर्थः॥

---

* "अम्बरीषः वार्षागिरः"—"ऋजिश्वा भारद्वाजः"—इति ऋषि-नै०।

† अर्षेति ऋषतेर्गति-कर्मणो रूपम् (१,१४)।

‡ "द्युम्नं द्योततेर्यशो वान्नं वा "अन्ने द्युम्न मधि रत्नञ्च धेहि" अन्नाद्यं द्युम्नं च रत्नं च धेहि"—इति निरु० नै० ५, ५।

¶ "विभा[illegible]" अस्योऽसौ एकचात्वारिंशे ऽनुवाके त्रिवेद-संहितास्विति ध्येयम्।

अथ षष्ठी।

३ १ २ २१२ २।१२ २२ ३ १ १
अभीनवन्तेअदुहः प्रियमिन्द्रस्यकाम्यम्।
२ २७ ३।१२ २२ ३ १ २ २ १ २
वत्सन्नपूर्वआयुनिजातꣳरिहन्तिमातरः॥ ६॥ ८४

(आङ्गिरसानि चीणि॥) ३ ५ १
आ२३४भी। ओइनवन्त
२ १ २ २
आङ्गू१द्वा२ः। ओइप्रियमिन्द्रस्यकामा१या२म्। ओइ
२ २ १ २ २
वत्सन्नपूर्वआयू१नी२। ओइ। जातꣳरिहन्तिमो१२३
४ ५ ४ ५
४। वा। ताभूरोईद्वाइ॥ ३१॥

५ २ १ २ ४ २
अभी। नवी३२। तआ५दुहाः। प्रियामिन्द्रा३।
१ २ ३ ५ २ १ २ ३ ५
स्याकामा२३४याम्। वत्सन्नपू३। र्वाआयू२३४नी।
१२ २ १ २ १ २१२ २ १
जाता३ꣳद्वोइ। रिहा३द्वो। तिमाता२३रा३४३ः। ओ
२३४५इ। डा॥ ३२॥

"ग्रतस्पृहं"-"पुरस्पृहम्"—इति,"विभासहं"-"विश्वासहम्"—इति च साम्न ऋचः पाठः॥ ५॥ ८३

---

* ऋ० ७,४,२७,१=आरण्ये १,२,२४—१,१,३—३,१,४—४,१,१२।

अथ सप्तमी।

१ २ १ २३ २ ३ १ २ ३ १ २
आदर्यंतायधृष्णवेधनुष्टन्वन्ति*पौंस्यम्।

३ २उ ३ १ २ ३ १ २ ३ १ २ ३ १ २
प्रुक्राविययन्त्यसुरायनिर्ण्जेविपामग्रेमहीयुवः ॥ ७॥८५†

५ ४ र ५ र ४ ५ ४ ५ ४ र ५
अभीनवन्तेअद्रुहः। ओहाइ। प्रियमिन्द्रस्यकामि

४ ५ ४ र ५ ४ र ५ र ४ ५
यम्। ओहाइ। वत्सन्नपूर्वआयुनि। औहोवाहा

१ २ ३ ५ २ १ ५ ४
इ। जातंरिहन्तीवा। तीव्रास्मा। तरा। औहो

५ ४
वा। हो५इ। डा॥ ३३ ॥ ८४

ऋभ-सूनू काश्यपौ ऋषी‡। यथा "मातरः" गावः "पूर्वे" प्रथमे "आयुनि"¶ वयसि "जातं" वत्सं "रिहन्ति" लिहन्ति तथा "अद्रुहः अद्रोहाः वसतीवर्याख्या आपः इन्द्रस्य "प्रियं" काम्यं सर्वैः काम्यमानं सोमम् "अभि नवन्ते"§ अभिगच्छन्ति ॥ ॥ ६ ॥ ८४

---

* "घनुस्तन्वन्ति"—ऋ०।

† ऋ० ७,४,२५,१।

‡ ऋषी परस्मात्ये त्यर्थः। न चात्र यथासङ्ख्यम्।

¶ "आयवः"—इति मनुष्य-नामसु सप्तदशं नैघण्टुकम् (२,३)। इह तु तस्यैव जीवतो वयोऽर्थता चेष्टा भगवतः सायणस्य।

§ "नवते"—इति गति-कर्मसु कतिचित् यत्समभ्यैघण्टुकम् २,१४।

(गृत्समदस्य सूक्तानि चत्वारि॥) ३ २ १ आ३। ओ२३

५ २ १ २ १ ऽ २ ३ २ १ ५ २
४वा। र्यतायष्णवे२। धनू३ः। ओ२३४वा। तन्व

१ २ २ ३ २ १ ५
न्तिपौंस्यम्। भृक्ता३ः। ओ२३४वा। वियन्त्यसु

२ २ १ ऽ २ ३ २ १ ५ १ ऽ २ २
रायनिर्णिजे२। विमा३। ओ२३४वा। अग्रे२मही

१ १ १ १ १
युवा२३४५ः॥ २४॥

२ २ १ ७ २ ३ ५ २ २
ह्वा३ह्वाइ। आदर्यता। या२३४धृ। ह्वा३ह्वा३४।

५ २ २ ३ ५ २ २ १ २
औहोवा। ष्णा२६४वे। ह्वा३ह्वाइ। धनूष्टान्वा।

३ ५ २ २ ५ २ ५ ३ ५
ती२३४पौ। ह्वा३ह्वा३४। औहोवा। सी२३४याम्।

२ २ १ २ २ १ ७ २ ३ ५
ह्वा३ह्वाइ। भृक्तावियं। ताअसुरा। या२३४नो।

२ २ ५ २ २ ३ ५ २ २
ह्वा३ह्वा३४। औहोवा। णो२३४जे। ह्वा३ह्वाइ।

१ २ ३ ५ २ २ ५ २ २
विपामाग्रार्इ। मा२३४हो। ह्वा३ह्वा३४। औहोवा।

३
यू२३४वाः॥ २५॥

४ ५३र ५ ४ ५ ४ ० २ १
आहर्यतायधृष्णवआ। धनूष्टा१न्वा२। तिपौ१ए
२ १ र २ १७ २ १ ३
सा१या२म्। प्रुक्षावियं। ताअसुरा३। यानी२र्णा२३४
५ १ २ १ ४
इजाइ। विपामा१ग्रा२इ। ओइ। मा२३ह्वो३।
२ ५
यू३४५वोइहाइ ॥ ३६ ॥

३ ५ १ ५ २ ४ ५ १
आ४हर्य। ता४यधृ। ष्णाइवोधनुष्टन्वा। तिपौ
३२ १ र २ १७ २ ३२
ए्सियाम्। प्रुक्षावियं। ताअसुरा। यनाउवाइ।
५ १ २ २ १ २ १र
णो२३४जे। वाइपाइए्हाइ। आग्रेइहाई। महीयू
२ १
२३वा३४३:। ओ२३४५इ। डा ॥ ३७ ॥ ८५

"हर्य्यताय"* सर्वैः स्पृहणीयाय "धृष्णवे" शत्रूणां धर्षणशीलाय सोमाय "पौंस्यं" पुंस्त्वस्याभिव्यञ्जकं वरं "धनुरातन्वन्ति" धनूषि ज्यां कुर्वन्तीति सोमस्य धारा-विसर्गार्थं वितायमानं पवित्र मभिधीयते। तदेव विवृणोति—"विपां" मेधाविनां "अग्रे"† पुरस्तात् "महीयुवः"‡ पूजाकामा अध्वर्यवः

* 'आहर्यतिः प्रेप्साकर्मः'—इति वि०।

† 'अग्रे प्रथमे'—इति वि०।

‡ 'महस्योमं मिश्रयन्ति रसाधः उदकानि वा'—इति वि०।

अथाष्टमी।

२३ १ २ ३ १२ २२३ १ २ ३ १ २
परित्यꣳहर्यतꣳहरिम्बभ्रुम्पुनन्तिवारेण।

२ ३उ ३ २उ ३ १ २ ३ १२ २२
योदेवान्विश्वाꣳदूत्यरिमदेनसद्दगच्छति ॥ ८ ॥ ८६*

(द्विरभ्यस्तमाकूपारम्॥) ३ ४ ३ ४ ३ ४
परित्यꣳहर्यतꣳहरिम्।

३ २ ४ ३ ४ ३
पा२३४। रित्यꣳहौहो५र्यतꣳहराहम्। बभ्रुम्पुनन्ति

२ ४२ ५ १ २ २ ४२ ३२ ४२
वारेण। वा२३४। भ्रुम्पुनौहो५न्तिवारेणा। यादे

"शुक्रा"† शुक्लवर्णानि गो-पयांसि "असुराय"‡ बलवते "निर्जिजे" स्वरूपाय शोधनार्थं "वयन्ति"¶ आच्छादयन्ती-त्यर्थः॥

"शुक्रावियन्त्यसुरायनिर्जिजे"-"शुक्रांवयन्त्यसुरायनिर्जिजम्" —इति साम ऋचः पाठौ॥ ७॥ ८५

---

* उ० ५,२,१८,१—८,२,८,३ = ऋ०७,४,१४,१ = ऋदे५,२,१८—५,२,१९—५,२,२०—६,१,१—६,१,२,— ६,१,३—१२,२,१— १२,२,२—१४,२,१६—१४,२,१७—१४,२,१८—१४,२,१९—१४,२,२०—१४,२,२१ —१७,१,८—१७,१,९—१७,२,२—२०,२,४ = ऋदे ४,२,१।

† 'शुक्राः शुचिवर्णाः'—इति वि०।

‡ 'असुराय बलाय बलदानवते'—इति वि०।

¶ वयन्तीति पाठस्तु ऋग्वेदीयः। तमेवायमस्मद्ग्रन्थेऽत्र व्याख्यान भगवता सायणे-नेति बोध्यम्। सामवेदीय-पाठस्तु वियन्तीति।

अथ नवमी।

१ २ ३ १र २र ३ २ ३ १ २ ३ १र २र
प्रसुन्वानायान्धसोमर्त्तानवष्टतद्वचः।

३ १ २ ३१ २ ३ २ ३ १र २र
अपस्वानमराधसꣳहतामखन्नभृगवः ॥ ९ ॥ ८७*

॥ प्रथम-दशति ॥

१र ४र ३ ४ ५ १ र र र र ४
वान्विश्वाꣳइत्यरि। यो२३४। देवान्वौहो५श्वाꣳइत्य

३ ४र ३ ४ ५ १ र र
राइ। मदेनसहगच्छति। मा२३४। देनसौहो५च्छ-

४ ५
ग। च्छाप्रतोईहाइ ॥ ३८ ॥ ८९

ऋजिश्वाम्बरीषाऋषीः। "हर्यतः" सर्वैः स्पृहणीयं "हरिं हरितवर्णं "बभ्रुं" बभ्रुवर्णं च "त्वं" तं सोमं "वारेण" वालेन पवित्रेण "परिꣳ पुनन्ति" परिशोधयन्ति। "यः" सोमः "विश्वान्" सर्वानिन्द्रादीन् "देवानित्" देवानेव "मदेन" मदकरेण रसेन सह "परिꣳ गच्छति" इति § ॥ ८ ॥ ८९

---

* उ० ६,२,३,१—१,२,२३,३ = ऋ० ७,५,३,३ = ऊहे१,२,१७— १,२,१८—६,२,१७—६,२,२०—११,२,२—११,२,३—११,२,१३—१५,१,१६—१६,१,१४—१८,१,१७—१९,२,१९—१९,२,२०—१९,२,२१—२२,२,७ = ऊह्ये २,१,४—३,२,४—६,१,६।

† "ऋजिश्वा भारद्वाजः—अम्बरीषो वार्ष्णेयः"—इति ऋषि-नै०।

‡ 'परि समन्तात्'—इति वि०।

¶ 'परि देवं लक्षयित्वा'—इति वि०।

§ 'विनियोगोऽस्य नवमेऽहनि'—इति वि०।

२१ ४२ ५ १२
(वैरूपम् ॥) प्रसुन्वा२३नायान्धसाः । मर्त्तः ।
१ ३२३ ५ २ २ ३२ ३ ५
नवा२ । ष्टतद्वा२३४चाः । अपस्वानमरा । धा२३४सा-
२१२ २ ३२ ४
म् । ष्टतामा२३खम् । नभू३गापूवा६पूः ॥ ३९ ॥ ८७

॥ इति अष्टमः प्रपाठकः ॥

प्रजापतिर्ऋषिः* । "सुन्वानाय" अभिषूयमाणाय [षष्ठ्यर्थे चतुर्थी†] अभिषूयमाणस्य "अन्धसः" सोमस्य "तत्" प्रसिद्धं "वचः" वचनं योषं "मर्त्तान" मर्त्य इव कर्म-विघ्न-कारी "तवष्टन" कामयतां न शृणोत्विति यावत् । तथा हे स्तोतारः "अराधसं" साधक-कर्म-रहितं‡ । "खानम्" "अपहत" । तत्र दृष्टान्तः—"मखन्न"¶ यथा पुरा अराधसं मखम् एतन्नामानं भृगवोऽपहतवन्तः तथा अपहतेत्यर्थः ॥

"सुन्वानाय"-"सुन्वानस्य"—इति, "वष्ट"-"ष्टते"—इति च सामन्न ऋचः पाठः ॥ ९ ॥ ८७

इति श्रीमत्सायणार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने पञ्चमस्याध्यायस्याष्टमः खण्डः ॥ ५ ॥

॥ इत्यानुष्टुभम् ॥

---

* "वाग्रः"—इति ऋषि-नै० ।

† "षष्ठ्यर्थे चतुर्थी ति वाचम् (२, ३, ६२)"—इति का० वा० ।

‡ "अधनं धन-रहितम्"—इति वि० ।

¶ "ष्टतामखम्"—इति मन्त्र-पाठस्य 'ष्टता'—'मखम्'—इति पदकारस्य छेदः ।

जगत्योऽभिप्रियाणीति मुख्या द्वादश सम्मताः* ।
आद्यास्तिस्र ऋचो दृष्टाः कविनाम्ना महर्षिणा ।
उत्तरा विप्रकीर्णत्वाद्दृश्यन्ते ऋषयः पृथक्† ॥

अथ नवमे खण्डे—

सैषा प्रथमा ।

३ २ ३१ २ ३ १ २ ३
अभिप्रियाणिपवतेचनोहितो

१ २ ३ २उ ३ १३१ २
नामानियह्वोअधियेषुवर्धते ।

१ २र ३ २ ३ १उ ३
आदर्यस्यवृषतोबृहन्नधि

२ ३ १ २ ३ २
रथंविश्वञ्चमरुद्वद्विचक्षणः ॥ १ ॥ ८८ ¶

भगवान् सायणोऽपि तथैव व्याख्यातवान् । अत्र नये धतेत्याकारस्य द्व्यचोऽतस्तिङ इति (६,३, १३५) दीर्घे 'धता'—इति रूपम् ॥ विवरणकारस्तु 'धत'—'अमन्त्रम्'—इत्येवं छेदं स्वीकृत्य 'अमन्त्रं यज्ञ-वहिष्कृतम्'—इति व्याचष्टे ।

* अत्र नवमे खण्डे अभिप्रियाणीत्याद्याः द्वादश ऋचः सम्मताः पूर्वाचार्यैरिति शेषः ।

† "कविः भार्गवः"—इति ऋषि-नैः ।

‡ तत्र द्वादशसु आद्यास्तिस्र ऋचः कविनाम्ना महर्षिणा दृष्टाः । उत्तराः ऋचः नैकेन दृष्टा इति तत्र ऋषि-विप्रकीर्णत्वम् तस्मात् तत्र ऋषयः पृथग् वक्ष्यन्ते ।

¶ उ० १,१,१८,१=ऋ० ७,२,२३,१= आरण्ये २,१,६ अत्रे =१,१,१२—८,१,२—१४,१,१८—१८,१,१५—१९,१,१४=उत्रे १४,१,१—१४,१,१९ ।

ओम् ॥ (कावम् ॥) आभिप्रीर२३४या । णोपावार२३४
ताइ । चानोद्दिता२३ः । नामानीर२३४या । क्रोअधी
२३४ये । षूवर्द्धतायै३ । आह्वरीर२३४या । स्याबृहा
२३४ताः । बृहन्नधायै३ । राथंवा२३४इषा । चामाह
२३४चात् । विचा३१उवा२३ । चा२३४णाः ॥ १ ॥

(ऐडकावम् ॥) ए५ । अभिप्रियार२ । णिपवताइ ।
ए५ । चनोहिताः । ए५ । नामानीयार२ । क्रोअधि
याइ । ए५ । षुवर्द्धताइ । ए५ । आह्वरियार२ । स्य
बृहताः । ए५ । बृहन्नधी । ए५ । रथंविषार२ । चम
हचात् । ए५ । विचक्षणाः । धो५इ । डा ॥ २ ॥

(वाजसनि ॥) अभ्यौद्दोवाहाइप्रियाणी । पवता
इचा२३४नो । हिताः । नामानियक्रोअधियेषुवर्द्धताइ ।

२र १ २ र १ २१ २ १ १
आह्वर्थस्यावृतोवृत्रघाद्। रथम्। वाद्यच्चमरुत्। विचा२१उवा२३। त्रा३णा२३४५:॥ २॥

(वाजजित्॥) २ १ २र १ १ अभिप्रिया। णीपवताद्। हो३हो वा३हो३ये३४। चनोहिताः। हाहो। वाहाद्। ना मानिया। क्रोअधियाद्। हो३हो३वा३हो३ये३४। ध्रुव ४ ५र ४ ५ २र १ २र १ ५ ईताद्। हाहो। वाहाद्। आह्वरिया। स्यावृताः। हो३हो३वा३हो३ये३४। वृत्रघी। हाहो। वाहाद्। रथंविष्वा। चामरुहान्। हो३हो३वा३हो३ये३४। विच ४ ५र ४ ५ ५ २र १र २ १ त्रा३णाः। हाहो। वाई३हाउ। वा। वाजीजिगी३वा २१॥ ४॥

(वाजजित्साम॥) २ १ २र १ २र १र अभिप्रिया। णीपवताद्। चानो हिताः। हो३वा३हो३। नामानिया। क्रोअधियाद्। २र १ २ १ २र र १ २र १ धूवङ्ईताद्। हो३वा३हो३। आह्वरिया। स्यावृताः।

२ २ १ २ १ २ २ १
बृहन्नधाद्। हेवाऽहे। रथंविषा। चामरुहात्।

२ २ १ २ १ ३ ५ २ २ १ २
वीचक्षणाः। हेवाऽहे। वाऽ३४औहेवा। वाजी

२ २ १ २ २ १ ऽ २ १ १ १ १
जिगीवाविश्वाधनाऽनीऽ३४५॥ ५॥

५ ४ २ १ २ २
(खारकावम्॥) अभ्योवा। प्रियाणिपवताद्। च

२ १ १ २ २ २ १ २
नोहादूताऽः। नामानियक्षोअधियाद्। षुवद्वाताऽद्।

१ २ २ २ १ २ ४ ५
आद्दर्यस्यबृहतो। बृहन्नाधोऽ३। राथाऽ३०वाद्घा।

२ १ १ २ ४
चमरुहाऽ३त्। वाद्चाऽत्तापूणाऽ५६ः॥ ६॥ ८८

"चनोहितः" [चन इत्यन्ननाम* चायतेरसुनि चन इत्यौणादिक-सूत्रेण निपातितः] चनसेऽन्नाय हितः। यद्वा। हिताच्चः सोमः "प्रियाणि" जगतः प्रीणयितृणि नामानि नमनशीलानि तान्युदकानि "अभिपवते" अभितः क्षरति करोति। "येषु" अन्तरिक्ष-स्थितेषु उदकेषु "यक्षः" महानहं सोमः "अधि

* "अहीन्द्र प्रोक्षणानीमानि स्त्रीणि चनो दधिष्व। चन इत्यन्ननाम"—इति नै० ६, १६।

अथ द्वितीया।

३ १ २ ३ १ २ ३
अचोदसोनोधन्वन्त्विन्दवः
२ ३ १ २ ३ २ ३ २ १ २
प्रस्वानासोबृहद्वेषुहरयः।
१ २ ३ २ ३ २ ३ १ २ ३
विचिदस्नानाद्षयोअरातयो
१ २ ३ १ २ ३ १ २
र्योनःसन्तुसनिषन्तुनोधियः॥ २॥ ८९*

(आङ्गिरसानि त्रीणि॥) २ २ १ अचोदासो२३। २ १ नोधनूवा
२३। २ १ तून्दवाः। २ २ १ प्रस्वानासो२३। २ १ बृहद्वाद्वे३३। २ षू
१ २ १ हरयाः। २ १ विचिदास्ना२३। २ १ नाद्षाया२३ः। २ १ आरातयाः।

वर्द्धते" अधिकं प्रवृद्धो भवति। अपां मध्ये सोमो वसति खलु। ततः "बृहन्" महान् सोमः "बृहतः" महतः परिवृढस्य "सुघस्य" "विष्वञ्च" विष्वग्गमनं रथम् "अधि" उपरि† "विचक्षणः"‡ विश्वस्य द्रष्टा सन् "आरुहत्" आरोहति। "अग्नौ प्रास्ताहुतिः सम्यगादित्य मुपतिष्ठते(म० २,७६)"—इति ॥१॥ ८८

* ऋ० ७,३,४,१।

† 'अधि उपरि आदित्यमण्डलात् चतुर्थं मण्डलं रथं विष्वञ्चं नाम"—इति वि०।

‡ 'विषक्षणः विविधं प्रकाशयन इत्यर्थः'—इति वि०।

२ २ १ २२ १ २२ १२ २ १
अर्यानाःसा२३। तूसनाइषा२३। तूनाधिया३१उवा२-
१ १ १
३४५ ॥ ७ ॥

१ २२ ३ २ २२४ ५ ४ ५ १ २२
आचोदसो। नोधनुवन्तु। इन्दवाः। प्रास्वा
२ २ २ ३ ४ २२५ ४ ५ १ २ ३ २ २२४
नासो। बृहद्देवेषु। हरयाः। वाइचिदश्वा। नाइ
२ ५ ४२ ५ १ ३२ ३ २ ३ ४ ५ ४
षयोअ। रातयाः। अर्यानःसा। तुसनिष। तुनो
धुधियाउ। वा ॥ ८ ॥

२२ २ २ २ २२ १ २ ४
हाउहोवाइहाइ। अचोदसोनो३धा। नुवाइन्तू
२ ३ १ १ १ १ २२ २ २ २ २ २
३। इन्दवा२३४५ः। हाउहोवाइहाइ। प्रस्वानासोवृ३
१ २२ ४ २ ३ १ १ १ १ २२ २ २
इहात्। देवे३षू३। हरया२३४५ः। हाउहोवाइहाइ।
२ २ १ २ ४ २२ ३ १ १ १ १ २२
विचिदश्वानाइआइ। षयोइआ३। रातया२३४५ः। हा
२ २ २ १ २ ४ २२
उहोवाइहाइ। अर्यानःसन्तू३सा। निषाइन्तू३। नोधि
१ १ १
याइउवा३४५ ॥ ९ ॥

(सामराजम्॥) अचोहाइ। दासोनोधनुवा। तु
इन्दावा२:। प्रस्थानासोबृहद्देवाइ। षुचरायार२:। वि
चो२३४हाइ। अग्नो२३४हाइ। नाइषय:। अरो२३४
हाइ। तायाः। अर्यो२३४हाइ। नःसो२३४हा। तू
सानो२३४षा। तूनाइउवाइ। धी२३४याः॥ १०॥

(सामराजम्॥) अचौहोवा। दासोनोधनुवाः।
तुइन्दावा२:। प्रस्थानासोबृहद्देवाइ। षुचराया२३:।
वाइचीइदाग्ना। नाइषा२३४या। होइ। अराता२
३४याः। होइइ। आर्यो३नाःसा। तूसानो२३४षा।
हो। तुनोइधापयाईयुईः॥ ११॥

(सिमानांनिषेधः॥) अचो। वाहाइ। दासो
नोधनुवा। तुइन्द्रावाः। प्रास्थानोसोबृहद्देवाइ। षुच

१ १ २ १ २ २ ४
राया२३ः। वा२३इचीत्। आ२३। आ३४। नाइ
३ ४र ५र २ ६ २ १ २
षयोअरा। ताइयाः। आ२३र्या। नाइ२ःसा३४।
३ ४ ५ ३ २ ४
तुसनिष। तुनोइधाऽयाई५ईः॥ १२॥ ८९

"अचोदसः"* अचोदनाः अनन्यप्रेरिताः "इन्दवः" सोमाः "नः" अस्माकं† "प्रधन्वन्तु" प्रगच्छन्तु [धन्वतिर्गति-कर्माऽ‡]। कुत्र? "बृहद्देवेषु हरयः" प्रभूत-देवयुक्तेषु यज्ञेषु [यथा वा बृहद्देवकुलजेषु मध्यते इति सम्बन्धः] कीदृशा इन्दवः? "स्वनासः" स्रूयमानाः "हरयः" हरितवर्णाः¶। किञ्च। "अरातयः" धनादि-दान-रहिताः "नः" अस्माकम् "अर्यः"§ अरयः "इषयः" इषोऽन्नानि इच्छन्तः "अन्नानाः"॥ अन्नेन भोजनेन वियुक्ता एव सन्तु। किञ्च। नोऽस्माकं "धिया" कर्माणि देव--विषयाणि स्तोत्राणि+ "सनिषन्तु" देवान् सम्भजन्तु॥

---

* 'चोदयति'—इति वि०।

† 'नः अस्मान्'—इति वि०।

‡ निघ २,१४,६४।

¶ 'हरयः हरण्यीलाः'—इति वि०।

§ 'अर्यः स्वामिनः'—इति वि०।

॥ 'अन्नानाः विनाशयन्ति'—इति वि०।

+'धियः कर्माणि प्रज्ञा वा'—इति वि०।

अथ तृचीया।

३२७ ३ १ २ ३
एषप्रकोशेमधुमाꣳअचिक्रद-
१ २ ३२३ १२३१२
दिन्द्रस्यवज्रोवपुषोवपुष्टिमः।
३ २ १ ३३१२ ३१२
अभ्यृतस्यसुदुघाघृतश्चुतो
३ १ २ ३१२ ३१२
वाश्राअर्षन्तिपयसाचधेनवः॥ ३॥ ९०*

२१ १
(वासिष्ठम्॥) एषप्रकोशे२। म। धुमाꣳ२।
१ २ ३ ५ २१ २१ १ ३
अचाइक्रा२३४दात्। इन्द्रास्यवाज्रा२ः। पुषो२। व
३ ५ २१२१ १ ३
पुष्टा२३४माः। अभाऋतास्या२। सु। दुघा२ः। घृ
२ ३ ५ २१२ २१ १
ताश्चू२३४ताः। वाश्राअर्षान्ती२। प। यसा२३।
२ ४
चधा३इनापूवा९५६ः॥ १३॥ ९०

"देवेषु"—"दिवेषु" इति पाठो॥ "विचिदश्राना इषयो अरातयोयाँ नः सन्तु सनिषन्तु नः धिया"—इति छन्दोगाः। "विचिनयन्न इषो अरातयोर्यो नः सन्तु सनिषतनो धिया" बह्वृचाः॥ २॥ ८९

* ऋ० ७,३,१,१।

अथ चतुर्थी।

१ १ २ २ १ १ २ १ २७
प्रोअयासीदिन्दुरिन्द्रस्यनिष्कृतꣳ
२ २ १ १२ २८ २ १ २
सखासख्युर्नप्रमिनातिसङ्गिरम्।

"एषः" अयं सोमः "मधुमान्" मधुर-रसः "कौशे" द्रोण-कलशे "प्राचिक्रदत्" प्रकर्षेण शब्दायते। कीदृश एषः?"इन्द्रस्य" "वज्रः" वज्रस्थानीयः बलकरत्वेन वज्रवत् प्रहरण-साधनत्वाद् वज्रलोपचारः*। "एषः" एव हि सोमः "वपुषः" वीजानां वप्तुरन्यस्मात् "वपुष्टमः"† अतिशयेन वप्ता। वीजावापस्य सोम-कर्तृकत्वात् [सोमो वै रेतोधा इति श्रुतेः]। "ऋतस्य" सत्यफलस्य सोमस्य धारा इति शेषः। ता "अभ्यर्षन्ति" अभि-गच्छन्ति‡। कीदृश्यः? "सुदुघः" सुष्ठु दोग्ध्र्यः फलानाम्। "घृत-श्युतः" उदकस्य रसस्य वा क्षारयित्र्यः "वाश्राः" शब्दयन्त्यः§। पयसा युक्ता वाश्रा धेनव इवꣳ सुप्तोपममेतत्॥

"वपुष्टमः"-"वपुष्टरः"—इति, "अभ्यृतस्य" "अभीऋतस्य"—इति, "पयसा च धेनवः"-"पयसेन धेनवः"—इति च छन्दोग-बह्वृचानां पाठाः॥ ३॥ ८०

---

* 'पीते वज्रं क्षेप्तुं समर्थः'—इति वि०।

† 'दीपितारः'—इति वि०।

‡ 'अर्षन्ति क्षरन्ति'—इति वि०।

§ वाश्राः कामयमानाः'—इति वि०।

§ 'क्षरन्ति पयः धेनव आदित्यरश्मयश्च'—इति वि०।

१ २ ३ २ ३ १ २ ३
मर्यइवयुवतिभिःसमर्षति

१ २ ३ १ २ ३ १ २ ३ २ ३
सोमःकलशेशतयामनापथा ॥ ४ ॥ ९१ *

२ ३ ४ ५ १ ४
(लौशम् ॥) प्रोया२३४सीत्। इन्दुरिन्द्रा२३। स्या

२ ३ ५ ३ २ ३ ४ ५ १ ४ २ ३
३निष्कृतम्। सखासख्युः। नप्रमिना२३। तौ३सङ्गि

५ ३ २ ३ ५ १ ४ २ ३ ५ ३ २ १
रम्। मर्यइव। युवतिभा२३इः। सा३मर्षति। सोमः

२ ५ १ २ २ ४
कला। शेशतया२३। मनाउपापृथा६५६ ॥ १४ ॥

३ २ ४ २ २ ३ ४ ३ ४ ५ ३ २
(उत्तरलौशम्॥) प्रोयासीदिन्दुरिन्द्रस्यनिः। क्रता

३ १ १ १ १ ३ २ ५ ४ ५ २
म्। क्रता२३४५म्। सखा३१२३४। सख्युर्नप्रमिना

४ ५ ४ ५ ३ २ ५ ४ ५
तिसम्। गिराङ्गिराम्। मर्या३१२३४ः। इवयुवतिभिः

४ ५ ४ ५ ४ ५ ३ २ ५ ४ ५ २
सम। षताइषताइ। सोमा३१२३४ः। कलशेशतया।

३ २ ४
मनाउपापृथा६५६ ॥ १५ ॥

---

१ उ० ४,२,७,२ = ऋ० ७,३,१५,१ = जगे ४,१,७—९,२,१०—७,२,११—१७,१,५—२३,२,१५—२६,२,१८।

(प्रवङ्गार्गवम्॥) प्रोऽयासाइत्। इन्दुरिन्द्रा। स्या

२निष्कृताम्। सखासख्युः। नप्रमिना। ता२इसङ्गि

राम्। मर्यइवा। युवतिभाइः। सा२मर्षताइ। सो

मः कला। शेशतया। मा२नापथा२१उ। वा२३४५॥

॥ १६॥

(तन्त्रम्॥) प्रोऽयासाइत्। इन्दुरिन्द्रा। स्या

निष्कृता२३म्। सखासख्युः। नप्रामिना। तिसङ्गा

२३४इराम्। मर्यइवा। युवतिभाइः। सामर्षतायेइ।

सोमःकला। शेशातया। मनाइपा५था६५६॥ १७॥

(याममम्॥) आ२इ। इया। प्रोऽयासाइदिन्दु

रिन्द्रा२३। स्याइनिष्कृतम्। सखासख्युर्नप्रमिना-

२३। तीइसङ्गिरम्। मर्यइवायुवतिभा२३इः। साइम

३ ५ १ २ २
र्षति। आ२इ। इया। सोमः कलाशे१शतया२३।

२ ४
मनाश्पापूथाई५ई ॥ १८ ॥ ९१

ऋषिगणऋषिः*। "इन्दुः" सोमः "इन्द्रस्य" "निष्कृतं" संस्कृतं स्थान मुदरं "प्रो अयासीत्" प्रकर्षेणैव गच्छति। गत्वा च "सखा" सखिभूतः सोमः "सख्युः" इन्द्रस्य "सक्थिरं" सम्यग्गिरणाधारभूत मुदरं† "न प्रमितानि"न हिनस्ति। किञ्च। सः "मर्य इव"‡ "युवतिभिः" मर्त्यो यथा तरुणीभिः सह सङ्गतो भवति तद्वत् अय मपि सोमो युवतिभिर्मिश्रणशीलाभिर्वसतीवरीभिरद्भिः सह "समर्षति" सङ्गच्छते अभिषवकाले। स च सोमः "शतयामना" यान्ना अनेकया मनसाधनच्छिद्रोपेतेन "पथा" मार्गेण दशापवित्रसम्बन्धिना "कलशे" द्रोणकलशे गच्छतीति शेषः। यद्वैकमेव वाक्यम्। यथा मर्यो युवतिभिः सह सङ्गच्छते एवं कलशे शतयान्ना पथा सङ्गच्छतेऽद्भिः॥

"शतयामना"-"शतयान्ना"—इति पाठो॥ ४ ॥ ९१

---

*"सिकतानिवारो"—इति ऋषि-मै०।

† 'सक्थिरं सुतम्'—इति वि०।

‡ 'निष्कृतं समवायम्'—इति वि०।

¶ 'मर्त्यः'—इति मनुष्यनामसु एकादशं मैघण्टुकम् २,३। "इन्दसिनिरर्क्र (पा० ३,१,१२३)"—इत्यादिना सिध्यति मर्यइति।

अथ पञ्चमी।

३ २ ३ १ २ ३ २ ३ २ ३
धर्त्तादिवःपवतेकृत्व्योरसो

१ २ ३ १ २ ३ २ ३ १ २
दक्षोदेवानामनुमाद्योनृभिः।

१ २ ३ २ ३ ३ १२ २२ ३
हरिःसृजानोअत्योनसत्वभि

२ ३ १ २ ३ २
र्वृथापाजाँसिक्षणुषे*नदीष्वा॥ ५॥ ९२†

(वात्सप्रिरसो दे॥) २ १ २ ४२
धर्त्तादाइवाइ। ओवा५ए।

२ २ १ २ ४२ २ १ २
पवतेकृत्वीइयोरासाइ। ओवा५ए। दक्षोदाइवाइ।

४२ २२ २ १ २ ४२ २
ओवा५ए। नामनुमादीइयोनभाइ। ओवा५ए। हु

१ २ ४२ २२ २ १ २
राइःसार्जाइ। ओवा५ए। नोअतियोनाइसात्वाभाइ।

४२ २ १ २ ४२ २
ओवा५ए। वृथापाजाइ। ओवा५ए। सिक्षणुषाइन

१ २ ४२ ४
दाइषूवाइ। ओवाइए। हो५इ। डा॥ १९॥

---

* "क्षणुते"—इति ऋग्वेदीय-पाठः।

† उ० ५,१,१२,१ = ऋ० ७,९,१,१ = चारणे १,२,४—१,२,२५—१,२,२६—१,२,२७—१,९,२८ = जङ्घे ४,२,१४—९,१,१६—१५,१,१५—१७,१,२०—२३,२,१६—२९,२,१९ = जङ्घे ३,१,१०—४,१,४।

५ २ २ ४ ५ २ १ २ ३२ ऽ
धर्त्ताऽऔहोहोहाइ। दिवः। पवतेकवा। औहो३

२ २ १२ २ २ ३२ ऽ २
हा३। हा। त्वियोरसो। दक्षोदेवा। औहो३हा३।

२ १२ २ १२ २ ३२
हा। नामनुमा। दियोनृभाइः। हराइःसाजा। औ

ऽ २ २ १२ २ १ २
हो३हा३। हा। नोअतियो। नसत्वभाइः। वृथापा

२ ३२ ऽ २ २ १ २ ३२ ऽ २
जा। औहो३हा३। हा। सिक्षणूषा। औहो३हा३।

२ ३ २ १ २२ ऽ २ २ ५२ २
हाइ। नदोषुवा। औहो३हा३। हा३४। औहोवा।

२ ३ १२ २
ए३। नदोषुवा१ ॥ २० ॥ ९२

कविऋषिः*। "धर्त्ता" सर्वस्य धारकः सोमः "दिवः" अन्तरिक्षात् अन्तरिक्षस्थिताद्द्यावापृथिवीतः "पवते" पूयते। कीदृशः सोमः? "क्षत्वाः" कर्त्तव्यः शोध्य इत्यर्थः। "रसः" रसात्मकः। "देवानां" "दक्षः†" बलप्रदः। यद्वा। दक्षः प्रवर्द्धनीयो देवानां

* "भार्गवः"—इति ऋषि-मै०।

† 'दक्षः शोधः'—इति वि०। "दक्षः"—इति बलनामसु पठितमिदं नैघण्टुकपदं २,९।

अथ षष्ठी।

१ २ ३ १ २ ३ २उ
वृषामतीनामवतेविचक्षणः

३ १ १ ३ १र २र ३ २
सोमो अक्षा*म्पृतरीतोषसा॑न्दिवः।

३ १र २र ३ १ २ ३
पृणासिन्धूनांकलशाँअचिक्रद

१ २ ३ १ २ ३ १ २ ३ १ २
इन्द्रस्यहार्द्याविशन्मनीषिभिः॥ ६॥ ९३

मर्याय। तथा "नभिः" नेतृभिर्ऋत्विग्भिः "अनुमाद्यः" अनुमादनीयः स्तुत्यो वा। "हरिः" हरितवर्णः। "सत्वभिः" प्राणिभिः अस्मदादिभिः "सृजानः" सृज्यमानः "अत्यो न"¶ अश्व इव स यथाशितोऽनसेन गच्छति तद्वत्। "वृथा" अप्रयत्नेन "पाजांसि" बलानि§ स्वीयान् वेगान् "कृणते" कुरुते "नदीषु" ‖ वसतीवरीषु ताभिरित्यर्थः। असिक्त इत्यर्थः। अय मभिषव-समयाभिप्रायः+॥ ५॥ ९२

---

* "अक्षः"—इति
† "उषसो"—इति } ऋग्वेदीय-पाठौ।

‡ उ० २,१,१७,१=ऋ० ७,३,१५,४=जत्रे २,१,१०—९,१,५—१६,१,१७=जत्रे ४,१,२।

¶ "अत्यः"—इति अश्व-नामसु प्रथमं नैघण्टुकम् १,१४।

§ 'पाजांसि अन्नानि'—इति वि०। "पाजः"—इत्यन्ननामसु पाठभेदेन तृतीयं नैघण्टुकम् (२,१)—बलनामसु च द्वितीयम् (२,९)।

‖ 'नदीषु रश्मिषु'—इति वि०।

+ 'योगोऽस्माद्यमेऽहनि'—इति वि०।

(ऐडयामम॥) वृषामातीर२३। नापवाता२३इ।
एइ। विचक्षणए३। सोमोअक्षा२३म्। प्रतराईता२
३। ए३। उषसान्दिवए३। प्राणासाइन्धू२३। नाङ्ग
लाशाए२३। ए३। अचिक्रदद३। इन्द्रस्याहा२३।
दियावाइशा२३न्। ए३। मनिषिभिर३४३। ओ२३४५
इ। डा॥ २१॥

(थामम॥) वृषामतीनाम्यव। ताइवा१इचा२३४।
। च। णा२३४५:। सोमोअक्षाम्यतरी। तोषा१सा२३४
म्। दि। वा२३४५:। प्राणासिन्धूनाकल। शाए
आ१चा२३४इ। क्र। दा२३४५त्। आइन्द्रस्यहार्दि
यावि। शान्मा१ना२३४इ। षिभा१२उ। वा३४५॥ २२॥

१ १ १र र २१ २ १र
वृषा२मता२इ। नाम्यवतेविचक्षा२२णाः। सोमो
१ १ र र २१र २ १र १
२अङ्गा२म्। प्रतरीतोषसान्दा२३इवाः। प्राणा२ऽसि
१र र २१ २. १. १
न्धू२। नाङ्कलशा॰अचिक्रा२३दात्। इन्द्रा२स्या२।
१र १ १र २ १
दियाविशन्मनीषा२३इभा३४३इः। ओ२३४५इ। डा॥

॥ २३ ॥ ९३

खिगण ऋषिः*। अयं "सोमः" "पवते" अभिषूयते†। कीदृशः सोमः? "मतीनां" मतयः स्तोतारस्तेषां‡ "वृषा" वर्षकः कामानाम्। "विचक्षणः" विद्रष्टा¶ "अङ्गाम्" उषसां "दिवः" द्युलोकस्यादित्यस्य वा "प्रतरीता" प्रवर्द्धयिता§। किञ्च। "सिन्धूनां" स्यन्दमानानां मुदकानां॥ "प्राणः" [प्रकर्षेण अनिति चेष्टते इति प्राणः] कर्त्ता सोमः "कलशान्" "अचिक्रदत्" धारया अध्वनयत् प्रवेष्टुम्। यद्वा। "सिन्धूनां" [तृतीयार्थे षष्ठी]

---

* "कविः भार्गवः"—इति ऋषि-नै०।

† यक्षपाठे तु चरते इत्यर्थः।

‡ "मतीनां प्रज्ञानाम्"—इति वि०। "मतयः"—इति मेधावि-नामसु च दार्ढि-श्रुतिमं नैघण्टुकम् ३,१५।

¶ "विचक्षणः विविधं प्रकाशयिता सोमः"—इति वि०।

§ 'प्रतरीता प्रकर्षेण तारयिता'—इति वि०।

॥ "सिन्धवः"—इत नदीनामसु एकविंशतितमं नैघण्टुकम् १, १३।

अथ सप्तमी।

१ २ ३ २ ३ १ २
त्विरस्मैसप्तधेनवोदुदुह्रिरे

३ २ ३ १ २ ३ १ २
सत्यामाशिरम्परमेव्योमनि।

३ २ ३ १ २ २ ३ २ ३
चत्वार्यन्याभुवनानिनिर्णिजे

१ २ ३ २ ३ १ २ २
चारुणिचक्रेयहतैरवर्द्धत ॥ ७ ॥ ९४ *

१ ५ २ ४ ५ २ ४
(मरुतान्धेनुसाम ॥) त्रा२३४इः। अस्मैसप्तधेन

५ २ २ ४ ५ २ १ २ २ ९ २
वोदुदौ। होत्राइराइ। सत्यामाशिरम्परमाइ। वियो

सिन्धुभिरद्भिः "प्राणा" [प्रा पूरणे (अ० प०] पूर्णः "सोमः" कलशान् "अभि" लक्ष्य क्रन्दते। किं कुर्वन् ? इन्द्रस्य "हार्दि" हृदयम् "आविन्" प्रविशन् "मनीषिभिः" मनसईशित्रीभिः स्तुतिभिः सहेति शेषः [यद्वा। व्यवहितमपि मनीषिभिरित्येतत् पवतइत्यनेन सम्बध्यते † ॥

"प्राणा"—इति, "क्राणा"‡—इति, "अचिक्रदद्"—"अवीविशत्"-इति पाठाः ॥ ६ ॥ ९३

---

* उ० ६,२,१७,१=ऋ० ७,२,२३,१=जजे ८,१,१२।

† "विनियोगोऽस्य तृतीयेऽहनि"—इति वि०।

‡ क्राणाः—इत्यस्य कुर्वाणइत्यर्थः स्वीकृतो याज्ञे न० ४, १९।

१ १र र २ १ २
मानी२। चत्वार्यन्याभुवना। निनिर्णिज्जा२३इ। चा
३ ५ २र१ २र १ २ ४
रूणा२३४इचा। क्रे यदृतैः। आवा३र्द्धापुताई५ई ॥२४॥९४

रेणुर्ऋषिः*। "अस्मै" पवमानाय "परमे" उत्कृष्टे "व्योमनि" [विविधं ओम अवनं गमनं देवाना मत्रेति]व्योमा यज्ञः तस्मिन् स्थिताय। यद्वा। परमे व्योमन्यन्तरिक्षे वर्त्तमानाय "त्रिः सप्त" एकविंशति-सङ्ख्याकाः "धेनवः" प्रीणयित्र्यो गावः "सत्याम्" यथार्थभूतं "आशिरम्" आश्रयण-साधनं चीरादि "दुदुक्षिरे" दुहन्ति [यद्वा। त्रिःसप्त=द्वादश मासाः—पञ्चर्त्तवः—चयइमे लोकाः—असावादित्य एकविंशइति। एतैः सर्वैः सह गोषु पय उत्पाद्यते तद्भावो दुहन्तीति]। किञ्च। अयं सोमः "अन्या" अन्यानि चत्वारि "भुवना" उदकानि वसतीवरीस्त्रिस्त्रश्चैकधना इति तानि चतुःसङ्ख्यानि† "चारूणि" कल्याणानि "निर्णिजे" निर्णेजनाय परिशोधनाय परिपोषणाय वा "चक्रे" तदा करोति। "यद्" यदा अयम् "ऋतैः" यज्ञैः "अवर्द्धत" वर्द्धितवान् तदा करोति ‡।

"दुदुक्षिरे"-"दुदुक्षे"—इति, "परमे"--"पूर्व्ये"—इति च पाठः ॥ ७॥ ९४

---

* "वैश्वामित्रः"—इति ऋषि-नै०।

† वसतीवरीसञ्ज्ञाना मया साधार एको घटः, एकधन-नामकाश्च चयः। तच्च वसतीवरी-घटोदकेनाभिषुतसोमरसस्य वर्द्धनं भवति, एकधनघटानान्तु सोमाभिषवे उपयोगः।

‡ विनियोगोऽस्याभिषवे। अस्मै सोमाय। सप्त धेनवः सप्तच्छन्दांसि। त्रिः=प्रातःसवन-

अथाष्टमी।

१ २ ३ १ २ ३ १ २ ३ १ २
इन्द्रायसोमसुषुतःपरिस्रवा

२ २ ३ १ २ ३ २
पामीवाभवतुरक्षसासह ।

३ १ २ ३ २ ३
मातेरसस्युमत्सतद्वयाविनो

१ २ ३ २ ३ १ २
द्रविणस्वन्तद्रुहमन्त्विन्दवः॥ ८ ॥ ९५ *

---

* उ० ७,३,१०,१।

माध्यन्दिन-तृतीयसवनेषु दुदुह्रिरे। अथवा त्रिसृभिः सवनैः सप्त धेनवः सप्ताहोरात्रा वषट्कारिणः होता मैत्रावरुणः ब्राह्मणाच्छंसी पोता नेष्टा अच्छावाक आग्नीध्रः। एतेषां वाचः दुह्रन्ते। अथवा धेनवः दुह्रन्ते सत्या माशिरम्। आश्वपणीयं मिश्रणं वा परमे प्रकृष्टे व्योमनि स्थाने यज्ञे वा। चत्वारि अत्यग्निष्टोम उक्थः षोड़शी अतिरात्रश्चतुर्थः। अथवा पृथिवी अन्तरिक्षं द्यौर्दिशश्चेति। अथवा चत्वारो वेदाः। अथवा चत्वारो महर्त्विजः। अथवा चत्वारः समुद्राः। भुवनानि निर्णिजे चतुर्दश भुवनानि सप्त भूरादयो लोकाः सप्त पातालानि तान्यपि चारूणि चक्रे कृतवान्। केन प्रकारेण नयतः ऋतैः रसैः यज्ञैः सत्यैर्वा अवर्द्धत। अथवा तत् तस्मै सप्त धेनवः सप्त रश्मयः। दुदुह्रिरे। अथवा सप्ताश्वाः। अथवा सप्त पावकजिह्वाः। सप्त मातरो वा सप्त भूरादयो लोकाः। सप्त पातालानि सप्त सोमसंस्थाः सप्त समुद्राः सप्त द्वीपानि सप्त खराः। एता दुदुह्रिरे सप्त। आशिरम् उदकं परमे व्योमनि। चत्वारि अन्याः भुवनानि पृथिव्यादीनि चारूणि चक्रे। यत् ऋतैः यज्ञैः अवर्द्धतेत्यथवा चिः अस्मै सप्त धेनवः सप्त प्राणाः शीर्षण्याइति चिः उत्पति-स्थिति-प्रलयेषु स सत्याम् अविनश्वराम् आशिरं ज्ञानं चत्वारि भुवनानि जाग्रत्-स्वप्न-सुषुप्ति-तुरीयासु अद्वैतावस्थे नित्याम् तेजनैः अवर्द्धत विज्ञानाय''—इति वि०।

२ १ २ २ ४ २ ३
(अपामीवम्॥) इन्द्रा। यसोमसुषुताऽःपाऽरिस्र

५ २ १ २ २ र ४ २ २ १ ३ २ २ १
वा। अपा। मीवाभवतुराऽत्ताऽसाऽसह। माताइ।

२ ४ २ २ ३ ५ २ १ २
रसस्यमत्सताऽदाऽयाविनः। द्रवाइ। णस्वन्तइहस।

३ २ ४
तुवाऽइन्दाऽपवाऽहेः॥ २५॥

२ १ र ४ ५ ४ ५ २ ४
(वायोरभिदः॥) इन्द्रायसोमसुषुतःपयौ॥ त्तोइसा

५ १ २ र र २ २ २ १ २ र
वा। अपामीवाभवतुरत्तसा१साऽत्ता। मातेरसस्यमत्स

२ २ २ ३ ५ ३ ५ १ २ ३ २
तदया१वीऽनौ। द्रा२३४वा। णा२३४स्वा। ताइहसा

१ २ ४
३। त्ता२३। तुवाऽइन्दाऽपवाऽहेः॥ २६॥ ९५

वेनोभार्गवऋषिः। हे "सोम!" त्वं "सु षुतः" सन् "इन्द्राय" तदर्थं "परिस्रव" परितो गच्छ रसं मुञ्च। "अमीवा" रोगः "रत्तसा सह" "मा ते रसस्य मत्सत इयाविनो द्रविणस्वन्त इह" "अप भवतु" अपगतो वियुक्तो भवतु "ते" तव "रसस्य" स्वांशं रसं पीत्वा "मा मत्सत" मा मद्यन्तु। कः? "इयाविनः" इयं सत्यानृतं तेन युक्ताः पापिन इत्यर्थः। किञ्च "इन्दवः" ते रसाः

अथ नवमी।

१ २ ३ १ २ ३२उ ३ २३
असाविसोमोअरुषोवृषाहरी

१ २३२२ ३ १२ २२
राजेवदस्मोअभिगाअचिक्रदत्।

३ २उ ३१२ ३१२ ३१२
पुनानोवारमत्येष्यव्ययंश्येनो

२२३ १२ ३ १ २
नयोनिङ्कृतवन्तमासदत्॥ ८॥ ९९ *

(यामानि चीणि॥) २ २ १ असाविसो। २२ १ मोअरुषो२३४।

५२ ४ २२ २ १ २२ १ ५ ४
वृषाहराइः। राजेवदा। स्मोअभिगा२३४ः। अचिक्र

२ २ १२ २२ १ ५ ४
दात्। पुनानोवा। रामतिया२३४इ। षिअव्ययाम्।

२२ २ १ ४ ४
श्येनोनया। निङ्कृतवा२३। तमापसदात्। ढा५इ।

डा॥ २७॥

"इह" अस्मिन्यज्ञे "द्रविणस्वन्तः" अस्माकं धनवन्त "सन्तु" भवन्तु †॥ ८॥ ९५

---

* उ० ५,२,१३,१ = ऋ० ७,३,७,१ = जचे ५,२,८—८,१,२—१७,२,४—२३,२,१७—२३,२,२० = जछे १,२,८।

† 'रसवन्तो भवन्तु देवानां न तु राक्षसादीनाम्'—इनि वि०।

२ ३ ५ २ ३ ५ २२१२ २
आसावी२३४सो । मोअरू२३४षाः । वार्षाहराये

२ ३ ५ २ ३ ५ २२ १
३: । राजेवा२३४दा । सोअभी२३४गाः । आचिक्रदा

२ ३ ५ २ ३ ५ २२ १
२३त् । पूनानो२३४वा । रामातौ२३४ये । षीअव्यया

२ ३ ५ २ ३ ५ ३ २
२३म् । श्येनोना२३४येा । निङ्क्तार्त्ता२३४वा । तमा३ ।

१ ३ ५२ २ २ १ १ १ १
सारदा२३४औहोवा । दे३ । दिवी२३४५ ॥ २८ ॥

४ ५२ ४२ ५२ ५२ ५२ ४ २ ५२ ४२
असाविसोमोअरूषोवृषाहा । राइः । राजेवदसो

५ ४ २ ५ ४ ५ २ ४ २ ५ ४ ५२ ४
अभिगाअचिक्र । दात् । पुनानोवारमलेष्यव्य । याम् ।

५२ ४२ २ ५ ४ ३ २ १ ३ ५२
श्येनोनयोनिङ्क्त । वा । तमा३ । सारदा३२३४औ

२ २ १ १ १ १
होवा । ए३ । दिवी२३४५ ॥ २९ ॥ ९६

भरद्वाजो वसु ऋषिः । "सोमः" "असावि" अभिषुतोऽभूत् । कीदृशः सोमः? "अरुषः" अरोचमानः* "वृषा" वर्षकः "हरिः"

---

* 'अरुषः अहिंसितः'—इति वि० । "अरुषम्"—इति रूपनामसु पठितम् । वैघ-ष्टुकम् ३,७ ।

अथ दशमी।

३ २उ ३ १२ ३ २ ३१
प्रदेवमच्छामधुमन्तइन्दवो

२ ३ २३ २उ ३१२
सिष्यदन्तगावआनधेनवः।

३ १२ ३ १२ ३१२
बर्हिषदोवचनवन्तऊधभिः

३ १२ ३ १२ ३ १२
परिस्रुतमुस्रियानिर्णिजन्धिरे ॥ १० ॥ ९७ *

हरितवर्णः†। स च "राजेव" "दस्मः" दर्शनीयः सन् "गाः" उदकानि‡ "अभि" लक्ष्य "अचिक्रदत्" शब्दङ्करोति स्व-रस-निर्गम-समये। पश्चात् "पुनानः" पूयमानः "अव्यम्" अविभवं "वारं" वालं पवित्रम् "अत्येषि"¶ हे सोम! अतिक्रम्य गच्छसि। ततः "श्येनो न" श्येन इव "योनिं" स्वीयं स्थानं "घृतवन्तम्" उदकवन्तम्§ "आसदत्" वसतीवरीष्वासीदतीत्यर्थः॥ ॥

"अत्येषि"-"पर्येति"—इति, "आसदत्"-"आसदम्"—इति च पाठः॥ ८॥ ९९

---

* ऋ० ७,२,१९,१।

† 'हरिः हरणशीलः'—इति वि०।

‡ दृष्टमानं न्याय्यम्।

¶ 'अत्येषि अत्येति व्यत्ययेन'—इति वि०।

§ "घृतम्"—इति उदकनामसु दशमं नैघण्टुकम् १।१२।

॥ 'विनियोगोऽस्य नवमेऽहनि'—इति वि०।

४ ५ २१ २२१२
(मरुतान्धेनु॥) प्रादे। वमच्छामधुम। तआ२-

१ २ ३ ५ २१२ २२
इन्दवाः। आसिष्या२३४दा। तगावआ। नधा२इन

१ २ ३ ५ २ १२ ३२ १
वाः। बर्हिषा२३४दाः। वचनावा२। तऊ२धभाइः।

२ ३ ५ २ १ २ २
पारिषू२३४ताम्। उसियानिर्णिजन्धाइरायेइ। धाइ

२ ५ २ २ १ १ १ १
रा३४औहोवा। धाइइरा२३३५इ॥ ३०॥ ९७

वत्सऋषिः*। "मधुमन्तः" मदकर-रस युक्ताः "इन्दवः" सोमाः "देवं" द्योतमानं सोमात्मकम् इन्द्रम् "अच्छ" प्रति "प्रासिष्यदन्त" परिस्यन्दन्ते ग्रहादिषु† प्रक्षरन्ति। [स्यन्दतेर्ण्यन्तस्य लुङि चङि रूपम्] तत्र दृष्टान्तः। "गाव आ न धेनवः" पयस्विन्यः प्रीणयित्र्यः गावो यथा वत्सं प्रति पयांसि प्रस्रवन्ति

---

* "वत्सप्रीः भालन्दनः"—इति ऋषि-नै०।

† यद्यपीयदेवानुद्दिश्यांशग्रहोऽदीतसोमा तदाधारत्वात्तदोयचुद्रघटादयोऽपि ग्रहा उच्यन्ते। ते च प्रातःसवने, पञ्चविंशति-सङ्ख्याका भवन्ति। तथाहि—१ऐन्द्रवायवः—२अन्तर्यामः— ३ऐन्द्रवायवः—४ मैत्रावरुणः—५ आश्विनः—६ शुक्रः—७ मन्थी— ८आग्रयणः— ९उक्थ्यः— १०ध्रुवः—११-२३ऋतुग्रहाश्च त्रयोदश—२४ऐन्द्राग्नः— २५वैश्वदेवश्चेति। माध्यन्दिनसवने चत्वारि—त्रय, मारुतवोयाश्चयो माहेन्द्रश्च चतुर्थः। तृतीयसवने तु पञ्च, तद्यथा—१आदित्यः—२सावित्रः—३महावैश्वदेवः—४पात्नीवतः —५द्वादशकपालश्चेति।—इत्येवं सङ्कलनया ग्रहाश्चतुस्त्रिंशदिति।

अथैकादशी ॥

१ २३क२र ३१२ ३
अञ्जतेव्यञ्जतेसमञ्जते

१ २ ३२ ३क२र
क्रतुꣳरिहन्तिमध्वाभ्यञ्जते ।

१ २ ३ २३१२ ३१२
सिन्धोरुच्छासेपतयन्तमुक्षणꣳ

३२ ३ २ ३१२
हिरण्यपावाःपयुमपगृभ्णते ॥ ११ ॥ ९८ *

२ १ २ १ २
(शार्गाणि त्रीणि ॥) अञ्जताइ। वियञ्जताइ। सम

१ १ २र १ १ २ १
ञ्जातार३इ। क्रतुꣳरिचा। तीमधुवा। भियञ्जाता

तद्वत्। किञ्च। "बर्हिषदः" बर्हिषि सीदत। "वचनवन्तः" हम्भा-रवादि-शब्दवन्तः [उक्षियेति गोनाम †] तादृश्यो गावः ऊधभिः पयआधारकैः स्वैः स्वैरूधोभिः तेभ्यः "परिस्रुत" परितः स्रवणशीलं "निर्णिजं" शुद्धं पयोभूतं सोमरसं "धिरे" दधिरे इन्द्रार्थं धारयन्ति ॥ १० ॥ ९७

---

* उ० ७,३,११,१ = ऋ० ७,३,२०,३ = ऊह १२,१,१७।

† "उक्षिया"—इति गोनामसु पठनीयं नैघण्टुकम् २,११।

२इ। सिन्धोरुच्छा। सेपतया। तमुत्तराण२म्। चिर

ण्यपा। वाःप्रुमा। प्सूगृभ्णता३१उवा२३४५ ॥ ३१ ॥

अज्ञा३हो। ते३हाइ। वियज्ञते३सा३मज्ञताइ।

क्रतू३ष्टाइ। रिहा३हो। तिमधुवा३भी३अज्ञताइ

सिन्धो३र्हाइ। उच्छा३हो। सेपतया३न्ता३मुत्तराम्।

चिरा३हो। ण्यपा३हो। वाःपप्रुम। प्सुगा३भ्र्णा५

ताइ६५ई ॥ ३२ ॥

हावाज्ञा। ता२३४इ। वियज्ञतेसमज्ञते। एचिया।

एचिया३४। हाउक्रातूम्। रा२३४इ। हन्तिमधुवाभि

यज्ञते। एचिया। एचिया३४। हाउसाइन्धोः। ऊ२

३४त्। स्वासेपतयन्तमुत्तराम्। एचिया। एचिया३४।

अथ द्वादशी।

३ १ २ ३ १ २
पवित्रन्तेविततम्ब्रह्मणस्पते
३ १र २र ३ १ २ ३ १ २
प्रभुर्गात्राणिपर्येषिविश्वतः।
५ १ र ३र ४ ३ ४ ३ ४ ५ र १ ३
हाउहाइरा। ण्या२३४। पावाःपशुमप्सुगृभ्णते। एहि
२ १ ३ २ ५ ४
या। एहियाइ३४। हाउ। हो५इ। उा ॥ ३३ ॥ ९८

अत्रिऋषिः*। सोमम् ऋत्विजः "अज्यते" गोभिः तथा "व्यज्यते" विविध मज्यति "समज्यते" सम्यगज्यति। स्तुत्यर्थत्वादपुनरुक्तिः † तथा "क्रतुं" बलकर्त्तारं "रिहन्ति" लिहन्ति आस्वादयन्ति देवाः तथा पुनः "मध्वा" मधुना गव्येनाभ्यज्यते। तमेव सोमं "सिन्धोः" उदकस्य रसस्याधारभूते "उच्छ्वासे" उच्छ्रिते देशे "पतयन्तं" गच्छन्तं [पत्लृ गतावित्यस्मात् स्वार्थिके णिचि वृद्ध्यभावश्छान्दसः] "उक्षणं" सेक्तारम् "हिरण्यपावाः" हिरण्येन पुनन्तः "पशुं" द्रष्टारं ‡ [पशुः पश्यतेरिति निरुक्तम्] "अप्सु" वसतीवरीषु "गृभ्णते" गृह्णन्ति ¶ ॥

"मध्वा"—"मधुना"—इति, "अप्सु"—"आप्सु"—इति च पाठः ॥ ११ ॥ ९८

---

* "भौमः"—इति ऋषि-नै०।

‡ पुनरुक्तिदोषो नेति भावः।

† 'पशुं सोमम्'—इति वि०।

¶ 'विनियोग उपद्रवे प्रवर्ग्ये च'—इति वि०।

१२ ३२उ ३ १ २
अतप्रतनूनूनुतदामोअश्नुते
३ २ ३१र २३ १र २र
प्रुतासद्दद्दन्तःसन्तदाशत ॥ १२ ॥ ९९ *

॥ द्वितीय-दशतिः ॥

२१ २र १२ १ २ १
(अर्कपुष्पम् ॥) पविचन्ते विततम्ब्रह्मणस्पतेऽ। ऊवे
१ २ १ २ १र २र १ °र
२३। २। हेावाऽहाऽ। हाइ। प्रभुर्गात्राणिपरियेषि
१ १ १२ २ २ १
विश्वताऽ२ः। ऊवे२३। २। हेावाऽहाऽ। हाइ। अत
२ र१ ऽर १र ३ १ १ २ २ २
प्रतनूनतदाऽमोअश्नुतेऽ। ऊवे२३। २। हेावाऽहाऽहा
१र२१ २ १ ऽर १ १
इ। प्रुतासद्दद्दन्तःसन्तदाऽशत। ऊवे२३। २। हो
२ २ २ ५र र २ १रर र ऽर १र
वाऽहाऽ। हाऽ४। औहोवा। अर्कीदिलानाऽम्परमेवि
ऽर ३ १ १ १ १
योऽमाऽ३४५न् ॥ ३४ ॥

२ १ २र १ २ १ २
(अर्कपुष्पोत्तरम् ॥) पविचन्तेविततम्ब्रह्मणस्पतेऽ।

---

* उ० २,२,१६,१ = ऋ० ७,३,८,१ = आरण्ये १,१,११—१,१,१२—जद्दे ७,२,१—७,३,३—१५,१,१ = जद्दे १,१,८—४,१,३।

१ २र १ र २र १ २र १
ऊवाइ। औहोवा२। प्रभुर्गात्राणिपर्येषिविश्वता२३:।

१ २र १ १ २ र१ ऽर १र २ १
ऊवाइ। औहोवा२। अतप्ततनूर्नतदा२मोअश्नुते३। ऊ

२र १ १र२१ २ १ ऽर
वाइ। औहोवा२। घृतासइद्बहन्तःसन्तदा२शत।

१ २र १ ३ ५र र २ १ २
ऊवाइ। औ। हो२। वा२३४। औहोवा। अर्कस्य

र१र २ १र ऽर ३ १ १ १ १
देवाःपरमेविये२मा२३४५न्॥ ३५॥ ९९

॥ इति ग्रामे गेये षोड़शः प्रपाठकः॥

पवित्रऋषिः*। हे "ब्रह्मणस्पते" मन्त्रस्य स्वामिन्! सोम! "ते" "पवित्रं" शोभन मङ्गं "विततं" सर्वत्र विस्तृतम्। स "प्रभुः" प्रभविता त्वं "गात्राणि" पातुरङ्गानि "पर्येषि" परि गच्छसि। "विश्वतः" सर्वतः तव तत्पवित्रम् "अतप्ततनूः" पयो-व्रतादिना असन्तप्तगात्रः † "आमः" अपरिपक्वः "नाश्नुते" न व्याप्नोति। "घृतासः ‡ इत्" घृताएव परिपक्वाएव "बहन्तः" यागं निर्वहन्तः तत् पवित्रं "समासत" व्याप्नुवन्ति ¶॥

---

* "आङ्गिरसः"—इति ऋषि-नै०।

† 'अतप्ततरीरः सूक्ष्मैरपि छिद्रैः दशापवित्रस्य'—इत्यादि वि०।

‡ 'घृतासः निष्पन्न-सोमाः'—इति वि०।

¶ व्याप्नुवन्ति द्रोणकलशम्'—इति वि०।

"सन्तदाग्रत"-"तत्समासत"—इति पाठौ * ॥ ६ ॥ ८८

इति श्रीमत्सायणार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे
छन्दोव्याख्याने पञ्चमस्याध्यायस्य नवमः खण्डः ॥

॥ इति जागतम् ॥

—:○:—

इन्द्रमच्छेतिखण्डेऽस्मिन् ऋचो द्वादश संस्थिताः।
सकक्षा उष्णिहस्तत्र वक्ष्यन्ते ऋषयः पृथक् ॥

तत्र दशमे खण्डे—

सैषा प्रथमा।

२ ३१ २ ३२ ३१८२८ ३ १ २
इन्द्रमच्छसुताइमेवृषणंयन्तुहरयः।

२२ ३ २ ३ १ २ ३ १ २
अुष्टेजातासइन्दवःस्वर्विदः॥ १ ॥ १०० ॐ

५ २१ २ २२ ५
(पदे द्वे ॥) इन्द्रमच्छा। सुताइमा। औहो२३४वा।

---

* तन्नमुदाधारिणां वेण्यवसम्प्रदाय-विशेषाणां नयेऽयमेव मन्त्रः शरीरे तन्न-चक्रा-यङ्कवस्व; तथाच "अतन्नतनूः" शङ्खचक्रादिभिः न तन्ना तनूः यस्य स पुरुषः "आकः" अपरिपक्वः असंस्कृतः अतएव "तत्" प्रसिद्धं कैवल्यं "न अश्नुते" इत्यर्थः। वसुनोऽस्य विनियोगो ज्योतिष्टोम-तृतीयेऽहनि।

† "अुष्टौ"—म०।

‡ उ० १,१,१०,१ = म० ७,५,९,१ = ऋचे १,१,१०—२,१,७—९,१,१७—९,२,८—९,१,२० — १०,१,१९—१०,२,१ —१२,१,१०—१३,१,१—१९,१,१०—१४,१,११—१४,१,१७।

१ २ १० २, ३र ५ २ १ २र १
वृषणंय। तूहरया। औहो२३४वा। घृष्टाइजाता।

२ ३ २ १ २ १ २ १
सइन्दवाः। सुवर्वा२३इदा३४३ः। ओ२३४५इ। डा ॥१॥

५ २ १ २ १ २ २ १
इन्द्रमच्छा। सुताइमा३इ। ताइ३माइ। वृ

२ १० १ २ २ र र ऽर १
षणंय। तूहरया२ः। हारा३याः। घृष्टेजाता३सा

७ १ २ २ १ २ ५र र
इन्दवा२ः। आइन्दा३वाइः। सुवरा३४। औहोवा।

२र १ १ १ १ १
विदोवी३दा२३४५ः॥ २ ॥

(अनुपदे हे ॥) ४ ५ ४ २ १ २
इन्द्रम्। इन्द्राम्। अच्छा३इता

१ १ २ १० १
१इमे२। आइमे२। वृषणंय। तूहरया२ः। राया

र र ऽर ७ १ १ २
२ः। घृष्टेजाता३साइन्दवा२ः। दावा२३ः। सुवरा

५र र २ १ १ १ १
३४। औहोवा। विदो३विदा२३४५ः॥ ३ ॥

३ ४ ३ ४ ३र ४ ३र ४ ५ २ २ २ ३
इन्द्रमच्छसुताइमेवृषणंयन्तुहा। हो३४३। रयआ।

अथ द्वितीया ।

१२ २१ २ २१ २ २१ २
प्र धन्वासोमजागृविरिन्द्रायेन्दोपरिस्रव ।

२१२ २ २ १ २ २१ २
द्युमन्तꣳशुष्ममाभरस्वर्विदम् ॥ २ ॥ १०१ *

१ २ १ २ ३ ४५ २
अष्टाउवा । जाताउवा३४ । सइन्दवःसुवा । चो ।

१ २
विदत्रो२३४५इ । डा ॥ ४ ॥

(पौष्कलम् ॥ २१२ ४ ५ १ २ ५
इन्द्रमाइच्छसु । ताई२३४माइ ।

२ १ २ १ २ ३ ५ २ १ ३ ०
वृषाणंया । तूचारा२३४याः । अष्टाइजाता । सई२

३ २ १ २ १ १ १ १
न्दा२३४५वाई५इः । सुर्वविदा२३४५ः ॥ ५ ॥ १००

अग्निर्वात्तुषऋषिः । "अष्टे" अष्टौ क्षिप्रं "जातासः" जाताः "इन्दवः" पात्रेषु क्षरन्तः "स्वर्विदः" सर्वज्ञाः † "हरयः" हरितवर्णाः "सुताः" अभिषुताः "इमे" सोमाः "हर्षणं" कामानां सेक्तारमिन्द्रम् "अच्छ यन्तु" अभि गच्छन्तु ॥ १ ॥ १००

---

* ऋ० ७,५,९,४ = ऊपर ११,२,१ ।

† 'स्वर्विदः स्वर्गं लोकं विदन्ति'—इति वि० ।

(ऐषिराणि पञ्च ॥) प्रधन्वासौचेाइ। औ३चेा२३४ वा। मजागृविः। इन्द्रायेन्दौचेाइ। औ३चेा२३४वा। परिस्रव। द्युमन्तꣳशौचेाइ। औ३चेा२३४वा। क्षमा भर। सुवर्विदौचेाइ। औ३चेा२३४५वा६५६। ऊ२३ ४पा ॥ ६ ॥

प्रधन्वासौचेा। वा३चेा। मजागृवी२ः। इन्द्रायेन्दौचेा। वा३चेाइ। परिस्रावा२। द्युमन्तꣳशौचेा। वा३चेा। क्षमाभारा२। सुवर्विदौचेा। वा३चेा२। वा२३४औचेावा। ऊ२३४पा ॥ ७ ॥

औचौचेाइ। प्रधन्वासो२। औचौचेा। मजागृ वी२ः। औचौचेाइ। इन्द्रायाइन्दा२। औचौचेाइ। परिस्रावा२। औचौचेाइ। द्युमन्ताꣳशू२। औचौचेा।

१ २ १ २ १२ २ १ ३
ष्ममाभारा२। औहोहोइ। सुवः। वा२इ। दा२३४।
५२ २ ५
औहोवा। ऊ२३४पा ॥ ८ ॥

१ १ १ १ २ १
ऊवा२इ। ऊवा२इ। हुवा२३होयि। प्रधन्वासो
२ १ २ १ १
२। मजागृवी२ः। इन्द्रायाइन्दा२। परिस्रावा२।
१ २ १ १
द्युमन्ताऽपु२। ष्ममाभारा२। सुवर्वाइदा२म्।
१ १ १ १ २ ५२ २
हुवा२इ। हुवा२इ। हुवा२३हो२। वा२३४औहोवा।
३ ५
ऊ२३४पा ॥ ९ ॥

११ ४२ ५२ १ १ ५ १
प्रधन्वा२३सोमजागृवीः। इन्द्रा२या२३४इन्दो। ओइ।
२ १ २ २ १ ३ ३ १ ७
पा२राइस्राइवा। द्युमा२न्ता२३४ऽपु। ओ। ष्ममा
२ १ १ १ १
भा२३४पुरा६५ऽ। सुवर्विदा२३४५म् ॥ १० ॥ १०१

चक्षुर्मानवऋषिः। हे "सोम!" "जागृविः" जागरणशीलस्त्वं "प्रधन्व" प्रधर। हे "इन्दो" सोम! "इन्द्राय" "परि

अथ तृतीया।

१२ ३१ २ ३ २ ३१२
सखायआनिषीदतपुनानायप्रगायत।
३ २३१२ २२ ३२
शिशून्नयज्ञैःपरिभूषतश्रिये ॥ ३ ॥ १०२ *

२१२ १ १२
(शौक्तानि पञ्च ॥) सखाऽयाआ२। निषीदता।
२ २ १२ २ २ १
पुनाना२३या। प्रगायता। शिशून्ना२३या। ज्ञैःपरा
१ २ १
इभू२। षताआ२३या३४३इ। ओ२३४५३इ। डा ॥ ११ ॥
४ ५ ४ ५ २ ३ ५ १ ३ ५
साखायाआ। निषीदा२३४ता। पुना२ना२३४या।
१ ३ ५२ २ ३ ५ २ १ १ १ २२ ३
प्रा२गा२३४औहोवा। या२३४ता। शिशून्नया। ज्ञैःप
२ १ १ ३ ५२ २ २
रिभू२३। षा२ता२३४औहोवा। श्रिये१ ॥ १२ ॥

स्रव" परितः पात्रेषु चर। किञ्च "द्युमन्तं" दीप्ति-युक्तम् †। "स्वर्विदं" सर्वस्य लम्भकं "शुष्मं" शत्रूणां शोषकं बलम् ‡ "आभर" आहर ॥ २ ॥ १०१

---

* उ० ४,२,९,१ = ऋ०७,५,७,१ = ऊचे २,२.२—४,१,२—७,१,१८—७,१,१९—९,१,१८—१४,२,२५।

† "द्युमत्"—इति दीप्ति-कर्मसु अन्तिमं नैघण्टुकम् १,१९।

‡ "शुष्मम्"—इति बलनामसु एकादशं नैघण्टुकम् २,९।

४ ५र ४र ५र ५ २ र १र र
सखायआनि। षीदाऽता। पुनानायप्रगायाता।

र १र २ १ २
शिप्रुन्नयज्ञैःपरा२इ। भूषा२३ता३। आ२३या३४३इ।

१
ओ२३४५इ। डा॥ १३॥

५र र ४ ५र ४र ५र ५ २ र १र
ओहाइ। सखायआनि। षीदाऽता। पुनानौहाइ।

२र १र ५ ४ ५ ४ २र १र २र १र २
पुनानौहोये३। यापायापा। गायतौहाइ। गायतौहोये३।

४ ५ ४ ५ २१ र २१ र २ ४ ५
शाइशूऽशाइशूम्। नयज्ञौहाइ। नयज्ञौहोये३। पारी।

३ २ ५र र २ २र ३ २
पारा३४औहोवा। ए३। भूषतश्रिये१॥ १४॥

५ र ३ २ ३ ५ २ १ ३ ३ ५
सखा। यआऔ२३४वा। निषाइ। दाताऔ२३४वा।

२ र १र ऽर १ २ ३ ५ १ र
पुनानायप्रगा२यत। शाइशाऔ२२४वा। नयज्ञैःपरि

२ १ २ ३ ५ २
भू३। षाताऔ२३४वा। श्रिये१॥ १५॥ १०२

पर्वतनारदावृषी*। हे "सखायः" सखिभूताः! "स्तोतारः"

---

* पर्वतो वैदः काश्यपिः, नारदश्च शैखण्डी अप्सरसः इति ऋषि-नैगेय-नाम्नः।

अथ चतुर्थी ।

१ २ ३ १ २ ३ २ १ २
तंव:सखायोमदायपुनानमभिगायत ।

३ २ ३१ २ ३ १ २
शिशुंन्नहव्यैःस्वदयन्तगूर्त्तिभिः ॥ ४ ॥ १०३ *

(कार्णश्रवसानि त्रीणि ॥) ३ ५ ३
ता२३४०वः । सा२३४

५ २र १ ९ १ र २ १र ३
खा । योमदा२३या । पनानम । भिगाया२३ता ।

१ २ १ २ ३र २ १ २ ३र २ १
शाइशुन्नह । व्यःस्वदया२३ । तङ्गूर्त्तिभा३४३ह । ओ२

३४५ह । उ ॥ १६ ॥

ऋत्विजः "आ नि षीदत" स्तोतुमुपविशत । अथ "पुनानाय" पूयमानाय सोमाय "प्रगायत" प्रकर्षेण गायत तमभिष्टुत ततः अभिषुतं सोमं "यज्ञैः" यजनीयैः हविर्भिः मिश्रितैः "श्रिये" शोभार्थं "परिभूषत" परितोऽलङ्कुरुत । तत्र दृष्टान्तः—"शिशुं न" यथा शिशुं बालं पुत्रं पितरः † आभरणैरलङ्कुर्वन्ति तद्वत् ॥ ३ ॥ १०२

---

* उ० ४,१,१९,१ = ऋ० ५,८,१ = जदे ३,२,१२—५,१,१०— ८,१,११—९,२, २०—१८,१,१ ।

† 'मातरः'—इति वि० ।

२ ३ ४ ५ २ १ २ २ ५ २ २
ओइतंवःसखा। योम। दायाओ२३४वा। पुना

१ ऽ २ ३ ५ ३ २ ३ ५
नमभिगाइ। आ। ओ२३४वा। यताओ२३४वा।

१ २ १ २ १ २ २ २ ३ ५ ३ २
शिप्रुन्नद्व। व्यैःखदयाइ। आ। ओ२२४वा। तगा

३ ५ ३ ५
ओ२३४वा। तीर२३४भीः ॥ १७ ॥

५ २ २ ५ २ २ १ ऽ २ १
तंवःसखायेामदाइया। पुनानमभिगाइयत। शा

७ २ ४ २ ५ ३ २ १ ४ २
इप्रुन्नद्वाइ। व्यैःख। दयाइ। ताइगूइ। ताइ४५इ

५
भोइद्वाइ ॥ १८ ॥ १०३

पर्वतनारदावृषी। हे "सखायः!" ऋत्विजः "वः" यूयं "मदाय" देवानां मदार्थं "पुनानं" पूयमानं "तं" सोमम् "अभिगायत" अभिष्टुत। तमिमं सोमं "शिप्रुं न" शिप्रुमिवालङ्कारैः चीरादिभिश्चालङ्कुर्वन्ति तद्वत्। "हव्यैः" हविर्भिर्मिश्रयणैः; "गूर्त्तिभिः" स्तुतिभिश्च * "खन्दयन्त" खादूकुरुत।

"हव्यैः"-"यज्ञैः"—इति पाठौ ॥ ४ ॥ १०३

---

* गूर्त्तिभिरिति अर्चति-कर्मणो (नै०३,१४) गूर्धयते रूपमिदम् भाष्यकारस्य। 'गूर्त्तिभिः उद्यमाने रत्नैर्धनैर्वा'—इति वि०।

अथ पञ्चमी।

३१८ २८३१ २ ३ २ ३ २३१ २
प्राणाग्निशुर्म्महीनाꣳहिन्वन्नृतस्यदीधितिम्।

३ १ २ ३१ २३१२ ३ २
विश्वापरिप्रियाभुवदध्वहिता ॥ ५ ॥ १०४*

४ ५ ३ ५ २ ३
(वाचः सामनी द्वे ॥) प्राणा। शाइ३४इशूः। मह्ना

५ १ ३ ५ २ १ २ २
२३४इनाम्। हिन्वा२नाइ३४त्ता। स्याइदाइधी३तीम्।

१ २८१ २३८ २ १ २ ३ १
वाइश्वापरि। प्रियाभुवा२३त्। अधद्विता३४३। ओ२३

४५इ। डा ॥ १९ ॥

४ ५ ४ ५ १ १ ऽ २
प्राणाप्राणा। शाइशुरः शाइशूरः। मह्ना३१उवायेऽ।

१ १ १ १ २ १ २ २
ना२३४५म्। हिन्वन्नात्तस्यदा३१उवायेऽ। धी२३४

५ १ ८ २ ५ २
तीम्। विश्वापारिप्रिया३१उवा२३। भू२३४वात्। अधो

१ २ १ ३ ५८ ८
२। द्यौ२। उवायेऽ। द्वा२इता२३४औद्योवा।

२ ५
ऊ३२३४पा ॥ २० ॥

---

* उ० ३,२,१८,१ = ऋ० ७,५,४,१=जदे ३,१,१२—४,१,२— ७,९,२०—७,२,२१—९,१,१४—९,३,२—१२,१,५—१५,२,८—१९,२,८।

(इन्द्रसामनी द्वे ॥) प्राणाग्निशूः। मह्ना२इनाम्।
औहोइवा। हिन्वन्नतस्यदीधितिम्। वाइस्वाउवा।
पाराउवा। प्रिया२भुवत्। अधाउवाइ। ए३। हिता१
॥ २१ ॥

प्राणा। हो३इ। इयाहाइ। ग्राइग्रुमंहाइ। ना
२३म्। आउहाउ। हो३वा। हिन्वन्नृतस्यदीधिता-
इम्। आउहाउ। हो३वा। विश्वापा। र्याउहाउ।
हो३वा। प्रिया२३। भूरवा२३४औहोवा। अधहि
ता१ ॥ २२ ॥

(मरुतां प्रेङ्खम्॥) प्राणा। हहोइ। ग्रा२३४इशूः।
हहो३इ। महीना२३म्। होवा३होये३४। हिन्वन्।
हहाइ। आ२३४र्त्ता। हहो३। स्यदीधिता२३इम्।

१६ १२ ५ २ ३ २, २ ५ ६ २
हेावाऽहेाये३४। विश्वा। ह्वेाद्। पाऽ३४री। ह्वेा
३इ। प्रियाभूवाऽ३त्। हेावाऽहेाये३। आऽ३धाऽ।
२ ५
द्वाऽ४५इतेाऽहाद्॥ २२॥ १०४

चितऋषिः*। "प्राणा" यज्ञं कुर्वाणा इत्यर्थः †। "महीनां" महतीनां मंहनीयानां वा अपां ‡ "गिरः" स्थानीयः सोमः ¶ "ऋतस्य" यज्ञस्य "दीधितिं" दीप्तिमन्तं प्रकाशकं वा स्वीयं रसम् "हिन्वन्" प्रेरयन् §। "विश्वा" सर्वाणि "प्रिया' प्रियाणि हवींषि "परि भुवत्" परिभवति व्याप्नोति। अपि च "हिता" हिधा भवति॥। दिवि पृथिव्यां च वर्त्तत इत्यर्थः। +

"प्राणा"-"क्राणा"—इति पाठः॥ ५॥ १०४

---

* "आग्नेः"—इति ऋषि-नै०।

† भाष्यकारस्तु क्राणादिति ऋग्वेदीयपाठमनुसृत्यैवं व्याख्यानवान्; तथाच यास्कः—"गोभिः क्राणा अनूषत—गोभिः कुर्वाणा असोषत"—इति ४,१९। सामवेदीयपाठस्तु प्राणादिति अतएव 'प्राणभूताः'—इति विवरण-व्याख्यानम्।

‡ 'गवाम्'—इति वि०।

¶ 'गिरः शंसनीयः—इति वि०।

§ 'व्याप्नुवन्'—इति वि०।

॥ 'द्वैमवर्णा सोमदेवता एव'—इति वि०।

+ 'विनियोगोऽस्य षष्ठेऽहनि'—इति वि०॥

अथ षष्ठी।

१२ ३१२ ३१३ १२ ३१२
पवस्वदेववीतयइन्दोधाराभिरोजसा।

२३१२
आकलशम्मधुमांत्सोमनःसदः ॥ ६ ॥ १०५ *

(प्राजापत्ये हे ॥) १ १ ३ २ ३ ५
पवस्वदा२इ। ववीता२३४याइ।

१ २ २ ३ २ ३ ५ १२
आइन्दोधारा२। भिरोजा२३४सा। आकालशाम्।

२ ३ ५ १ २२१ ४ ४
माधूमा२३४०त्सो। मनएमाना२३:। सदा५ए। हो५
इ। डा ॥ २४ ॥

५ २१२ २ २
पवस्वदा। ववीतयाइ। इन्दोधा२३रा३४। भिरो

५ ५ १ २ २ १ १ २ २
जसा६ए। आकाश्हा। लाशा२म्। माध३हाइ।

१ २१ ५ ४ ५
मांत्सो२३। मनो२३४वा। सा५दो५हाइ ॥ २५ ॥ १०५

मदुर्ऋषिः †। हे "इन्दो" सोम! "देववीतये" देवानां भक्त-

---

* उ० ५,२,१७,१=ऋ० ७,५,१०,५=ऋवे५,२,१७—११,२,१९—९,३,४—२४,१,१३।

† "आप्सवः"—इति ऋषि-नै०।

अथ सप्तमी।

१ २ ३ २३ २र ३ २३ ६ २
सोमःपुनानऊर्म्मिणाव्यंवारंविधावति।

१ २ ३ १र२र४ ३ १ २
अग्रेवाचःपवमानःकनिक्रदत् ॥ ७ ॥ १०६ *

५र २ र १ १
(सुज्ञाने द्वे ॥) सोमःपुना। नऊर्मिणा। अव्यं

१ र १ २ र १ १
वारा२म्। विधावताइ। अग्रेवाचा२ः। पव। मार

३ ५र र १ २ र १३ ११११
२ना२३४औहोवा। कनिक्रद्देउपा२३४५ ॥ २६ ॥

५र २ र १ २ १ ३ १
सोमःपुना। नऊर्मिणोवाइ। औ२। वा२३४। औ

र १ र २र ३ २ १ २ १
हेावा। अव्यंवारंविधावति। अग्रेइ। हेावाइ। हो

णाय "ओजसा" बलेन "धाराभिः" आत्मीयाभिः "पवस्व" क्षर। हे "सोम" "मधुमान्" मदकररसवांस्त्वं "नः" अस्मदीयं "कलशं" द्रोणाख्यम् "आसद" आसीद। [सदेर्लङिरूपम् † ॥ ६ ॥ १०५

---

* उ० ३,१,१८,१=ऋ० ७,५,१०,५=ऊह २,२,१७—७,२,९—९,३,४—१५,२,११।

† 'विनियोगोऽस्य नवमेऽहनि'—इति वि०।

३ ५र र २र१ २र ३ १
२। वा२३४। औहोवा। वाचःपवमानः। कनाइ।

१२ १ ३ ५र र ३ ५
होवाइ। होइ। वा२३४। औहोवा। क्रा२३४दात्॥२७॥

४र५ र ४ १ र
(द्यौते द्वे॥) सोमःपुनानऊ। मिणा। अव्यवार'-

२१र २ १ र र ११र २ ४ ५
विधावा२३ती। अग्रेवाचाः। पवमानाः। काइनिक्र।

३ १ १ १ १
दा२३४पूत्॥२८॥

२र र र ३ ५र २ र र ३
सोमःपुनानऊर्मिणा२३४ऐहो। अव्यंवारंविधावता

५र २ र र र ३ ५र ४ ५ २
२३४ऐहो। अग्रेवाचःपवमाना२३४ऐहो। कानो। क्र

५ ५ ४
ददे३४। हियाईहा। होपुइ। डा॥२८॥

२र४ ५ र ३ २ ३ ५
(आतीषादीये द्वे॥) सोमःपुना। नऊ३र्मी२३४णा।

१ २र १ २ १ ऽ ३ ५
अव्यंवारम्। विधावति। अग्राइ२इ। वा२३४चाः।

१ ऽ ३ ५ ३ २ ४
पवाइ२। मा२३४नाः। कनाइइक्रा५दाईपूत्॥३०॥

अथाष्टमी।

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २
प्रपुनानायवेधसेसोमायवचउच्यते।

३ १ २ २ ३ १ २ ३ १ २
भृतिन्नभरामतिभिर्जुजोषते ॥ ८ ॥ १०७ *

३ २ ४ ५ २ २ ३ ४ २ ५ ५ १ २ २
सोमःपुना। हो। नऊर्मिणाऽए। अव्यंवारविधा

२ २ ३ १ १ १ १ २ १ २
१वाऽती। अग्रेवा२३४५। चा२३४५:। पवमा२३नाऽः।

१ ३ ५ २ २ ३ १ १ १ १
का२ना२३४औहोवा। क्रदद२३४५॥ ३१ ॥ १०६

अग्निर्ऋषिः †। "पुनानः" पूयमानः "सोमः" "ऊर्मिणा" स्वीयया धारया "अव्यम्" अविभवं "वारं" वालं पवित्रं "विधावति" विविधं गच्छति। कौट्सः? "पवमानः" पूतः "वाचः" स्तोत्रस्य "अग्रे" "कनिक्रदत्" पुनः पुनः शब्दं कुर्वन् विधावति ‡॥

"अव्यम्"—"अव्यः"—इति सान्न ऋचः पाठः॥ ७॥ १०६

---

* ऋ० ७, ५, ६, १।

† "चाक्षुषः"—इति ऋषि-नै०।

‡ दाधर्त्ति दर्धर्तीत्यादिना (पा० ७, ४, ६५) सिद्धम्।

¶ 'विनियोगोऽस्य चतुर्थेऽहनि'—इति वि०।

(सोमसामानि चत्वारि॥) २१ ४र ५र
प्रपुनाऽ३नायवेधसाइ।
१ र र ७ १
होइ। होइ। सोमायवचाउच्याताऽ२इ। भृतिन्नभरा
७ १र २ १
मतिभाऽ२इः। जुजोषाऽ३ताऽ४३इ॥ ओ३४५इ। डा
॥ २२॥
४ र र र ४ २र १ २ २
प्रपुनानौहोऽ५यवेधसाइ। सोमाओ३हो३४। यव
५ ४ २ १ २ २ ५ र ४ २
चउच्यताइ। भृताओ३हो३४। नभरामतिभाइः। जु
५
जाऽ३१उवाऽ३। षाऽ३४ते॥ २३॥ १०७

इतो नाम ऋषिः* स्वात्मानं प्रत्याह। "पुनानाय" पवित्रेण पूयमानाय † "वेधसे" कर्मणो विधात्रे सोमायः‡ "वचः" स्तोत्र-लक्षणं "प्रोच्यते" त्वया प्रोच्यताम्। किञ्च। "मतिभिः" स्तुतिभिः "जुजोषते" प्रीयमाणाय स्तुतिं "प्रभर" प्रकर्षेण धारय। तत्र दृष्टान्तः। "भृतिन्न" यथा भृतकाय भृतिं सम्पादयति तद्वत्।

"वच उच्यते"-"वच उद्यते"—इति साम्न ऋचः पाठः। ॥ ८॥ १०७

यन्। होये३। हो२३४५वा६५६। घर्मोघर्मोज्यो
तिः ॥ १७ ॥

१२ २ १ १२ ३२१ २
* ह्राउह्वोहाइ (इत्यादि) ता। औह्वोवाह्राउ। वा

२२ १२२ १ २ २२ १२१२२ २ २२ १२
ए। इडायच्छहस्कृतियच्छ। ए। मनओजोयच्छ। ए। मनो

२ १२ २ २२ १ २ २२ २१२ २ २
महिमानंयच्छ। ए। यशस्त्विषियच्छ। ए। प्रजवर्चायच्छ।

२२ १२ २ २२ १ २१ २ २२ १२
ए। पशून्त्रिशंयच्छ। ए। ब्रह्मवर्चसंयच्छ। ए। स्वर्ज्योति-

२
र्यच्छ ॥ १८ ॥

१२ २ १ २ २ २
ह्राउह्वोहाइ। (इत्यादि) ता। यज्ञायथा। अ

२१ २ २ १ २ २ २ २ १
पूर्वाया। मघवन्वृत्रहत्याया। या। तत्पृथिवीमप्राथा

२ २ २ २ १ २ १२ २
याः। तदस्मभ्याउतोदाइवाम्। ह्राउह्वोहाइ (इत्या

३ १२ ३२२ २ २२ १२२ २१ २
दि) ता। औह्वोवाह्राउ। वा। ए। तेजोघर्मःसङ्गी

२ २ १ २२ २ २ २२ १२ २ २ १ २ १ २२
उन्तेशिशुमतीर्वायुगोपास्तेजस्वतीर्मरुद्भिर्भुवनानिचक्रदुः।

१ १ १ १ १ ३ १ १ १
इट्इडा२३४५। ई२३४५ ॥ १९ ॥

---

* "पञ्चानुगानम्"—इति चा० ब्रा० ३, १, २, १९।

१र र १र र २ १ १र
हाउहोवा। ३। परात्परमैरय। ता। परात्प

र २ १ १र र २ २ १र ३र २
रमैरय। ता। परत्परमैरय। त। औहोवाहा

२ १ २ २र १ १र र २र १
उ। वा। इन्द्रो। धेनुः। ३। आपो धेनुः।

१र १र १ २ १ २र १ १र
३। भूमि धेनुः। ३। अन्तरिक्षंधेनु। ३। द्यौ

२र १ १ १र २ १ २र १
र्धेनुः। ३। परं धेनु। ३। व्रतं धेनु। ३।

२ १ २र १ १ २र १ १र
सत्यं धेनु ३। ऋतं धेनु। ३। दृडा

२र १ १ २र १ १र २र १
धेनुः। ३। स्व र्धेनुः। ३। ज्योति र्धेनुः।

३ ॥ २० ॥

१र र १ २ १र २र
हाउहोवा। ३। (इत्यादि) ता। यज्ञा यथाः।

२१र र २१र २ १ २ ३ ५ १ २
अपूर्विया। अपूर्विया३। आपूर्वा२३४या। मघवन्वृ।

२१ र २ २१ र २ १ २ ३ ५ १
त्रहत्याया। त्रहत्याया३। त्राहत्या२३४या। तत्पृ

२१र र २ १ २ १ २ ३ ५
थिवीम्। अप्रायथाः। अप्रायथा३ः। आप्राथा२३४याः।

१ २ र २१र २ १ २ २ १ २
तदस्तभ्नाः। उतोदिवाम्। उतोदिवा३म्। ऊतो

३ ५ १२ २ २
दा२३४इवाम्। हाउहोवा। ३। (इत्यादि) त।
१२ २२ २ २ १२२ २१ २ २ २ २ १ २ २२ १२
औहोवाहाउ। वा। तेजोघर्मःसङ्क्रीडन्तेवायुगोपास्ते
२ २ १ २ १ २ २
जस्वतीमरुद्भिर्भुवनानिचक्रदुः॥ २१॥

१ १ १ २ १ २ २
हा२ऊवाक्। ३। होवा। २। होवा३। हाउवा।
२२ २२ १ २ १२ २ २२ १ २ १२ २ १ २ २ १ २ १ २ १
ए। तोकम्प्रजाङ्गर्भो नोयमदध्मह्याचपराचपथिभिश्चर-
३ १ १ १ १
न्ता२३४५ः॥ २२॥

१ १ १ २ २ २
* हा२ऊवाक्। ३। होवा। ३। अयꣳसशिङ्क्ते३।
१ १ २२ १२ २ २ १२ २२ १ १
होइ। यस्माद्यावापृथिवी भूवनानिचक्रदुः। हो
२ १ २ १ १ २२ १२ २ १२ २ २ १
इ। अयꣳसशिङ्क्ते३। होइ। यस्मादापओषधयोभुव-
२२ १ १ २ १ ४ १ १ २२
नानिचक्रदुः। होइ। अयꣳसशिङ्क्ते३। होइ। यस्मा
२ १ २ २२ १ १ २ १ २
त्समुद्रियामुवनानिचक्रदुः। होइ। अयꣳसशिङ्क्ते ३।
१ १ २२ १ २ २२ १२ २२ १ १ १
होइ। यस्मादिश्वाभूताभ्वनानिचक्रदुः। होइ। हा

---

* "चतुगानम्"—इति आ० ब्रा० ३,२,१९।

१ १ २ २ २र १ २
र२ऊवाक्। ३। हो३वा३। हाउवा। ए। आपः। २।
३ १ १ १ १
आपा२३४५ः॥ २३॥

१ १ १ २ २र ३ २र १
हा२ऊवाक्। ३। हो३वा। ३। येभिर्विया। श्वमैरा
२र २र ३ २र १ २र र २
या२ः। तेभिर्विया। अहीमादा२म्। येभिर्भूताम्।
३ २ १ २र १र २ १र २ १र २ १र २ १
सहःसाहा२ः। तेभिस्तेजआपः। आपा२। येभिर्व्यं
२१र २ २ २र १ २ १ ३
न्तरिक्षमैरया३ः। हाउवा। ए। आपः। २। आपा
१ १ १
२३४५ः॥ २४॥

१ १ १ २ १र र
हा२ऊवाक्। ३। हो३वा। ३। यज्जायथा। अ
१ १ १ १
पूहो२। र्वाया२। मघवन्वृत्रहाहो२। त्याया२। तत्
र १ १ र
पृथिवीमप्राहो२। थायाः२। तदस्तभ्नाउतोहो
१ १ १ १ २
२इ। दाइवा२म्। हा२ऊवाक्। ३। हो३वा। २।
२ २ २र १र र २ १ र २ र १
हो३वा३। हाउवा। ए। तेजोघर्मःसङ्क्रीडन्तेग्नि

२ २ २ १ २ २१२ २ २ १ २ १ २ २ ३ १ १ १ १

शुमतीर्वायुगोपास्तजस्वतीर्मरुद्भिर्भुवनानिचक्रदू २ ३ ४ ५:

॥ २५ * ॥ १६

नृमेध-पुरुमेधौ हाङ्गिरसौ ऐन्द्र्या अनुष्टुभः ॥

हे "अपूर्व्य" त्वत्तोव्यतिरिक्तेन पूर्वेण वर्जित ! † । हे "मघवन्" मंहनीयतम धनवन्निन्द्र ! "हतहत्याय" ‡ हतासुरहननाय "यद्" यदा त्वं "जायथाः" उत्पन्नः प्रादुर्भूतोसि "तत्" तदानीमेव "पृथिवीं" प्रथमानाम् "अप्रथयः" प्रसिद्धां दृढामकरोः। "उत" अपि च "दिवं" द्यां द्युलोकम् अन्तरिक्षेण "अस्तभ्नाः" निरुद्धा मकार्षीः ॥ ईदृशं वीर्यं त्वदन्यस्य न भवतीत्यर्थं द्योतयितुम् अपूर्व्येति पदम् ॥ ७ ॥ १६

इति श्रीमत्सायणार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने षष्ठस्याध्यायस्य द्वितीयः खण्डः ॥ २ ॥

---

* ऋ० गा० २प० ३, २, ९—२५ ।

† 'अपूर्व्या पूर्वेषु मध्यराचादिकालेषु विद्यमाना'—इति २प० २, ७, ४ र्थेचि सायणः। 'यतः पूर्वं नास्ति सा अपूर्वा, अपूर्वा एव अपूर्व्या, स्वार्थिकखद्धितः; प्रथमेत्यर्थः'—इति च तत्रैव वि० ।

‡ 'अथास्य कर्म—रसानुप्रदानं हतवधो या च का च बलकृतिरिन्द्रकर्मैव तत्'—इति नैरुक्तम् २का० ७अ० १०ख० । 'हतवधो मेघवधः'—इति च तत्रत्य-भाष्यम् । "तत्कोष्टवोमेघइति नैरुक्ताः । त्वाष्ट्रोऽसुरस्तत्रैतिहासिकाः । अपाञ्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्ति"—इति निरु० नै० २, १६ ।

अथ तृतीय-खण्डे —

सैषा प्रथमा ।

२ ३ १ ३ २ ३ १ २र३ २ ३ १ २र
मयिवर्चोऽथोयज्ञोथोयज्ञस्यत्पयः ।

३ २ ३ १ २ ३ १ २र
परमेष्ठीप्रजापतिर्दिविद्यामिवहꣳहतु ॥ १ ॥ १७ *

२र १ १
† ह्राउ । ३ । आनो२ब्रु,वाइ । २ । आनो२ब्रु

१ ३ ५र र १ २र र३र३ १ १ १ १
वा । २ । या२३४औहोवा । रक्षतनोरक्षितारा२३४५ः ।

२र १ २र र १ २र२र
ह्राउ । ३ । आनो२ब्रु(पूर्वपाठः) गोपायतगोपायि

र ३ १ १ १ १ २र १ १ १ २
तारा२३४५ः । ह्राउ । ३ । आनो२ब्रु० । मयिवर्चः ।

१ २ १२र १ १ २ २
अथोया१ज्ञा२ः । अथोयज्ञ । स्यात्पा१या२ः । पर

र१र १ २ २ १ र १ २
मेष्ठी । प्रजापा१ती२ः । दिविद्यामि । वहꣳह्रा१नू२

२र १ १ २र र ३ १
३ । ह्राउ । ३ । आनो२ब्रु० । रक्षतनोरक्षितारा२

१ १ १ २र १ २र२र १ २र र
३४५ः । ह्राउ । ३ । आनो२ब्रु० । गोपायतगोपायि

---

* ऋ० ८,७,१७,७ । † "प्राजापत्यस्य व्रतम्"—इति आ०ब्रा०३,२,२० ।

अथ द्वितीया ।

२ ३ १ ३१ २ १ २ ३
सन्ते पयाꣳसिसमुयन्तुवाजाः

१२ २२ ३ १ २
संवृष्णप्रान्यभिमातिषाहः ।

२ ३ १ १ १ १ २२ १ १२ १
तारा२३४५ः । ह्वाउ । ३ । आनो२ब्र,० । ए । रत्त

२२ २ २ २ २ १ १२२ २ १२ १
तनोरक्षितारोगोपायतगोपायितारः । २ । ए । रत्त

१२ २ २ २ २ २ १२ २ २ ३ १ १ १
तनोरक्षितारोगोपायतगोपायितारा२३४५ः ॥ ७ * ॥ १७

कामदेवऋषिः प्रोक्तो मयीत्यस्याः प्रजापतिः ।
देवता स्यात्ततश्छन्दोऽनुष्टुप् सद्यद्वतीरितम् ॥

"परमेष्ठी" परमे लोके तिष्ठतीति परमेष्ठी "प्रजापतिः" † "दिवि" द्योतमाने स्वर्गे "द्यामिव" द्योतमानां कान्तिमिव । "मयि" अस्मदीये शरीरे "वर्चः" तेजः ब्रह्माख्यं "दृंहतु" वर्द्धयतु । "अथो" अपिच "यशश्च" दृंहतु । "अथो" किञ्च "यज्ञस्य" यागस्य सम्बन्धि अतएव स उत्तमं "पयः" हविर्लक्षणं मन्त्रं च दृंहतु ॥ १ ॥ १७

---

* ऋ० मा० २प० ४, १, ७ ।

† 'प्रजापतिः प्रजानां पाता पालयिता वा'—इत्यादि नैरुक्तम् २का० १०ब० ४२, ४३ स्व० ।

१ १ २ ३ १ २
आप्यायमानोअमृतायसोम
३ १२ २२ ३ १ २
दिविश्रवाउद्युत्तमानिधिष्व ॥ २ ॥ १८ *

१२ २ १२ २ ६ २ ३
† ओवा२। ३। सन्ते पया। सीऽसमु। यन्तु
४२ ५ १ १ २ १ २ ३ ४२ ५
वाजाः। संवृष्णिया। नोऽअभि। मातिषाढाः।
२२१२ २ २ २२ ३ ४२ ५ २ १
आप्यायमा। नोऽअमृ। तायसोमा। दिविश्रवा।
२ १ १२ ३ ४ ५ १२ १
सीऽउत्त। मानिधिष्वा। ओवा२। २। ओ२।
३ ५२ २
वा२३४। औहोवा। ३ ॥ ९ ‡ ॥

१ २ १२ २ १ २ ३ ४२ ५
¶ ई२। ३। सन्ते पया। सीऽसमु। यन्तुवाजाः।
२१२ २ १ २ ३ ४२ ५ २२ १२
संवृष्णिया। नोऽअभि। मातिषाढाः। आप्यायमा।
२ १ २२ ३ ४२ ५ २ १२ २ १ २२ ३ ४
नोऽअमृ। तायसोमा। दिविश्रवा। सीऽउत्तमानिधि
५ १ १ २ ५२ २ १
ष्वा। ई२। २। ई२आ२३४औहोवा। ३ ॥ ११ § ॥ १८

---

* ऋ० १, ६, २२, २। † "सोमव्रतम्"—इति आ० ब्रा० ३, ३, २०।
‡ आ० मा० २प० ४, १, ९।
¶ "सोमव्रतम्"—इति आ० ब्रा० ३, २, २४।
§ आ० मा० २प० ५, १, ११।

अथ तृतीया।

२ ३ १र २र ३ २ ३ २ ३ १ २ ३ १
त्वमिमाओषधीःसोमविश्वास्त्वमपोअजनयस्त्वङ्गाः।

१र २र ३ २ऽ १ २ ३ १ २र ३ १र २र
त्वमातनोरुर्वाऽन्तरिक्षन्त्वज्ज्योतिषावितमोववर्थ ॥ ३॥१९

१र २ ३र २र
* ह्वाउ। ३। ह्वोवाऽ। ३। ह्वाह। ह्वोवाऽ।

२र ४ २ १ १ १ ४ २
३। ह्वोवाऽ। ३। ह्वोऽवाऽ४५। २। ह्वोऽवाऽ४।

४र र १ र र २र र १ २र १ २ १र २
औह्वोवा। त्वमिमाओषधीःसोमविश्वाः। त्वमपोअज

त्रिष्टुभः पावमान्याः स्याद्दृषिर्गौतमनामकः।

हे "सोम!" "अभिमातिषाहः" अभिमातीनां शत्रूणां हन्तुः "ते" तव एवम्भूतं त्वां "पयांसि" अपणार्थानि क्षीराणि "संयन्तु" सङ्गच्छन्ताम्। तथा "वाजाः" हविर्लक्षणान्यन्नानि च त्वां सङ्गच्छन्ताम्। "वृष्णानि" वीर्याणि च सङ्गच्छन्ताम्। हे "सोम!" त्वम् "अमृताय" आत्मनः अमृतत्वाय अमरत्वाय "आ" समन्ताद्दीप्यमानः सन् "दिवि" नभसि स्वर्गे "उत्तमानि" उन्नततमानि उत्कृष्टानि "अवांसि" अन्नानि अस्माभिर्भोक्तव्यानि हविर्लक्षणानि "धिष्व" धारयते। ["क्रियाग्रहणं कर्तव्यमिति (पा०२, ३,१३)" कर्मणः सम्प्रदानत्वात् चतुर्थ्यर्थे षष्ठी †॥ २॥ १८

---

* "सोमव्रतम्"—इति आ० ब्रा० ३,२,२४।

† "चतुर्थ्यर्थे बहुलं छन्दसि"—इति पा०२, ३, ६२।

१ २ १ २ ३२ १ २ १ २ २२ १ २
नयस्त्वङ्गाः । त्वमातनोरुवन्तरिक्षं । त्वज्ज्योतिषाविततमो

२ २२ २ ३२ २
ववर्थ । हाउ । ३ । होवा३ । ३ । हाइ । होवा

२२ ४ २ १ १ १ ४
३ । ३ । होवा३ । ३ । होइवा ३ ४ ५ । २ । होइ

१ ५२ २ २२ १ २ १ २ १२ २
वा३४ । औहोवा । ए । जनद्दिवमन्तरिक्षम्पृथिवीवि

१ २ २ १२ २२ २ १ १ १ १ १
श्वभोजसम्पुरुरूपाअजीजनः । इट् । इडा२३४५॥१०*॥१९

हे "सोम !" "त्वम्" "इमाः" भूम्यां वर्तमानाः "विश्वाः" सर्वाः "ओषधीः" "अजनयः" उत्पादितवानसि । तथा "त्वम्" "अपः" तासा ओषधीनां कारणभूतानि वृष्युदकानि अजनयः । तथा त्वं "गाः" सर्वान् पशून् † उदपादयः । "उरु" विस्तीर्णम् "अन्तरिक्षं" "त्वम्" "आ ततनोः" विस्तारितवानसि । तस्मिन्नन्तरिक्षे यत् "तमः" अस्मद्दृष्टि-निरोधकम् अन्धकारं तदपि "त्वं" "ज्योतिषा" आत्मीयेन प्रकाशेन "वि ववर्थ" विशिष्टं कृतवानसि । [ववर्थ वृञ् वरणे लिटस्थलि, "बभूथाततथजगृम्भववर्थेति" (पा० ७,२,६४) निपात्यते ॥

"आतनोः"—"आततन्थ"—इति साम्न ऋचः पाठो ॥ ३ ॥ १९

---

* ऋ० मा० ३प० ४, १, १० ।

† "अथापि पशूनामेव भवत्येतस्मादेव"—इति निरु० नै० २, ५ ।

अथ चतुर्थी।

३ १ २ ८ १ २ ३ १ २ २ ३ १ २
अग्निमीडेपुरोहितंयज्ञस्यदेवमृत्विजम्।

१ २ ३ १ २
होतारꣳरत्नधातमम्॥ ४॥ २० *

२ र र २ र र २ र र २ १
† मनोहाउ। वयोहाउ। वर्चोहाउ। अग्निम्।

१र ३ १ ३ ५ २ र २ र र
ईडा२इ। पुरोहा२३४इताम्। इहहाउ। इडाहा

२र र २ १ १ ३ २ ३ ५
उ। आयुर्हाउ। यज्ञ। स्यदा२इ। वमृत्वी२३४जाम्।

२ १र २र र २ र १र र १
स्वर्हाउ। ज्योतिर्हाउ। ऋतꣳहाउ। होता। रꣳ

३ २ ४ २ १ ३ १ १ १ १
रा२३। त्नधाꣳतापुमा६५ꣳम्। ए३। मह्हा२३४५ः॥१३‡॥

२ऽ २ १ र २र १र २ २र १र १ १र
¶ हाउ३वा। अग्निमीडेपुरोहितम्। देवेषुनिधिमाꣳ

२ १ २ऽ २ १ २र १ १ २र १र २
अहम्। हाउ३वा। यज्ञस्यदेवमृत्विजम्। देवेषुनि

१र २ १ २ऽ १र र २ १र २ २र
धिमाꣳअहम्। हाउ३वा। होतारꣳरत्नधातमम्। दे

---

* ऋ० १,१,१,१। † गवां व्रतान्मिमम् (आ० ब्रा० ३,२,२१)।

‡ आ० गा०३प० ४, १, १३। ¶ यमव्रतात्पाम् (आ०ब्रा०३,२,२१)।

१२ २ १२ २ १ २६ १२ २१२ २ १२
वेषुनिधिमाꣳअहम्। हाउ३वा। ए। देवेषुनिधिमाꣳ
२ १
अहम्। (एवं त्रिः)॥ १८ *॥ २०

अग्निं मीडे मधुच्छन्दा गायत्र्यग्नि-संस्तुतिः।

"अग्नि"-नामकं "देवम्" "ईडे" स्तौमि [ईड स्तुताविति (अदा० आ०) धातुः मन्त्रस्यास्य होत्रा प्रयुज्यमानत्वात् अहं होता स्तौमीति लभ्यते] कीदृशम् अग्निम्? "यज्ञस्य पुरोहितं" यथा राज्ञः पुरोहितः तदभीष्टं सम्पादयति तथाग्निरपि यज्ञस्यापेक्षितं होमं सम्पादयति। यद्वा यज्ञस्य सम्बन्धिनि पूर्वभागे आहवनीयरूपेणावस्थितम्। पुनः कीदृशम्? "होतारम्" ऋत्विजम् [देवानां यज्ञेषु होत्रनामक ऋत्विगग्निरेव। तथाच श्रूयते—"अग्निर्वै देवानां होतेति"। पुनरपि कीदृशम्? "रत्नधातमं" यागरूपाणां रत्नानाम् अतिशयेन धारयितारं पोषयितारं वा†। अत्राग्नि-शब्दस्य यास्को बहुधा निर्वचनं दर्शयति—"अथातोनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामो अग्निः कस्मादग्रणी र्भवति, अग्रं यज्ञेषु प्रणीयतेऽगं नयति सन्नममानोऽक्नोपनो भवतीति श्नौलाष्टौवि र्न क्नोपयति न स्नेहयति त्रिभ्य आख्यातेभ्यो जायतइति शाकपूणिरितादृक्तादृग् धातानीतान्त खल्वेते रकार मादत्ते गकारमनक्तेर्वा दहते र्वा नीः परस्तस्यैषा भवति(७,४,१)"इति॥ ४॥ २०

---

* आ० गा० १५०४,१,१८।

† यास्कस्त्वमुमेवं व्याख्यातवान्—"अग्निमीळेऽग्निं याचामीलिरध्येषणकर्मा पूजाकर्मा वा पुरोहितो व्याख्यातो यज्ञस्य। देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो

अथ पञ्चमी।

१२ ३२उ ३२ ३
तेमन्वतप्रथमन्नामगोना
२० ३१२३१२ २२
न्निःसन्नपरमन्नामजानन।
१ २ ३२३क२२ ३२
ताजानतीरभ्यनूषतत्ता
३ १२ ३१२ २२३ १२
आविर्भुवन्नरुणीर्यशसागावः॥ ५॥ २१
२२ २२२ २ २२
* ह्वाउ। ३। गावोह्वाउ। ३। वृषभपत्नीर्ह्वाउ। ३।

भवतीति वा यो देवः सा देवता। होतारं क्रातारं। जुहोते र्होते स्तौर्णवाभः। रत्नधातमम् रमणीयानां धनानां दातृतमम्"—इति ७, १५। "पुरोहितः पुर एतं दधति"—इति च याज्ञः २, १२॥ अत्र क्वचि स्वरसन्निवेशविधानप्रकारमिदन्त्वमाह दौचितिः—"तत्राग्निशब्दोऽव्युत्पत्तिपक्षेऽग्रिपदत्यन्तोदात्तः व्युत्पत्तौ तु नि-प्रत्ययस्वरेण। अम्। सुप्पादनुदात्तः अभिपूर्वदृत्येकादेशस्त्वेकादेशउदात्तेनेत्युदात्तः। इडे। तिङतिङइति निघातः। संहितायां तूदात्तादनुदात्तस्येतीकारः स्वरितः। स्वरितात् संहितायामिति ङे इत्यस्य प्रचयापरपर्यायो वा एकश्रुतिः। पुरः शब्दोऽन्तोदात्तः पूर्वाधरावराणामित्यसि प्रत्ययस्वरात्। हित-शब्दोऽपि धाञो निष्ठायां दधातेर्हिरिति हादेशे प्रत्ययस्वरेणान्तोदात्तः। पुरोऽव्ययमिति गति-सञ्ज्ञायां कुगतीति समासे समासान्तोदात्ते तत्पुरुषे तुल्यार्थैरित्यव्यय-पूर्वपद-प्रकृतिस्वरेण गतिकारकोपपदात् कृदिति कृदुत्तरपद-प्रकृतिस्वरे यथादिस्वरे च पूर्वपूर्वापमर्देन प्राप्ते गतिरनन्तर इति पूर्वपद-प्रकृतिस्वरः। पुरः-शब्दोकारस्य संहितायां प्रचये प्राप्ते उदात्तस्वरितपरस्य सन्नतर इत्यायनुदात्तः। ऋत्विक् शब्दः कृदुत्तर-प्रकृतिस्वरेणान्तोदात्तः। होत्र-शब्दस्तन्-प्रत्ययान्तो नित्स्वरेणाद्युदात्तः। रत्न-शब्दो नञ्विषयस्येत्यादुदात्तः रत्नानि दधातीति रत्नधाः। समासस्वरेण कृदुत्तरपद-प्रकृतिस्वरेण वान्तोदात्तः। तमपः पित्त्वादनुदात्तत्वे स्वरितप्रचयविधित्यादि यथाशास्त्रं मुन्नेयम्"—इति वै।

* "गवां व्रते"—इति आ० ब्रा० २, २, २१। तत्र पूर्वम्।

२र र र २ र र र २ र
वैराजपत्नीर्हाउ। ३। विश्वरूपाहाउ। ३। अस्मासुरम
र १र र १ १
ध्वꣳहाउ। ३। तेमन्वतप्रथमन्नामगो२नाम्। त्रिःसप्त
र १र र र १ २र
परमन्नामजा२नान्। ताजानतीरभ्यनूषता२ह्वाः। आ
१ र र १ २र २र र र
विभुंवन्नरुणीर्यशसागा२वाः। हाउ। ३। गावोहाउ।
१ र र २र र र २ र र
३। वृषभपत्नीर्हाउ। २। वैराजपत्नीर्हाउ। ३। विश्वरूपा
र २ र र २ र
हाउ। ३। अस्मासुरमध्वꣳहाउ। ३। अस्मासुरमध्वा३ꣳ
२ २ २र १र र २ १ १र र र १ २र १ र २र
हाउ। वा। ए। गावोवृषभपत्नीर्वैराजपत्नीर्विश्वरूपा
१र १ २र १र र २ १ २र र र १ २र
अस्मासुरमध्वम्। २। ए। गावोवृषभपत्नीर्वैराजपत्नीर्वि
१ र २र १र २ ३ १ १ १ १
श्वरूपाअस्मासुरमध्वा२३४५म्॥ १७ *॥

२र १र र १
† हाउ। ३। तेमन्वतप्रथमन्नामगो। नाम्। ३।
२र १ र १ २र
हाउ। ३। त्रिःसप्तपरमन्नामजा। नान्। ३। हाउ३।
१र र र १ २र
ताजानतीरभ्यनूषता। ह्वाः। ३। हाउ। ३।

---

* आ० गा० १प० ४, १, १७।

† "गवां व्रते"—इति आ० ब्रा०३,२,२७। तत्र पूर्वम्।

२र १ र र १ २ २
आविभुवन्नरुणीर्यशसागा। वाः। ३। ह्वाउ३। वा।

२र १ २र २र १ ३ १ १ १ १
ए। दुघाः। २। ए। दुघा२३४५: ॥ १८ * ॥ २१

त्रिष्टुभा वामदेवोऽस्तौदग्निं तेमन्वतेति च।

हे "अग्ने!" "ते" स्तोत्रं कुर्वाणा अङ्गिरसः "गोनां" † गवां वाचां ‡ सम्बन्धि नाम स्तुति-साधकं शब्दमात्रं "प्रथमं" पूर्वम्, "अमन्वत" अजानत पश्चात्तस्या वाचः सम्बन्धीनि "त्रिःसप्त" एकविंशतिसङ्ख्याकानि "परमं" परमान्युत्कृष्टानि "नाम" नामानि स्तुति-साधकानि स्तोत्राणि [जातावेकवचनम् ¶] छन्दांसि वा [तानि च गायत्र्यादीनि जगत्यन्तानि सप्त §, अति-जगत्यादीनि अतिधृत्यन्तानि सप्त‖, कृतिप्रभृतीन्युत्कृतिपर्यन्तानि सप्त+] 'जानन्' अजानन् अलभत एवंविधच्छन्दोयुक्तै र्मन्त्रै रग्निमस्तुवन्नित्यर्थः। "ताः" वाचः "जानतीः" सर्वं जानत्यः "याः" [यन्ति गच्छन्त्युषः कालं प्रापयन्ति ताः] "अभ्यनू-

---

आ० गा० १५० ५,२,१८।

† "गोः पादान्ते (७, १, ५७)"—इति पा०।

‡ "गौः"—इति वाङ्नामसु चतुर्थं नैघण्टुकम् (१,११)।

¶ "जात्याख्यायामेकवचनं बहुवचनमन्यतरस्याम्"—इति पा० १,२,६०।

§ गायत्री, २ उष्णिक्, ३ अनुष्टुप्, ४ बृहती, ५ पङ्क्तिः, ६ त्रिष्टुप्, ७ जगती।

‖ अतिजगती, २ शक्करी, ३ अतिशक्करी, ४ अष्टिः, ५ अत्यष्टिः, ६ धृतिः, ७ अतिधृतिः।

+ कृतिः, २ प्रकृतिः, ३ आकृतिः, ४ विकृतिः, ५ संकृतिः, ६ अभिकृतिः, ७ उत्कृतिः।

अथ षष्ठी।

२३१२ २२३१
समन्यायन्तुपयन्त्यन्याः
२३२२३क१२
समानमूर्वन्नद्यस्पृणन्ति।
२३२६११ २१२
तमूग्रुचिग्रुचयोदीदिवाꣳस
३१२ १२३१२३१२
मपान्नपातमुपयन्त्यपः॥ ६॥ २२ *

षत" अस्तुवन्। ततः सूर्यस्य "यशसा" तेजसा सह "अरुणीः" अरुणवर्णाः "गावः" † "आविर्भुवन्" प्रादुरभूवन्। यद्वा "ते" अङ्गिरसः "प्रथमं" पुरातनं "नाम" एहि सुरभि गुग्गुलु-गन्धिनीति धेनु-नामधेयम् "अमन्वत" उच्चारयामासुः। पश्चात् स्व-भूतानि पणिभिरपहृतानि त्रिःसप्त-रत्नान्यविन्दन्। तत उच्चारितं जानत्यो "गावः" "अभ्यनूषत" हम्भारवलक्षणं शब्द-मकुर्वत। तदानी मुषाः प्रादुरभूदिति॥

"तेमन्वतप्रथमन्नामगोनाम्त्रिःसप्तपरमन्नामजानन्। ता-जानतीरभ्यनूषतच्चाआविर्भुवन्नरुणीर्यशसागावः"—इति छन्दो-गाः। "तेमन्वतप्रथमन्नामगोनाम्त्रिःसप्तपरमन्नामजानन्। ता-जानतीरभ्यनूषतच्चाआविर्भुवन्धेनोस्त्रिःसप्तमातुःपरमाणिविन्दन्। तज्जानतीरभ्यनूषतत्राआविर्भुवद्दरुणीयशसागोः" — इति बह्वृ-चाः॥ ५॥ २१

* ऋ०८,७,१४,२।

† "अरुणो गाव उषसाम्"—इति निघ० १, १५, ७।

२र १र२ २१ र २ २र१
* ह्वाउ। ३। ऐरयत्। ३। अपःसमैरयत्। ३। भूत
र २ २र र र २र र र
मैरयत्। ३। अपाङ्गर्भोग्निरिडा। पाङ्गर्भोग्निरिडा। २।
२ र र र १ र २ १ २
पृथिव्यागर्भोग्निरिडा। ३। समन्न्यायन्त्युपयन्तियाऽ३न्याः।
२र१र ३ १ २ १र र र २ १
समानमूर्वन्नद्यस्पृणाऽ३न्ती। तमुग्रुचिꣳग्रुचयोदीदिवाऽ
२ २१र र २१ २ २र
३ꣳसाम्। अपान्नपातमुपयन्तियाऽ३पाꣳः। ह्वाउ। ३।
१र२ २१ र र २र१र २ २र
ऐरयत्। ३। अपःसमैरयत्। ३। भूतमैरयत्। ३। अपा
र र २र र र २ र र र
ङ्गर्भोग्निरिडा। पाङ्गर्भोग्निरिडा। २। पृथिव्यागभोग्निरिडा
२ र र र २ २र २ १
।२। पृथिव्यागर्भोग्निरिडा ३। ह्वाउवा। ए। अग्निःग्नि
२ १ २र २ १ २ १ २र १र २ १ २ १ २र
ग्रुक्तः। ए। ग्रुक्तःग्निग्रुक्तः। ए। तेजःशक्रस्यशक्रम्। ए।
१र २ १र र १र २र १र २ १ २र १ २र १ २र १ र ३
तेजःसग्राःसमीचीः। ए। तेजउषोनजारः। ए। सुवर्ज्योती
१ १ २ १
२ऽ४५ः॥ ३॥

२र १र २ १ र २ १
ह्वाउ। ३। ऐरयन्। ३। समैरयन्। ३। सम
२ १ र २ १ २ २ र १ र
स्वरन्। ३। समन्यायन्त्युपयन्तियाऽ३न्याः। समानमूर्व

---

* "चयां प्रते द्वे"—इति आ०ब्रा० ३,२,२२।

२ १ २ १ २ २ १ १
न्नद्यस्पृणा२३न्तो। तमूग्ंशुचिग्ंशुचयोदीदिवा२ ३ ए

२ २१ २ २ १ २ २ १
साम्। अपान्नपातमुपयन्तिया२३पाः। ह्वाउ। ३। ऐ

२ १ २ २ १ २ २ २
यन्। ३। समैरयन्। ३। समस्वरन्। २। समस्वरा३न्।

२ ३ १ १ १ १
ह्वाउवा३। ई२३४५॥ ४ * ॥ २२

इतीयं चिष्टुबाग्नेयी दृष्टा गत्समदेन सा।

"अन्याः" वर्षाणाः "आपः" "संयन्ति" भूम्यां सङ्गच्छन्ते "अन्याश्च" "पूर्वं" तत्रावस्थिताः "उपयन्ति" उपगच्छन्ति। ताः सर्वा आपः "समानं" सह "नद्यः" नदीभूत्वा "ऊर्वं" समुद्रमध्ये वर्तमानं वडवानलं "पृणन्ति" प्रीणयन्ति [पृण प्रीणने(प०) तौदादिकः] "तमु" तमेव "अपान्नपातम्" "शुचिं" निर्मलं "दीदिवांसं" दीप्यमानं [दीदिवेति छान्दसो दीप्तिकर्मा लिटः क्वसुः॥ वस्वेकाजाद्घसा मिति नियमादडभावः। छन्दसीवेति वक्तव्य मिति वचनाद्विवचनाभावः] एवम्भूतं "शुचयः" शुद्धाः "आपः" "उपयन्ति" समीपे गच्छन्ति॥

एष हि वैद्युताग्निरूपेण मेघे वर्तमानोऽस्मान् अजीजनदिति बुधा वडवानलरूपेण वर्तमानं तं पर्युपासत इत्यर्थः। यद्वा अन्या

* आ० गा० ३५० ४, ९, ३-४।

एकधनाख्या * आपः संयन्ति। चात्वालोत्करयोर्मध्ये † वसतीवरीभिः सङ्गच्छन्ते। अन्या वसतीवर्याख्या आपश्च ‡ उपर्यन्ति उपगच्छन्ति एकमत्वं प्राप्ता भवन्ति। एताश्च मिलित्वा यज्ञं साधयन्त्यः तत्साध्य-दृष्टि-द्वारा नद्यो भूत्वा ऊर्वं पृणन्तीत्यादि समानम्। एवं हि आपो वा अस्मईन्त वयं पूर्वं यज्ञं वक्ष्याम इत्यादिको बह्वृच-ब्राह्मण-विनियोगश्चानुगच्छते॥

"अपान्नपातमुपयन्त्यापः"—"परितस्थुरापः"—इति साम्नऋचः पाठ-भेदः॥ ६॥ २२

---

* "सोमकण्डनाय यैर्जलमानीयते ते कुम्भा एकधनाः। एकं धनं सोमरूपं यत्रेति"—इति वेददीपः (य० मा० प्रा० स० ५ अ० ७क०)।

† "उत्तरवेदिनिचयार्थं यत्र भूप्रदेशे गर्तं खनति स प्रदेशश्चात्वाल उच्यते"—इति वेददीपः (य० मा० प्रा० स० ५ अ० ७क०)। "स्फ्योत्खातां गर्त मुत्करे त्यजेत्"—इति वेददीपः (य० मा० प्रा० स० १ अ० २५क०)।

‡ "अग्नीषोमीयस्य पशोर्वपामार्जनान्ते वसतीवरीग्रहणम् स्यन्दमानानामनग्निमिते-ऽग्निमत्त्वे निनाह्यात्पुरेजानस्येदनीजानोऽन्यस्यापि समीपावस्थितस्य पुरेजानस्योभया भाव उल्कर्षीं हिरण्यं वोपर्यु परि धारयन् हविष्यतीरिति"—इति का० श्रौ० ८, ९, ७-१०। अग्नीषोमीयस्य पशोर्वपामार्जनपर्य्यन्ते कर्मणि कृते अनस्तङ्कृते रवौ वह्नीनामपामेकदेशाद् वसतीवरीसञ्ज्ञानां सोमार्थीनामपां ग्रहणं कार्यं हविष्यतीरिति (य० मा० प्रा० स० ६ अ० २३क०) मन्त्रेण। यदि रविरस्तङ्गतो यजमानस्य पुरा ईजानः सोमयाजी तदा गृहे एव निनाह्यान्मणिकाद् वसतीवरीग्रहणम् निनह्नीयो निनाह्यः। यदि च यजमानः पुरा न सोमयाजी तर्हि समीपस्थितस्य यज्ञः मणिकाद् ग्रहणम् स्वस्य च यज्ञकर्तृत्वाभावे उल्कां कनकं वा वह्नीनामपां समीपे धारयन् वह्नीभ्यो वसतीवरीर्गृह्णीयादिति सूत्रार्थः॥

अथ सप्तमी।

१२ २२ ३ १ -२३ १२ २२ ३ १ २२
आप्रागाद्भद्रायुवतिरक्तः केतूंत्समीर्त्सति।
१२ ३२ ३ १ २३ १ २ ३ १ २ ३ १ २
अभूद्भद्रानिवेशनीविश्वस्य जगतोरात्री ॥ ७ ॥ २३ *

१ १२ २ २ २ १२ २ १ १
† हो२इ। ३। आप्रागाद्भद्रायुवतिः। हो२इ। ३।
१ २२ १२ २ २ १ १ २ २ १२ २ १ २ २
अक्तःकेतूंत्समीर्त्सति। हो२इ। ३। अभूद्भद्रानिवेशनी।
१ १ २ १ २२ १२ २२ १ १
हो२इ। ३। विश्वस्यजगतोरात्री। हो२इ। २। हो२।
२ २ ३ १ १ १ १
वाइ। हाउवाइ। ई२३४५ ॥ ६ ‡ ॥ २३

अस्तौदनुष्टुभा रात्रिं वामदेव ऋचानया।

"भद्रा" सूर्यप्रकाशसन्तापं निवारयन्ती सुखकरी "युवतिः" तमसो मिश्रयित्री¶ "रात्रिः" "आ प्रागाद्" आभिमुख्येन प्रगच्छति। "अक्तः"§ चन्द्रमसः "केतून्" रश्मीन् "समीर्त्सति" सम्यक्सम्बन्धयितु

---

* ऋ०४,५,१०,१।

† "राये रुत्तरम्"—इति आ०ब्रा०३,२,२२।

‡ आ०मा०३प०४,२,६।

¶ युवतिरिति मिश्रणार्थ-यौतेः रूपम्; तथाचैवमर्थः प्रकृति-लभ्यः।

§ "अक्तर्नामान्युत्तराणि द्वादश। अक्तः कस्मादुपाक्तरन्यस्मिन् कर्माणि"—इत्यादि निरु० नै० २, २०।

अथाष्टमी।

२ २ २ १ २ २ २ १ २ ऊ ३
प्रत्तस्यवृष्णोअरुषस्यनूमहः
२ ३ १ २ ३ १ २ ३ १ २
प्रनोवचोविदथाजातवेदसे।
३ १ २ ३ १ २ २ १ २ ३
वैश्वानरायमतिर्नव्यसेशुचिः
१ २ २ १ २ ३ १ २
सोमइवपवतेचारुरग्नये ॥ ८ ॥ २४ *

२ १ १ २ १ १
† ह्राउ। ३। ऊ२। २। ऊ२। वा३। ह्राउवा३।

१ २ १ १ २ २ २ १ २ २ १ २
ह्रस्ह्रस्ह्रस्अर्चिःशोचिस्तपोहरः। प्रत्तस्यवृष्णोअरुषस्यनूमा
२ १ २ २ २ २ १ २ २ २ २ १ २
२३हाः। प्रनोवचोविदथाजातवेदा२३साइ। वैश्वानराय
२ १ २ २ १ २ २ २ १ २
मतिर्नव्यसेशू२३चीः। सोमइवपवतेचारुरग्ना२३याइ।

मिच्छति च। अतएव "भद्रा" कल्याणी रात्री "विश्वस्य" सर्वस्य "जगतः" "निवेशनी" निवेशकारिणी "अभूत्" भवति। अहनि स्व-स्व-व्यापारात् खिन्नान् सर्वप्राणिनः स्वाश्रयेषु स्वापयतीत्यर्थः ॥ ७ ॥ २३

---

* ऋ०४,८,१९,३।

† "विष्णोर्नुकम्"—इति आ०ब्रा०३,२,२२।

२र १र १ऽ २ २ ३
हाउ। ३। ऊ२। २। ऊ२। वा३। हाउवा३। ई२
१११
३४५ ॥ ७ * ॥

२र २र ३र२र ३र२र २ र १
† हाउहाउहाउ। ओहा। २। ओहाइ। वयोहोइ।
२र १ २ १ २र १ २र १
३। पयोहोइचक्षुर्होइ। ३। ओजऽहोइ। ३। आयुर्होइ।
२र १ २ र १ २र र १ २
३। तपोहोइ। ३। वर्चोहोइ। ३। तेजोहोइ। ३। सुव
१ २र १ २१ र २र १
र्होइ। ३। ज्योतिर्होइ। ३। प्रत्तस्यवृष्णोअरुषस्यनूमा२३-
२ १ र र र र २१र २ २र र १र
हाः। प्रनोवचोविदथाजातवेदा२३साइ। वैश्वानरायमति
२ १र २ १र र र २१ २ २र
र्नव्यसेशू२३चीः। सोमइवपवतेचारुरग्मा२३याइ। हाउ
२ ३र ३र ३र २र २ र र २ र १
२हाउ। ओहा२। आहाइ। वयोहोइ। ३। पयोहोइ।
१ १ २र १ २र १
३। चक्षुर्होइ। ३। ओजऽहोइ। ३। आयुर्होइ। ३।
२ र १ २ र १ २ र १ २ १
तपोहोइ। ३। वर्चोहोइ। ३। तेजोहोइ। ३। सुवर्हो
२र १ २र १ ३ ५र र
इ। ३। ज्योतिर्होइ। २। ज्योतिर्हा२। वा२३४ओहो

---

* आ० मा०३५० ४, २, ७।

† "महाव्रतेऽग्नावरण्यते ह्वे"—इति आ० ब्रा० ३,२,२८। तच्च पूर्वम्।

२२ २ १ २ १ २ २२ २ १ २२१२ २ १
वा। ए। अग्निःसमुद्रमाक्षयन्। ए। अग्निमूर्ज्जाभवद्दिवः।

२२ २२ १२ २ १ २ २ १२२२३ १ १ १ १
ए। आयुर्द्धाअस्मभ्यंवर्चोधाद्देवेभ्या२३४५ः॥ ३ * ॥ २५

वैश्वानरं जगत्यास्तौद्वरद्वाजो बार्हस्पत्यः।

"प्रक्षस्य" सम्पृक्तस्य व्याप्तस्य [यद्वा पृक्तं हविर्लक्षण मन्नं† तद्वतः] "वृषणः" सेक्तुः "अरुषस्य"‡ आरोचमानस्य "वैश्वानराय"¶ "महः" पूजायुक्तं बलं तेजो वा "नु" क्षिप्रं स्तौमि। अतएव "नः" अस्मदीयं "वचः" वचनं "विदथे" यागे§ "प्रयक्षति" स्तौतीत्यर्थः। "जातवेदसे" जातप्रज्ञाय जातधनाय‖ वा तमुद्दिश्येत्यर्थः। उक्तमेव प्रकारान्तरेणादरादाह—"नव्यसे" नवतराय "वैश्वानराय" अग्नये "शुचिः" निर्मला स्तोतॄणां

---

* आ० गा० ३प० ६, १, ३।

† "पृक्तः"—इति अन्ननामसु पञ्चमं नैघण्टुकम् २, ७।

‡ "अरुषीरारोचनात्"—इति निरु० दै० ६, ७।

¶ वैश्वानरः कस्माद् विश्वान् नरान् नयति विश्व एनं नरा नयन्तीति वाग्नि वा विश्वानरा एव स्यात् प्रत्यृतः सर्वाणि भूतानि तस्य वैश्वानरः। तस्यैषा भवति * * * इतो जातः सर्वमिदमभिविपश्यति वैश्वानरः संयतते सूर्य्येण राजा यः सर्वेषां भूतानां मभिञ्यथणीयस्तस्य वयं वैश्वानरस्य कल्याणे मतौ स्यामेति। तत्को वैश्वानर मध्वर इत्याचार्या वर्षकर्मणाह्येतं स्तौति"—इति निरु० दै० १, २१-२२।

§ "विदथः"—इति यागनामसु पञ्चमं नैघण्टुकम् ३, १७। "विदथानि वेदनानि। विदथानि प्रचोदयन्नित्यपि निगमो भवति"—इति नि० नै० ६, ७।

‖ "जातवेदाः कस्माज्जातानि वेद जातानि वैनं विदुर्जाते जाते विद्यत इति वा जातविद्यो वा जातधनो जातविद्यो वा जातप्रज्ञानो यत्तज्जातः पशूनविन्दतेति तज्जात-

ओषधिर्वा "चारुः" कल्याणी "मतिः" मननीया स्तुतिश्च "पवते" मत्सकाशात् प्रभवति स्वयमेव गच्छतीत्यर्थः। "सोमः इव" यथा सोमो दशापवित्रात् स्रवति तद्वदित्यर्थः * ॥

"प्रचस्य"- "पृचस्य"—इति "मह:"-"सह:"— इति, "प्रनोवोच" "प्रनुवोचम्"—इति, "जातवेदसे"-"जातवेदसः— इति, "नव्यसे"—"नव्यसि"—इति च साम्न ऋचः पाठ-भेदः ॥ ८ ॥ २४

वेदसो जातवेदस्त्वमिति ब्राह्मणं तस्मात् सर्वानृतून् पशवोऽग्निमभि सर्पन्तीति च तस्यैषा भवति ॥ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः। सनःपर्षदति-दुर्गाणिविश्वानावेवसिन्धुन्दुरितात्यग्निः। जातवेदसइति जातवेदस्यां वैवं जात-वेदसेचाय सुनवाम सोममिति प्रसवायाभिषवाय सोमं राजान मसृत मरातो यतो यज्ञार्थं मनिष्यो निदहाति। निश्चयेन दहति भस्मीकरोति सोमोददित्यर्थः। स नः पर्षदतिदुर्गाणि विश्वानि दुर्गमानि स्थानानि नावेव सिन्धुं नावा सिन्धुं सिन्धुं नावा नदीं जलदुर्गां महाकुलां तारयति दुरितात्यग्निरिति दुरितानि तारयति। तस्यैषा परा भवति ॥ प्रनूतंजातवेदसमश्वंहिनोतवाजिनम्। रद्धो बर्हिरासदे। प्रहिणुत जातवेदसं कर्मभिः समक्तुवान मपि वोपमार्थे स्यादक्तमिव जातवेदसमिदद्धो बर्हिरासीदत्रिति तदेतदेक मेव जातवेदसङ्गायत तृचं दशत-योषु विद्यते। यत्तु किञ्चिदाग्नेयन्नजातवेदसानां स्थाने युज्यते स न मन्येताग्नेयमेवाग्नि रित्यपेते उत्तरे ज्योतिषी जातवेदसौ उच्येते। ततो तु मध्यमः। अभिप्रवन्तसमनेव योषा इति तत्पुरस्ताद्व्याख्यात मथासावादित्य उदुत्यञ्जातवेदसमिति तदुपरिष्टाद् व्याख्यास्यामो यस्तु स्तृक्षं भजते यस्मै हविर्निरुप्यते यमेव सोग्निर्जातवेदा निपात-मेवैते उत्तरे ज्योतिषी एतेन नामधेयेन भजेते"—इति निरु० दै० १. १९—२०।

* "दशापवित्रेण परिस्रुच्यैष ते योनिरिति ग्रहसादनमिति का० ९, ५, २५। दशापवित्रेण गृहीतं ग्रहं परिस्रुच्य पात्राद्बर्हिर्निगतं सोमं मार्जयित्वा एष ते योनि-रिति मन्त्रेण ग्रहस्य सादनं करोति। वीप्सा सर्वग्रहार्था इति सूत्रार्थः॥

अथ नवमी।

१ १ ३ १ २र ३ २
विश्वे देवाममभ्ऽण्वन्तु यज्ञ-
३ १र २र ३ १र २र३ १ २
मुभेरोदसीअपान्नपाच्चमन्म।
२ ३ १ २ ३ १ २
मावोवचाऽसिपरिचच्याणि
३ २उ ३ १ २
वोचऽसुम्ने षिद्वोअन्तमामदेम ॥ ९ ॥ २५

२र १ २ १ १
* हाउ। ३। आइद्वी। ३। आइद्वी२। ३। आइ-
२ १ २ १ १र र र २ १
द्विदा२इ। २। आइद्विदाइ। विश्वे देवाममभ्ऽण्वन्तुया
२ १ र र र र २ १ २ १र र
२३ज्ञाम्। उभेरोदसीअपान्नपाच्चमे२३न्मा। मावोव
र र २ १ २ २र १ २
चाऽसिपरिचच्याणिवो२३चाइम्। हाउ। ३। आइद्वी
१ १ २ १ २ १
।३। आइद्वी२। ३। आइद्विदा२इ। २। आइद्विदाइ।
१ र र र ३ २ ३ १ १ १ १
सुम्ने षिद्वोअन्तमामदा२इमाउवाइ। इ२३४५॥ ८ †॥ २५

---

* "विश्वेषां देवानां व्रतम्"—इति आ० ब्रा० ३, २, २२।

† आ० गा० ३प० ४, २, ८।

एषा त्रिष्टुब् वैश्वदेवी भरद्वाजेन वीक्षिता।

"विश्वे" सर्वे "देवाः" "मम" मदीयं "मन्म" मननीयं "यज्ञं" यजनीयं पूजां हवींषि वा "शृण्वतु" गृह्णन्त्वित्यर्थः। "अपान्नपात्" मध्यस्थानोऽग्निश्च* "उभे रोदसी" द्यावा-पृथिव्यौ अस्मदीयं स्तोत्रं शृण्वन्तु चित्ते अवधारयन्तु।

अथ प्रत्यक्ष-कृताः—हे "देवाः"! "वः" युष्माकं "परिवर्ज्यांणि" परिवर्जनीयानि यानि "वयांसि" स्तोत्राणि "मा

---

* "अपान्नपात् तनूनप्त्रा व्याख्यातः"—इत्यादि निरु० दै० ४,१८—१९। "तनूनपादाज्यं भवति नपादित्यनन्तरायाः प्रजाया नामधेयम्"—इत्यादि निरु० दै० २, ५॥ "आपः—इत्यन्तरिक्षनामसु पठितं नैघण्टुकम् १,३। "नपात्"—इति अपत्यनामसु तयोदशं नैघण्टुकम् २, २। अग्नेर्मध्यस्थानत्वं जातत्वादिकञ्च यथा—"अपा मुपस्थ उपस्थाने महत्यन्तरिक्षलोक आसीना महान्त इति वा गृह्णत मध्यमिका देवगणा विश्व इव राजान मुपतस्थुर्हविरिथ मृग्मन्त मिति वार्चनीय मिति वा पूजनीथ मिति वा हव्यं दूतो देवानां विवक्षत आदित्यादिवस्वन्विवासनवान् प्रेरितवतः परागताद्वाग्नेयस्यानलस्य मातरिश्वान मार्च्छीर मार्च। मातरिश्वा वायुर्मातर्यन्तरिक्षे श्वसिति मातर्याश्वनितीति वाथैनमेताभ्यां सर्वाणि स्थानान्यभ्यापादंस्तौति॥ मूर्द्धाभुवोभवतिनक्तमग्निस्तस्मूर्द्धोजायतेप्रातरुद्यन्। मायामृतुथाग्निधानामेतामपोयन्नृषिश्चरतिप्रजानन्। मूर्द्धा मूर्त्ते मस्मिन् धीयते मूर्द्धा यः सर्वेषां भूतानां भवति नक्त मग्निस्ततः सूर्यो जायते प्रातरुद्यंस्त्व एव। प्रज्ञां त्वेतां मन्यन्ते यज्ञियानां देवानां यज्ञसम्पादिना मपो यत् कर्म चरति प्रजानन् सर्वाणि स्थानान्यनुसञ्चरति त्वरमाणस्तस्तोत्तरा भूयसे निर्वचनाय॥ सोमेनत्वदिदिवेदासोऽग्निमजीजनऋक्तिभीरोदसिप्राम्। तमूचथऋणुन्नेधाभुवेकंसचोषधीःपचतिविश्वरूपाः। सोमेन यं हि दिवि देवा अग्नि मजनयञ्छक्तिभिः कर्मभिर्यावापृथिव्यो रापूरणन्नमकुर्वन्नेधा भावाय पृथिव्या मन्तरिक्षे दिवीति आकपृणिर्यदस्य दिवि क्षतीयं तदसावादित्यइति हि ब्राह्मणं तदग्नीक्षत्य स्तौत्यथैनमेतयादित्यक्षत्य स्तौति"—इति निरु० दै० १, २६—२८।

अथ दशमी।

१ २ ३ १ २ ३ १र २र ३ २
यशोमाद्यावापृथिवीयशोमेन्द्रबृहस्पती।
२ ३ १ २ ३ १ २ ३ १ २
यशोभगस्यविन्दतुयशोमाप्रतिमुच्यताम्॥
१ २ २ ३ २ ३ १ २ ३ १ २
यशस्वयः स्याः सꣳसदोहम्भवदितास्याम्॥ १०॥ २६

२ऽ १र २र १र र २ १र २ऽ
* ह्याउ३वा। यशोमाद्यावापृथिवी। ह्याउ३वा।
१र २र २र २ऽ २र २
यशोमेन्द्रबृहस्पती। ह्याउ३वा। यशोभगस्यविन्दतु।
२ र २र १ २ र २ऽ २
ह्याउ३वा। यशोमाप्रतिमुच्यताम्। ह्याउ३वा। यश
१ र २ १ २ऽ २ १ २ १र र
स्वियस्याः सꣳसदः। ह्याउ३वा। अहम्भवदितास्याम्।
२ऽ १ २ १
ह्याउ३वा। अश्वमिष्टयेऽहस्॥ १२†॥ २६

वोचं" न ब्रवीमि अपितु समीचीनानीति। अतः, "वः" युष्माकम् "अन्तमाः" अन्तिकतमाः सन्तो वयं "सुम्नेष्वित्" युष्माभिर्दत्तेषु सुखेष्वेव‡ वर्तमानाः "मदेम" मोदेम॥

"यज्ञम्"—"यज्ञियाः"—इति पाठौ॥ ९॥ २५

---

* "यशः"—इति ऋा०ब्रा०३,२,२३।

† ऋा०गा०२५०४,२,१२।

‡ "सुम्नम्"—इति सुखनामसु पोडशं नैघण्टुकम् ३, ६।

अथ एकादशी।

१२ १ २ ३क २र ३ १ २ ३ १ २ ३ १ २ ३ १ २ २
इन्द्रस्यनुवीर्य्याणिप्रवोचंयानिचकारप्रथमानिवज्री।

२ ३ १ ३ २ ३ १ २ ३ २ १ २ ३ १ २
अहन्नहिमन्वपस्ततर्द प्रवक्षणाअभिनत्पर्वतानाम्॥११॥२७*

वामदेवो महापङ्क्त्या स्तौति लिङ्गोक्तदेवता।

"द्यावापृथिवी" द्यावापृथिव्योः "यशः" "मा" स्तोतारम् "आविन्दतु" लभतां प्राप्नोत्वित्यर्थः। किञ्च, "इन्द्रबृहस्पती" इन्द्राबृहस्पत्योः † "यशः" "मा" मां विन्दतु। किञ्च, "भगस्य" आदित्यस्य ‡ "यशः, "मा" मां विन्दतु। बहुलेन यशसा यशोमया "मा प्रतिमुच्यताम्" न प्रमुच्यताम्। "यशस्प्रसाः" अस्याः मम "संसदः" समूहस्य "यशः" न प्रमुच्यताम्। "अहं" प्रवदिता सर्वत्र प्रवक्ता "स्याम्" भूयासम्॥ १०॥ २६

---

* ऋ०१,९,३६,१।

† "तिसृणां देवता इत्युक्तं पुरस्तात्तासां भक्ति-साहचर्यं व्याख्यास्यामः। * * *। "अथैतानैन्द्रभक्तीनि। * * *। अथास्य संस्तविका देवा अग्निः सोमो वरुणः पूषा बृहस्पतिः ब्रह्मणस्पतिः पर्वतः कुत्सो विष्णुर्वायुः। अथापि मित्रो वरुणेन संस्तूयते पूष्णा रुद्रेण च सोमोऽग्निना च पूषा वातेन च पर्जन्यः"—इति निरु० दै० १,१०।

‡ "भगो व्याख्यातः तस्य कालः प्रागुत्सर्पणात्"—इत्यादि निरु० दै० ६,१३—१४। "जार आ भगम्। जार इव भग आदित्योऽप जार उच्यते"—इत्यादि निरु० नै० ६,१६।

२ १ २ २ १२ १२१२
* वृत्रहत्यायहोइ। ३। अधृष्णवेहोइ। ३। अपूरवे

२२१ २ १२ २ २ १२
होइ।२। अपूरावा२इ। पृथिवीम्याहोइ। विवर्त्तयाहो

२ १ २ १ २२ १२
इ। २। विवर्त्तीया२। अन्तरिक्षंहोइ। ३। सुधारया

२२१ २ १२ २ २२१२
होइ। २। सुधारायाऽ२। दिवंवेपाहोइ। ३। अवेपयो

२ २१ १ १ऽ
होइ। २। अवेपायाऽ२ः। होइ। २। ऊवे२। हा

१ ऽ १ २१ २ १
३१उवा२। इन्द्र२। २। इन्द्र। स्नू। २। स्नू३। आ

१ २२ १२ २१ २ १
उ। वा२। वीर्य्याणि। प्रवा। २। प्रवा३१उ। वा२३।

२ ११११ १२ २ ऽ १२ २१ २
चा२३४५म्। यानी२। २। यानि। चका। २। चका३१

१ २ १२ २१ २ १
उ। वा२। रप्रथमा। निवा। २। निवा३१उ। वा२३।

२ ११११ १ ऽ १ २१
ओ२३४५। अह२न्। २। अहन्। अहाइम्। २।

२ १ १११ २१ २ १
अहा३१उ। वा२। अन्वपः। तता। २। ता३१उ। वा

३ ११११ १ ऽ १ २१ २
२३। दा२३४५। प्रव२। २। प्रव। ऋणाः। २। ऋणा३१

---

* "वार्चम्नम्"—इति आ० ब्रा० ३, २, १३।

१ २ १ २१ २ १
उ। वा२। अभिनत्या। वंता।.२। वंता३१उ। वा२३।
२ १११ २ १ २ २ १ २
ना२३४५म्। वृत्रहत्यायहोइ। ३। अधर्ष्णवेहोइ। ३।
२ २१२ २ २१ २ १२ २
अपूरवेहोइ। २। अपूरावा२इ। पृथिवीच्चाहोइ। ३।
२ १२ २ १ २१
विवर्त्तयाहोइ। २। विवर्त्तायाँ२। अन्तरिक्षंहोइ। ३।
२ २ १२ २ २ १ २ १२ २
सुधारयाहोइ। २। सुधारायाँ२। दिवंवेपाहोइ। ३।
२ २१२ २ २ १ १ १ ६
अवेपयीहोइ। २। अवेपायाँ२:। होइ। २। ऊवे। २।
२ २२ २ १२ २ १२
हा३१उवा२। ण। वृत्रहासपत्नहा। ३॥ १७ *॥ २७

दृष्टा हिरण्यस्तूपेन त्रिष्टुबेषेन्द्रदेवता।

"वज्री" वज्रयुक्त इन्द्रः "प्रथमानि" पूर्वसिद्धानि मुख्यानि वा "यानि" "वीर्याणि" पराक्रमयुक्तानि "कर्माणि" चकार। तस्य "इन्द्रस्य" तानि वीर्याणि। "नु" क्षिप्रं "प्रवोचं" प्रब्रवीमि। कानि वीर्याणीति? तदुच्यते—"अहिं" मेघम्† "अहन्" हतवान्। तदेकं वीर्यम्। "अनु" पश्चाद् "अपः" जलानि

* आ० गा० ३प० ४, २, १७।

† "अहिः"—इति मेघनामसु एकविंशतितमं नैघण्टुकम् १, १०।

अथ द्वादशी।

३ १२ २१ २ २ १ २
अग्निरस्मिजन्मनाजातवेदा
३ २ ३ १ २ २ १ २ ३ २
घृतम्मेचक्षुरमृतम्मआसन्।
३ १ २ ३ १२ २२ ३ १२
त्रिधातुरर्कोरजसोविमानो
१२ ३ १ २ ३ १ २ ३ १ २
जस्रञ्जोतिर्हविरस्मिसर्वम्॥ १२ ॥ २८ *

२ऽ २ १ २ १ २२ १ १ २२ १ २
† ह्वाउ३वा। अग्निरस्मिजन्मनाजातवेदाः। इडा।
१ १ २ २ऽ २ १ २२ १ २१ २ १ २
सुवः। इडा। ह्वाउ३वा। घृतम्मेचक्षुरमृतम्मआसन्।
१ २ १ १ २ २ऽ २ १२ २ १२ १२
इडा। सुवः। इडा। ह्वाउ३वा। त्रिधातुरर्कोरजसो

"ततर्ह" हिंसितवान् भूमौ पातितवानित्यर्थः। इदं द्वितीयं वीर्यम्। "पर्वतानां" सम्बन्धिनीः "वज्रेण:"प्रवहणशीला नदीः† "प्राभिनत्"·कूलद्वय-कर्षणेन प्रवाहितवानित्यर्थः। इदं तृतीयं वीर्यम् ‡॥ ११ ॥ २७

---

* मं०२,१,२१,१—३,१,२७,२—३,२,५,३।

† "अग्नेरिलादमन्नादनुगानम्—इति आ०ब्रा०४,१,२४। अस्यैव द्वितीयमेतत्।

† "वज्रेण:"—इति नदीनामसुभवसं नैघण्टुकम् १, १३।

‡ "अथास्य कर्म रसानुप्रदानं हतवधो या च का च वज्रगतिरिन्द्र-कर्मैव तत्"—इति निरु० दै० १, १०। हतवधो मेघ-वध इति च तद्भाष्यम्।

१२ २ १ २ १ १ २ १ २ १ २
विमानः। इडा। सुव.। इडा। हाउ३वा। अजस्र
१२ २१ २ १ २ १ २ १ १ २
ज्योतिर्हविरस्मिसर्व्वम्। इडा। सुवः। इडा ॥ २ * ॥ २८

विश्वामित्रऋषिस्त्रिष्टुप्छन्दस्त्वग्निरिति द्वयोः।

उत्तराग्नेः स्तुतिः पूर्वा स्तुतिः सर्वात्मनात्मनः।

हे कुशिकाः! भोक्तृ-भोग्य-भावेन द्विविधम् इदं सर्वं जगत्। "एतावद्वा इदमन्नं चैवान्नादश्च सोम एवान्न मग्नि रन्नादः"—इति श्रुतेः। तत्र सकल-भोक्तृ-वर्ग-रूपेणान्नादोऽग्निः। स च अग्निवायवादित्य-भेदेन त्रेधा भूत्वा पृथिव्यन्तरिक्ष-द्युलोकानधितिष्ठति। तदुक्तं वाजसनेयके—"स त्रेधात्मानं व्यकुरुतादित्यं द्वितीयं वायुं तृतीयम्"—इति।

तत्र सः "अग्निः" अहं "जन्मना" एव "जातवेदाः" "अस्मि" श्रवण-मननादि-साधन-नैरपेक्ष्येण स्वभावत एव साक्षात्कृत-परतत्त्वस्वरूपोऽस्मि। "घृतं मे चक्षुः" यदेतद्विश्वस्यावभासकं मम स्वभावभूतमक्षाणात्मकं चक्षुः तद् घृतम् इदानीं सत्यन्तं दीप्तम्। यदेतद् "अमृतं" कर्म-फलं दिव्यादि-विविध-विषयोपभोगात्मकं तत् "मे" मम "आसन्" आस्ये वर्तते। सकल-भोक्तृ-वर्गात्मना स्वयमेवावस्थानात्†। एवं स्वात्मनः पृथिव्यधिष्ठातृ-रूपता मभिधाय वायवात्मनान्तरिक्षाधिष्ठातृता माह—अर्को जगतः स्रष्टा

* आ० ब्रा० ३प० ४, १, २।

प्राणः। "सोर्चन्नचरत्तस्यार्चत आपो जायन्तार्चतैव मेक मभूदिति तदेवार्कस्यार्कत्वम्"—इति श्रुतेः। स प्राणः अहं "त्रिधातुः" त्रिधात्मानं विभज्य तत्र वायुात्मना "रजसः" अन्तरिक्षस्य "विमानः" विमाता अधिष्ठातास्मि॥ तथा आदित्यरूपेण द्युलोकाधिष्ठातृता माह—"अजस्रं ज्योतिः" अनुपक्षीणं नित्यं तेजः प्रकाशात्मा द्युलोकाधिष्ठाता आदित्योऽप्यहं मस्मि। एवं भोक्तृ-रूपता मात्मनोनुसन्धाय भोग्यरूपता मप्यनुसन्धत्ते। यत् "हविः" भोग्यं प्रसिद्धं मस्ति तत् "सर्वम्" अप्यहं मेवास्मि*।

यद्वा। अहम् "अग्नि रस्मि" देवानां हविः-प्रापणात् अङ्गनादिगुण-युक्तोऽस्मि। किञ्च, "जन्मना" उत्पत्या "जातवेदाः" जातज्ञानोऽस्मि। उत्पत्ति-क्षण एव सर्वज्ञोऽहं मस्मि। अथवा जातं सर्वं स्वात्मतया वेत्तीति जातवेदाः सर्वात्मक इत्यर्थः। तत् कथम्? इत्युच्यते—"घृतं मे चक्षुः" यदेतद् घृतं प्रसिद्धमस्ति तन्मे चक्षुः-स्थानीयम, यथा लोके चक्षुर्भासकम् एवं घृतमपि प्रचिप्तं ज्वालामुत्पादयत मम भासकम्। "अमृतं" प्रभारूपं यदमृत मविनाशि ज्योतिः "मे" मम "आसन्" आस्ये वर्त्तते। "त्रिधातुः" प्राणापानव्यानात्मकस्त्रिधा वर्तमानोऽर्काऽर्चनीयो यः प्राणोऽस्ति सोऽप्यहं मेवास्मि। तथा "रजसः" अन्तरिक्षस्य "विमानः" विशेषेण माता परिच्छेत्ता वायुश्चाहं मस्मि। किञ्च। "अजस्रं ज्योतिः" नैरन्तर्येण तापकः सूर्यश्चाहं मस्मि। किं बहुना। आज्य-पुरोडाशादिरूपं यदेतद्धवि रस्ति तदुपलक्षितं तत्सर्वं मय्यहं मस्मि। "सर्वं खल्विदं ब्रह्म"—इति

* अत्र यद्दीकायितव्यं तत् पुरस्तादेवास्माभिरथमजाऋतस्येत्यत्र टीकितम्।

अथ त्रयोदशी ।

२ ३ २ ३१२ २१३ १२
पात्यग्निर्विपोअग्रम्यदंवेः
१२३१२ २१३ १ २
पातियक्कश्चरणेसूर्य्यस्य ।
२ ३ १ २ ३ १ २ ३१२
पातिनाभासप्तशीर्षाणमग्निः
२१३ १ २ ३ १ २ ३ २
पातिदेवानामुपमादमृष्वः ॥ १३ ॥ २९ *

॥ तृतीय-दशति ॥

२१ २१ १ १ २१ २
† हाउ । ३ । पात्यग्निर्विपोअग्रम्यदंवेः । हा३१उवा
३ ५ २ २ ३
२३ । सू२३४वाः । इह । हा३१उवा२३ । ज्यो२३४
५ २१ २१ १ १ २१ २
तीः । हाउ । ३ । पातियक्कश्चरणेहरियास्या । हा३
३ ५ २ २ ३
१उवा२३ । सू२३४वाः । इह । हा३१उवा२३ । ज्यो२

श्रुतेः । तमनेकधाग्नेः सर्वात्मकत्व-प्रतिपादनेन परब्रह्मत्व मुक्तं भवति ॥

"अजस्र"-"घर्मः"—इति साम्न ऋचः पाठ-भेदः ॥ १२ ॥ २८

---

* ऋ०३,१,९,१—३,१,२५,२—३,१,२५,३ ।

† इदमपि सप्तैवात्मगतं तृतीयम् ।

५ २र २र र र र १ २ २
३४तीः। हाउ। ३। पातिनाभासप्तशीर्षाणमाग्निः। हा

३ ५ २ २ २
३१उवा२३। सू२३४वाः। दूह। हा३१उवा २३ ज्यो२३४

५ २र २र र र र १ २ २
तीः। हाउ। ३। पातिदेवानामुपपादमार्ष्णः। हा३१

३ ५ २ १ २
उवा२३। सू२३४वाः। दूह। हा३१उवा२३। ज्यो२३

५
४तीः॥ ३ *॥ २९

"अग्निः" "वेः" गत्यार्थाः † सर्वत्र व्याप्तायाः "विपः" रिपः भूम्याः ‡ "अग्रं" मुख्यं "पदं" "स्थानं" "पाति" रक्षति। "यज्ञः" महान्¶ अग्निः "सूर्यस्य" "चरणं" चरत्यनेनेति चरण मन्तरिक्षं§ "पाति"। "नाभा"‖ नाभौ अन्तरिक्षस्य मध्ये "सप्त-शीर्षाणं" सप्तगणं मरुद्गणं "पाति"। "ऋष्वः" दर्शनीयोऽयम् +

---

* पा० गा० ३य० ५, १, ३।

† "वेः—इति वेतेर्गतिकर्मणो रूपम्, नै०२, १४, १८।

‡ "विपः"—इति रिप इत्यस्य रेफव्यत्यये वकारभावे रूपम्, "रिपः"—इति तु पृथिवी-नामसु त्रयोदशं नैघण्टुकम् १, १।

¶ "यज्ञः"—इति महन्नामसु त्रयोदशं नैघण्टुकम् ३, ३।

§ "अनश्वान्तरिक्षनामसु "अध्वा"—इति (नै० १, ३, १२)।

‖ सुपां सुलुगित्यालं रूपम् (पा० ३, १, ३९)।

+ "ऋष्वः"—इति प्रज्ञते रूपमिदम् निरु० ५,३० २०,१२ १२,३७—१४,१२।

अथ चतुर्थखण्डे—

सैषा प्रथमा।

१ २ २१ ९ ३ २३ १ १
भ्राजन्त्यग्नेसमिधानदीदिवोजिह्वाचरत्यन्तरासनि।

१र २र ३१२ ३ २ ३१र २र ३१२
सत्वन्नोअग्नेपयसावसुविद्रयिंवर्चोदशेदाः॥ १॥ ३०

* रर र र१ २ १र र २
भ्राजाऔहोहोहाइ। त्यग्नेसमिधानादी१दिवा२ः।

२ र र१ २ १ २ २ र र
जिह्वाऔहोहोहाइ। चरत्यन्तारा१सानी२। सत्वाऔ

१ २ १र र र २ २ २१ २ ३र २
होहोहाइ। नोअग्नेपयसावसू३वीत्। रयिंवर्चोदशौहो

१ १ २ ४ ५ ४
३। उम्मा२। हा। औ३होवा। हो५इ। डा॥ ५†॥ ३०

"अग्निः" "उपमादम्" "देवानाम्" उपमादकं यज्ञं "पाति" रक्षति॥

"पात्यग्निर्विपोअग्रम्" — "पातिप्रियेरिपोअग्रम्" — इति पाठौ॥ १३॥ २९

इति श्रीमत्सायणार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोध्याख्याने षष्ठस्याध्यायस्य तृतीयः खण्डः॥ ३॥

---

* तस्यैव पञ्चम मिदम्।

† आ० गा०३ प० ५, १, ५।

अथ द्वितीया।

३ १र २र ३ १र २र
वसन्तइन्नुरन्त्योग्रीष्मइन्नुरन्त्यः।

३ १र २र ३ १ २ ३ १र २र ३ १र २र
वर्षाण्यनुशरदोहमन्तःशिशिरइन्नुरन्त्यः॥ २॥ ३१

३ ४ २ ४ ५ १र २
* वाऽसन्तः। ईऽइन्नूऽरन्तायाः। ग्रीष्मइन्नुरा१

२ २ २ १र २ १ २ २ १र
नौऽयाः। वर्षाण्यनुशाऽ। ऊम्। राऽदाः। हेमन्तः

३ २ २ १ १ १
शिशिरइन्नुराऽरन्तियाउ। वाऽ४५॥ ९†॥ ३१

वामदेव ऋषिः पङ्क्तिर्भ्राजन्त्यग्नइति द्वयोः।
आग्नेयी प्रथमर्तव्या द्वितीया दृश्यते तयोः॥

"समिधान" ऋत्विग्भिः समिध्यमान! दीप्त! हे "अग्ने!" "भ्राजन्ती" प्रकाशमाना "आसनि" आस्ये "अन्तर्" मध्ये स्थिता त्वदीया "जिह्वाः" ‡ हवींषि "चरति" भक्षयति। हे "अग्ने"! "वसुवित्"! धनलम्भक! त्वम् "अस्मभ्यम्" "पयसा" अन्नेन सह "रयिं" रमणीयं धनं "दृशे" दर्शनाय "वर्चः" तेजश्च तेजस्वित्वं वा "अदाः" देहि॥ १॥ ३०

---

* "ऋतुष्ठा"—इति आ० ब्रा० ३, २, २४।

† आ० गा० २५० ५, १, ९।

‡ "जिह्वा"—इति वाङ्नामसु च दृश्यते १,११। अग्नेश्च जिह्वाः सप्त काली-करालीत्येवमादयः प्रसिद्धाः, ता एव पुनः स्वसार इत्युच्यन्ते इत्यर्थः।

"वसन्तः इन्न्" वसन्तएव चैत्र-वैशाखरूपो वसन्तऋतुरेव "रम्यः" रमणीयः भवति। "ग्रीष्मइन्न्" ज्येष्ठाषाढरूपो ग्रीष्मऋतुरेव "रम्यः" रमणीयः। "वर्षाणि" वर्षा श्रावण-भाद्रपदरूपेणावयवीभूतः प्रावृट् ऋतुरेव "रम्यः" रमणीयः। "तान्यनु" "शरदः" आश्विन-कार्त्तिकरूपेणावयवीभूत ऋतुः "रम्यः" रमणीयः। "हेमन्तः" मार्गशीर्ष-पौषरूप एव "रम्यः" रमणीयः। "शिशिरइन्न्" माघ-फाल्गुनरूप एव "रम्यः" रमणीयः * ॥ २ ॥ ३१

---

* अथोपनिषत् सद्याख्यानञ्च यास्क-ज्ञातम्—सप्तयुञ्जन्तिरथमेकचक्रमेकोऽश्वो वहतिसप्तनामा। त्रिनाभिचक्रमजरमनर्वं यत्रेमाविश्वाभुवनाधितस्थुः। सप्त युञ्जन्ति रथ मेकचक्र मेकचारिणम् चक्रत्वकतेर्वा चरतेर्वा क्रामतेर्वैको अश्वो वहति सप्तमासादित्यः सप्तास्मैरश्मयो रसानभिसन्नामयन्ति सप्तेन सृप्तयत्वनीति वेद सप्तीरश्मैतस्मा देवाभिसन्नामात्। संवत्सरप्रधान उत्तरोर्द्धस्त्रिनाभिचक्रं तृतुः संवत्सरो ग्रीष्मो वर्षा हेमन्त इति। संवत्सरःसंवसन्त्यस्मिन् भूतानि। ग्रीष्म ग्रस्यन्ते अस्मिन्सा वर्षा वर्षात्यासु पर्जन्यो हेमन्तो हिमवान्। हिमं पुनर्हन्तेर्वा हिनोतेर्वा न अजर मजरणधर्मेण मनर्वमप्रत्यृत मन्यस्मिन्। यत्रेमानि सर्वाणि भूतान्यभि सन्निष्ठन्ते तं संवत्सरं सर्वमाचाभि स्तौति। पञ्चारे चक्रे परिवर्त्तमान इति पञ्चर्तुतया। पञ्चर्तवः संवत्सरस्येति च ब्राह्मणं हेमन्त-शिशिरयोः समासेन षडर आऽर्पित मिति षड्ऋतुतया। अराः प्रत्यृता नाभौ। षट् पुनः सहतेः। द्वादशारञ्चितजराय। द्वादशप्रधयश्चक्रमेकमितिमासानां मासो मानात्। प्रधिः प्रहितो भवति। तस्मिन् साकन्त्रिशतानशङ्कवोर्पिताःषष्टिर्नचलाचलासः। षष्टिश्च वै वीणि च शतानि संवत्सरस्याहोरात्रा इति च ब्राह्मणं समासेन। सप्तशतानिविंशतिश्चतस्रः। सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्रा इति च ब्राह्मणं विभागेन"—इति निरु० नै० ४, २७।

अथ तृतीया।

३१२ ३ १२ ३ २ ३१२
सहस्रशीर्षा पुरुषःसहस्राक्षःसहस्रपात्।
१२ २२ ३१ २३७ २ ३२
सभूमिꣳसर्वतो*वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ ३ ॥ ३२ †

२१ १ २१ २ २ २ २
ॐ उऊवाचाउ। ३। सहस्रशीर्षापुरु२३षाः। सह-
२१ २२ २ १२ २१२ २ १
स्राक्षःसहस्रा२३पात्। सभूमिꣳसर्वतोवा२३र्त्वा। अत्यति
२१२ २ २१ २ २१ २
ष्ठद्दशाङ्गू२३लाम्। उऊवाचाउ। २। उऊवा३चाउ।
२ १ ११११
वा३। इट् इडा २३४५ ॥ १३ ¶ ॥ ३२

सर्व-प्राणि-समष्टि-रूपी ब्रह्माण्ड-देहो विराड़ाख्यो यः पुरुषः सोऽयं "सहस्रशीर्षाः" सहस्र-शब्दस्योपलक्षणत्वात् ॥ अनन्तैः शिरोभिर्युक्तइत्यर्थः। यानि सर्व-प्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात्तदीयान्येवेति सहस्र-शीर्ष-त्वम्। एवं सहस्राक्षत्वं सहस्रपादत्वं च। स पुरुषो "भूमिं"

---

* "विश्वतो"—इति ऋ०। † ऋ० ८, ४, १७, १।

‡ "दे पुरुषव्रते"—इति आ० ब्रा० ३.१.२५।

¶ आ० गा० ३प० ५, १, १३।

॥ "सहस्रम्"—इति बहुनामसु दशम नैघण्टुकम ३, १।

अथ चतुर्थी।

१ २ ३ २उ ३ १ २ ३ १ २ ३ १ २ ३ १ २
त्रिपादूर्ध्व उदैत्पुरुषःपादोस्येहाभवत्पुनः।

२ ३ २ ३क २र ३ १ ३ २
तथा*विष्वङ्व्यक्रामद्अशना†नशनेअभि॥ ४॥ ३३‡

२ १ र र २ १ र र र १
¶ उङ्कवौहोवा२। ३। त्रिपादूर्ध्वउदैत्पुरु२३षाः।

१र र र र २ १ १ र २ १ २
पादोस्येहाभवत्पू२३नाः। तथाविष्वङ्वियक्रा२३मात्।

२ र र २ २ १ र र २ १
अशनानशनेआर२३भौ। उङ्कवौहोवा२। २। उङ्

र १ ३ ५र र ३ ५ २ १
वौ। हो२। वा२३४। औहोवा। ई२३४डा। उङ्

र र २ १ र १ ३ ५र र
वौहोवा२। २। उङ्कवौ। हो२। वा२३४। औहो

ब्रह्माण्ड-गोलक-रूपां सर्वतः "आ" समन्तात् "हत्वा" परिवेष्ट्य दशाङ्गुल-परिमितं देशम् "अत्यतिष्ठत्" अतिक्रम्य व्यवस्थितः। दशाङ्गुलमित्युपलक्षणम्। ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थितइत्यर्थः॥ ३॥ ३२

---

* "ततो"—इति ऋ०।
† "त्वाशना"—इति च ऋ०।
‡ ऋ० ८, ४, १७, ४।
¶ तच्च द्वितीयम्।

अथ पञ्चमी।

१२ १२ड ३१३१उ ३१ २
पुरुषएवेद९*सवयङ्भूतंय्यच्चभाव्यम् †।

२ ५ २१२७२ २१२
वा। ह्व२३४वाः। उऊवौहोवा२। २। उऊवौ।

१ २ ५२ २ ३१११
हो२। वा२३४। औहोवा। ऊ२३४५॥ १४‡॥ ३३

योऽयं "त्रिपात् पुरुषः" संसार-स्वर्ग-रहितः बहुल-स्वरूपः सोऽयम् "ऊर्ध्व उदैत्" अस्मादज्ञान-कार्य्यात्संसाराद्बहिर्भूतः सन् तत्त्वैर्गुणदोषै रस्पृष्टः उत्कर्षेण स्थितवान्। "अस्य" योयं "पादः" लेशः सोऽयमिह मायायां प्रादुरभवत्। सृष्टि-संहाराभ्यां पुनः पुनरागच्छदिति [अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तम्—"विष्टभ्याह मिदं कृत्स्न मेकांशेन स्थितो जगदिति"] तथा मायाया मागत्यानन्तरं "विष्वङ्" देव-तिर्य्यगादि-रूपेण विविधः सन् "व्यक्रामत्" व्याप्तवान्। किं कृत्वा? "अशनानशने" अभिलक्ष्य अशनं भोजनादि-व्यवहारोपेतं चेतनं प्राणि-जातम्, अनशनं तद्रहित मचेतनं गिरि-नद्यादिकम्। तदुभयथा यथा स्यात्तथा। यमेव विविधो भूत्वा व्याप्तवानित्यर्थः॥ ४॥ ३३

---

* "पुरुषएवेदं"—इति
† "भव्यम्"—इति। } ऋग्वेदीय-पाठौ।

‡ ऋ० सं० १प० ५, १, १४।

१२ १ १२३ १ २ ३१ २३ १२ ३ २
पादोस्यसर्वाभूतानित्रिपादस्यामृतन्दिवि * ॥ ५ ॥ ३४ †

र र १ र र २
ॐ इयौ३ह्वा२। ३। पुरुषऐवेदꣳसा२३र्वाम्।
१र २१र २ र र र र २ २
यद्भूतंयच्चभावा२३याम्। पादोस्यसर्वाभुता२३नी। त्रि
१र र २ १ २ १ र र १र र
पादस्यामृतन्दा२३द्यौ। इयौ३ह्वा२। २। इयौ३ह्वो२
३ ५र र ३ ५ १ र र
वा२३४। औ३ह्वा। ई२३४डा। इयौ३ह्वा२। २।
१ र १ १ ५ र र ३ ५ १ र
इयौ३ह्वो२। वा२३४। औ३ह्वा। ज्यो२३४तीः। इयौ
र १ र १ ३ ५ र र
३ह्वा२। २। इयौ। ३ह्वो२। वा२३४औ३ह्वा।
३ १ १ १ १
ई२३४५ ॥ १५ ¶ ॥ ३४

यत् "इदं" वर्त्तमानं जगत् तत् "सर्वं" "पुरुषएव"। "यद्भूतम्" उत्पन्नं जगत् "यच्च भाव्यं" भविष्यज्जगत् तदपि पुरुषएव यथास्मिन् काले वर्त्तमानाः प्राणिनः सर्वेऽपि चराचरात्मकपुरुष-

---

* "उतामृतत्व"—इत्यादिच्च ऋग्वेदीयः।

† ऋ० ८, ४, १७, ४।

‡ "त्रीणि लोकानां व्रतानि, दिवः"—इति आ० ब्रा० ३, २, २५।

¶ आ० गा० १५०५,१,१५।

अथ षष्ठी।

१ २ ३ २उ ३ १ २ ३ १ २
तावानस्य*महिमाततो† ज्यायाꣳश्चपूरुषः।
२१ २ ३ १ २र ३ १र २र ३ १ २
उताऽमृतत्वस्येशानोयदन्नेनातिरोहति‡॥ ६॥ ३५¶

२र १र र २ १ २ २र
§ ह्याउ। ३। तावातस्य। मह्या२३इमाइ। ह्याउ

स्यावयवाः तथैव गतागामिनो रपि कल्पयोर्द्रष्टव्य मित्यभिप्रायः। एतदेवोभयं स्पष्टीक्रियते—"अस्य" पुरुषस्य "सर्वाणि भूतानि" काल-त्रय-वर्तीनि प्राणि-जातानि "पादः" चतुर्थोंऽशः। "अस्य" पुरुषस्यावशिष्टं "त्रिपात्" स्वरूपम् "अमृतं" "विनाश-रहितं" सत् "दिवि" द्योतनात्मके स्व-प्रकाश-स्वरूपे व्यवतिष्ठत इति शेषः। [यद्यपि "सत्यं ज्ञान मनन्तं ब्रह्म"-इत्यनन्तस्य परब्रह्मणोऽवीयदन्तत्वाभावात् पादचतुष्टयं निरूपयितु मशक्यं, तथापि जगदिदं ब्रह्म-स्वरूपापेक्षया अल्पमिति विवक्षितत्वात् पादत्वोपचारः॥ ५॥ ३४

---

* "एतावानस्य"—इति,
† "यतो"—इति,
‡ "पादोस्येहा"—इत्यादिषु
} ऋ०।

¶ ऋ० ७, ४, १७, ३।

§ "अस्तारिचस्य"—इति आ० ब्रा० ६,२,२५। व्रतमिति शेषः।

अथ सप्तमी।

१२ २ १ २ ३ २ ३ २ ३ १ २
ततो*विराड † जायतविराजोअधिपूरुषः।

२ ३ १र २र ३ २४ ३ १ २ ३ २
सजातोअत्यरिच्यतपश्चाद्भूमिमथोपुरः॥ ७॥ ३६ ‡

१ २ र र २ १र २ २र २ १र
३। ततोज्यायाꣳश्चपूरू२३षाꣳः। ह्राउ। ३। उता-

र २ २र १ र र २ १र
मृतत्वस्येशा२३नाꣳः। ह्राउ। ३। यदन्नेनातिरोहा

२ २ २ १ १ १ १
२३तीꣳ३। ह्राउ३। वाꣳ३। इट् इड़ा२३४५॥ १६ ¶॥३५

अतीतानागतवर्तमान-रूप-जगदाद्याधारो योऽस्ति "तावान्" सर्वोऽपि "अस्य" पुरुषस्य "महिमा" स्वकीय-सामर्थ्य-विशेषः। न तु तस्य वास्तवं स्वरूपम्। वास्तवस्तु "पुरुषः" "ततः" महिम्नोऽपि "ज्यायान्" अतिशयेनाधिकइत्यर्थः। "उत" अपिच "अमृतत्वस्य" देवत्वस्य "अयम् ईशानः" स्व-मायया "यत्" यस्मात् कारणात् "अन्नेन" प्राणिनां भौम्येन अन्नेन निमित्त-भूतेन "अतिरोहति" स्वकीयां कारणावस्था मतिक्रम्य परिदृश्यमान-जगदवस्थां प्राप्नोति। तस्मात् प्राणिनां कर्म-फल-भोगाय जगदवस्थास्वीकारात् नेदन्तस्य वस्तु-तत्व मित्यर्थः॥ ६॥ ३५

---

* "तस्माद्"—इति, † "विराल्"इति च, } ऋ०।

‡ ऋ० ८,४,१७,५। ¶ आ० गा० २प० ५,१,१६।

२ऽ १ २ २ १२ २२ २ऽ २ १२
* ह्राउ३वा। ततोविराडजायत। ह्राउ३वा। विरा
२२ २ २ १२ २ २ ऽ १ २२ १२ २
जोअधिपूरुषः। ह्राउ३वा। सजातोअत्यरिच्यत।
ऽ २ १२ २ २ १ २ १ २ १ २ ऽ २.
ह्राउ३वा। पश्चाद्भूमिमथोपुरः। ह्राउ३वा३। ई२३
११
४५॥ १७ †॥ ३६

"विष्वङ् व्यक्रामत्"—इति यदुक्तं तदेवात्र प्रपञ्च्यते—"ततः" तस्मादादि-पुरुषात् "विराट्" ब्रह्माण्ड-देहः "अजायत" उत्पन्नः। [विविधानि राजन्ते वस्तून्यत्रेति विराट् ‡] "विराजो अधि" विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा "पुरुषः" तद्देहाभिमानी कश्चित् पुमानजायत। योऽयं सर्व-वेदान्त-वेद्यः परमात्मा सएव रूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत् [एतच्चाथर्वणिकउत्तरतापनीये विस्पष्टमामनन्ति—"स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्य मूढो मूढइव व्यवहरन्नास्ते माययैवेति]। "स जातः" विराट् पुरुषः "अत्यरिच्यत" अतिरिक्तोऽभूत्। विराड्व्यतिरिक्तो देव-तिर्यङ्मनुष्यादिरूपोऽभवत्। पश्चाद्देवादि-जीव-भावाद्ध्वं भूमिं ससर्जेति शेषः। "अथो" भूमि-सृष्टेरनन्तरं तेषां जीवानां "पुरः" ससर्ज [पूर्यन्ते सप्तभि र्धातुभि रिति पुरः] शरीराणि ॥ ७॥ ३६

---

* "पृथिव्याः"—इति तै० ब्रा० २,२,२५। ससमिति शेषः।

† ऋ० मां० ३५० ५, १, १७।

‡ "विराट् विरमणाद्विराजनाद्वाविराधनाद्वा"—इति दै० ब्रा० २, १२।

मन्येवामिति पञ्चर्चो वामदेवेन वीक्षिताः।
अत्राद्यैकान्तिमे च द्वे त्रिष्टुभस्तासु चादिमा॥
उपरिष्टाज्ज्योतिरिति बृहत्यैव विधीयते।
अन्त्ये अनुष्टुभौ द्यावा-पृथिव्योः प्रथमा तथा॥
द्वितीयेन्द्रो चतुर्थी च तृतीयाग्नेर्निजात्मनः।
स्तुतिर्गवा मन्तिमेति छन्दोदैवत-निर्णयः॥

अथ अष्टमी।

१ २ ३ १ २ ३
मन्येवान्द्यावापृथिवीसुभोजसौ
१२ २२ ३ १ २ ३ १२ २२
येअप्रथेथाममितमभियोजनम्।
१ २ ३ १ २ ३ १२ २२ २ १ १
द्यावापृथिवीभवतꣳस्योनेनोमुञ्चतमꣳहसः॥ ८ ॥३७*

१ २ २ १ २ २ २ २ २
†ऊवाइ। ३। रूपम्। मन्येवान्द्यावापृथिवीसू३
१ २ २ २ २ १ २
भोजा१सा२उ। येअप्रथेथाममितमभी३योजा१ना२म्।

---

* ऋ० आ० ५, १९, २०, २१।

† "द्यावापृथिव्योः"—इति आ० ब्रा० ३, २, २५।

२र र र १ २ २र र १
द्यावापृथिवीभवाऽताऽस्रो१ना २इ। तेनोमुञ्चताऽमाऽ
२ १ २र ३ ५र र
ह्वा१सा २:। ऊवाइ। ३। रूपा२। वा२३४औह्वोवा।
२र र १
ए। रूपम्। ३॥ १८ *॥

२ १र २ १ २र र र र
† प्रतिष्ठासिप्रति। ष्ठा।३। वर्चोसिमनोसि। ऐह्वी।
२ र र र र र र र र र २र र र
मन्येवान्द्यावापृथिवीसुभोजसावैह्वी। येऽअभ्रथेथाममितम
र र र र २र र र र र र र
भियोजनामैह्वी। द्यावापृथिवीभवतऽस्रोना । ऐह्वी।
२र र र र २ १र २ १ २
तेनोमुञ्चतमऽहसाऐह्वी। प्रतिष्ठासिप्रति। ष्ठा। ३। व
र र र २ २र २र १
र्चोसिमनोसि । ऐह्वी३। ह्वाउवा। ए। भूतम्। ३।
॥ २१ ‡॥ ३७

हे "द्यावापृथिवी" द्यावापृथिव्यौ! "वां" युवां "सुभोजसौ" शोभन-पालयित्र्याविति "मन्ये" अहं जानामि हे द्यावापृथिव्यौ! "अमितम्" अपरिमितं "योजनं" [युज्यते पुरुषोऽनेनेति योजनम्] धनादि, तत् "अभ्यप्रथेथाम्" अभिविस्तारयतम्। हे

---

* आ० गा० ३प० ५, १, १९।

† "विपरीते"—इति आ० ब्रा० ३, ९, २५। तच द्विर्नीयम्।

‡ आ० गा० ३प० ५. १, २१।

अथ नवमी।

१२ ३१२ ३ १२३२३१२
हरीतइन्द्रश्मश्रूण्युतोतेहरितौहरी।
१२ ३१२ ६१२ ३१२
तन्त्वास्तुवन्तिकवयःपुरुषासोवनर्गवः ॥ ८ ॥ ३८

२२ १२ २१२२ १ २ २ २१२
* हरीतइन्द्रश्मश्रूणी। उतोतेहरिता१उहाइरी। तान्त्वा
२ ४ ५ २ १२२ २ ४ ५
स्तुवन्तिक्राइ। वायाः। पुरुषासोवनाइ। गावाः।
१२२ १ २ १ २ १ २१ २
कृष्णासइन्द्रभुङ्क्तिमघवन्निन्द्रभुङ्क्तिभुङ्क्तिप्रभुङ्क्तितो
२२३ १११ १
न्द्रस्तसरपूताइ३४५ः ॥ २२ † ॥ ३८

"द्यावापृथिवी" द्यावापृथिव्यौ! युवां अस्माकं "सोने" सुख रूपे‡ स्व-सुख कार्ये "भवतम्" "ते" द्यावापृथिव्यौ "वः" अस्मान् "अंहसः" पापात् "मुञ्चतम्" मोचयतम् ॥ ८ ॥ ३७

हे "इन्द्र!" "ते" तव "श्मश्रूणि" "हरी" सोम-पानेन हरितवर्णानि [तथाच श्रूयते—"इन्द्रः श्मश्रूणि हरिताभि पुष्णुते"-इति। "शेश्छन्दसि बहुलम् (६,१,८०)"—इति हरि-

* "कृष्णस्य साम व्रतं वा"—इति आ० ब्रा०३, २, २५।

† आ० गा० ३प० ५, १, २२।

‡ "सोनम्"—इति सुखनामसु पञ्चदशं नैघण्टुकम् ३,६।

अथ दशमी।

२उ ३ १ २ १ २ १ ३ १ २ ३ २
यद्व र्चोहिरण्यस्यय द्वावर्चोगवामुत।
३१ ३ १ २ ३ २ ३१ २१ १ २
सत्यस्यब्रह्मणोवर्चस्तेनमासꣳसृजामसि॥ १०॥ ३८

२२ २१ २१ २२१२ १
* ह्वाउ। ३। ह्वमन्नम्। ३। अह्वमन्नादो। ह्वम
२२१२ २२ १२ २२ १ २२
न्नादो। २। ह्वंविधारयो। २। ह्वंविधारयः। ह्वाउ।
१ २२ १ २ १ १ २ १ २२ १ २ १ २
३। यद्व्वर्चोहिरण्य। स्या। यद्वावर्चोगवामू। ता। स
१ २ २२ १ १ १२ २२ १ २२ १ २२
त्यस्यब्रह्मणोव। चाः। तेनमासꣳसृजाम। साइ। ह्वाउ

शब्दात्परस्य शेर्लुक्]। "उतो" अपिच। "ते" "हरी" अश्वौ † "हरितो" हरिद्वर्णौ। "कवयः" मेधाविनः "पुरुषासः" ‡ पुरुषाः "वनर्गवः" [वननीयाः सम्भजनीयाः सेवनीयाः गावो येषां ते वनर्गवः मध्यरेफश्छान्दसः ¶। गोस्त्रितो (१,२, ४८) रितिऋस्वत्वम्] तादृशाः "कवयः" "तं" "त्वा" त्वां स्तुवन्ति॥ ॥ ९॥ ३८

---

* "दिशां व्रतं दशानुगानम्"—इति आ० ब्रा० ३, २, २६।

† "हरी इन्द्रस्य"—इति निघ० १,१५,१।

‡ "आज्जसेरसुक्"—इति पा० ७, १,५७।

¶ "वर्णागमोवर्णविपर्ययश्च"—इति पा० २, ४, ९८ वा०।

२ १ २ १ २ १ १ २ १ २
३। अहमन्नम्। ३। अहमन्नादो। हमन्नादो। २।

१ २ १ २ १ २ १ २ २
हंविधारयो। २। हंविधारयः। हाउ३। वा। ए।

२ १ २ १ २ १ २ १ २ १ १ २ १
अहमन्नमहमन्नादोहंविधारयः। ३। ए। अहꣳसुव

२ ३ १ १ १ १
र्ज्योतीर२३४५ः॥ १ *॥

२ २ १ २ १ २ १
हाउ। ३। अहꣳसहो। हꣳसहो। २। हꣳ

२ १ २ १ २ १ २ १ २ १ २
सासहिः। अहꣳसासहिः। २। अहꣳसासहानो।

१ २ २ १ २ १ २ १ २ २ १ २ १
हꣳसासहानोहꣳसासहानः। हाउ। ३। यद्वर्षीहिर

२ १ १ २ १ २ १ २ १ १ १ २ १ २ १ १
ण्य। स्या। यद्वावर्षीगवामू। ता। सत्यसत्रह्मणोव। चाः।

१ २ २ १ २ १ २ १ २ १
तेनमासꣳहजाम। साइ। हाउ। ३। अहꣳसहो।

१ २ १ २ १ २ १ २ १
हꣳसहा। २। हꣳसासहिः। अहꣳसासहिः। २।

२ १ २ २ १ २ १ २ २ १ २ १
अहꣳसासहानो। हꣳसासहानो। हꣳसासहानः।

---

* आ० गा० २प० ५, २, १।

१ २ २ २ १ २ १ २ १ २ १ २ १ २
ह्वाउ। ३। वा। ए। अहꣳमहोहꣳसासद्विरहꣳसासहा

१ २ २ १ २ १ १ १ १
नः। ३। ए। अहꣳसुवर्ज्योतीर२३४५ः॥ २ *॥

२ २ १ २ १ २ १ २
ह्वाउ। ३। अहंवर्चा। हंवर्चा। हंवर्चः। ह्वाउ।

१ २ १ २ १ १ २ १ २ १ २ १ २ १ २ १
३। यद्वर्चोद्विरण्य। स्या। यद्वावर्चोगवामू। ता। सत्य

२ १ २ १ १ १ २ १ २ १ २ १ २
स्यब्रह्मणोव। चाः। तेनमासꣳहजाम। साइ। ह्वाउ।

१ २ १ २ १ २ २ २
३। अहवर्चो। हंवर्चो। हंवर्च.। ह्वाउ। ३। वा। ए।

२ १ २ १ २ १ १ १ १
अहंवर्चः। ३। ए। अहꣳसुवर्ज्योतीर२३४५ः॥ ३ †॥

२ २ १ २ २ १ २ २ १ २
ह्वाउ। ३। अहन्तेजो। हन्तेजो। हन्तेजः।

२ १ २ १ २ १ १ २ १ २ १ २ २
ह्वाउ। ३। यद्वर्चोद्विरण्य। स्या। यद्वावर्चोगवामू।

१ २ १ २ १ २ १ १ २ २ १ २ १
ता। सत्यस्यब्रह्मणोव। चाः। तेनमासꣳहजाम। साइ।

२ २ १ २ २ १ २ २ १ २ २
ह्वाउ। ३। अहन्तेजो। हन्तेजो। हन्तेजः। ह्वाउ।

२ १ २ २ १ २ १ १ १ १
ए। अहन्तेजः। ३। ए। अहꣳसुवर्ज्योतीर२३४५ः॥ ४ ‡॥

---

*, †, ‡ चा० गा० ३५० ४, २, २-३-४।

२र १ २र १ २र १ २र
हाउ। ३। दिश्रन्दुहे। दिश्रन्दुहे। २। दिशौ

२र १ र२र १ र२र २र १ २र १
दुहे। ३। दिश्रोदुहे। ३। सर्वादुहे। ३। हाउ। यद्वर्चोहिर

२ १ १२र१२र१ र२ १ २ १ २ १ २र१ १
ण्य। स्था। यद्वावर्चोगवामू। ता। सत्यस्यब्रह्मणोव। चाः।

१र २र१ २र १ २र १ २ र
तेनमासण्हजाम। साइ। हाउ। ३। दिश्रन्दुहे।

१ र२र १ र२र १र२ र
३। दिश्रोदुहे। ३। दिश्रोदुहे। सर्वादुहो। ३।

२र २ २र १ २ र१ र२ र १ र२ र१ २२ र
हाउ। वा। ए। दिश्रन्दुहेदिश्रोदुहेदिश्रोदुहेसर्वादुहे।

२र २ १ र ३ १ १ १ १
३। ए। अहण्सुवर्ज्योती२३४५:॥ ५ *॥

२र १र २ १ २
हाउ। ३। मनोजयित्। ३। हृदयमजयित्। ३।

१ र २ २ १ २र २र १ २र १
इन्द्रोजयित्। ३। अहमजैषम्। ३। हाउ। यद्वर्चोहिर

२ १ १ २र१२र१ र२ १ २ १ २ १ २र १
ण्य। स्था। यद्वावर्चोगवामू। ता। सत्यस्यब्रह्मणोव।

१ १र २र१ २र १ १र २ र
चाः। तेनमासण्हजाम। साइ। हाउ। मनोजयित्।

१ २ १ र २ २ १ २र
३। हृदयमजित्। ३। इन्द्रोजयित्। ३। अहमजैषम्।

---

* आ० गा० १प० ५, २, ५।

२ २ २ १ २ १ २ १ २ १ १
३। ह्वाउ३वा। ए। मनोजयिड्डृदयमजयिदिन्द्रोजयिदह
२२ २२ २ १ २ ३ १ १ १ १
मजैषम्। ३। ए। अह्ए्सुवर्ज्योती२३४५: ॥ ६ ॥

२२ १ १ २ २२
ह्वाउ। ३। वयः। ३। वयोवयः। ३। ह्वाउ। ३।
१ २२ १ २ १ १ २२ १ २२ १ २ २ १ २ १ २
यद्वर्चोहिरण्य। स्या। यद्वावर्चोगवाम्। ता। सत्यस्य
१ २२ १ १ १२ २२ १ २२ १ २२
ब्रह्मणोव। चाः। तेनमास्ह्जाम। साइ। ह्वाउ।
१ १ २ २ २ २२ १ २
३। वयः। ३। वयोवयः। ३। ह्वाउ३। वा। ए। वयो
२ २ २ २२ २ १ २ ३ १ १ १ १
वयोवयः। ३। ए। अह्ए्सुवर्ज्योती२३४५: ॥ ७ ॥

२२ २२ १ २२ १ २ २२
ह्वाउ। ३। रूपम्। ३। रूप्ए्रूपम्। ३। ह्वाउ
१ २२ १ २ १ १ २२ १ २२ १ २ २ १ २
३। यद्वर्चोहिरण्य। स्या। यद्वावर्चोगवामूता। स
१ २ १ २२ १ १ १२ २२ १ २२ १
त्यस्यब्रह्मणोव। चाः। तेनमास्ह्जाम। साइ।
२२ २२ १ २२ १ २ २ २ २ २२
ह्वाउ। ३। रूपम्। रूप्ए्रूपम्। ३। रूपम्। ३। ए।
२ १ २ ३ १ १ १ १
अह्ए्सुवर्ज्योती२३४५: ॥ ८ * ॥

---

* ऋ० गा० १५० ५, २, ६-७-८।

१ २ १ २ १ २
हिंहियऊ२। ३। उद्पप्तम्। उद्पप्तम्। २।
२र १र २ २ १ २र १ २
ऊर्ङ्नभाऽस्यक्रषि। ३। व्यद्यौत्सम्। ३। अततनम्।
२र २र २र १ १र १ २ १
३। ह्वाउ। ह्वाउ। ह्वाउ। यद्वर्चोहिरण्य। स्या।
१ २र १२र १ र २ १ २ १ १ १र १ १ १र
यद्वावर्चोगवामू। ता। सत्यस्यब्रह्मणो व। चाः। तेन
२र १ १र १ • १ २ १ २
मासऽस्रजाम। साइ। हिंहियऊ२। ३। उद्पप्तम्।
२र तर र २ १ २र १ २
३। ऊर्ङ्नभाऽस्यक्रषि। ३। व्यद्यौत्सम्। ३। अतत
२ऽ २ २र १ २ र१र र २ १
नम्। ३। ह्वाउ३वा। ए। उद्पप्तमूर्ङ्नभाऽस्यक्रषिव्य
२र १ २ २ १ ३ १ १ १ १
द्यौत्समतनम्। ए३। पिन्वस्वा२३४५॥ ९ *॥
२र १र १ २र २र
ह्वाउ। ३। प्रथे। ३। प्रत्यष्ठाम्। ३। ह्वाउ। ३।
१ २र १ २ १ १ र १२र१ र २ २ १
यद्वर्चोहिरण्य। स्या। यद्वावर्चोगवामूता। सत्य
२ १ २र १ १ १र २र १ २र १ १
स्यब्रह्मणोव। चाः। तेनमासऽस्रजाम। साइ। ह्वाउ।

---

* आ० गा० ३५० ५, २, ९।

अथ एकादशी।

२ ३ १२ ३ २ ३२
सहस्तन्नइन्द्रदध्योज

३क २ ३ १ २
ईशेह्यस्यमहतोविरप्शिन्।

१२ १ २२ २१ ३ २ १२ १२
३। प्रथे। ३। प्रत्यष्ठाम्। ३। हाउ३। वा। ए। प्रथेप्रत्य

२२ २२ २१ २ १ १११
ष्ठाम्। ए। अहꣳसुवर्ज्योतीर३४५ः॥ १० *॥ ३९

वामदेव ऋषिः। अनुष्टुप् छन्दः। आग्नासने विनियोज्या।

"हिरण्यस्य" हित-रमणीयस्य एतन्नामकस्य "यद्वर्चः" तेजोऽस्ति। "यद्वा" अपिच। "गवाम्" एतन्नामकानां † "यद्वर्चः" तेजोऽस्ति। "उत" अपिच। "सत्यस्य" सर्वैः सम्मतस्य ‡ "ब्रह्मणः" यद्वर्चोऽस्ति तेन तैः "मह" "संसृजामसि"¶ सम्मादयामः। गन्तवन्तः पशुमन्तः श्रोत्रिया भवेमेति तात्पर्यार्थः॥ १०॥ ३९

---

* आ० गा० ३प० ५, २, १०।

† "हिरण्यं कस्माद्ध्रियत आयम्यमानमिति वा ह्रियते जनाज्जनमिति वा हित-रमणं भवतीति वा हृदयरमणं भवतीति वा हर्यतेर्वा स्यात् प्रेप्साकर्मणः"—इति निरु० नै०२,१०।

‡ गौरिति निघण्टौ वक्तव्यः (१,१,१—२,४,४—१,५,३—१,११,४—१,१५,७—२,११,१०।

¶ "सत्यं कस्मात् सरतु तायते सतप्रभवं भवतीति वा"—इति निरु० नै०३,१२।

॥ "हृदन्तोसि"—इति पा०७,१,४६।

२ ३ १ ३ १ २ २ ३ १ २
क्रतुन्न नृम्ण꣡꣯स्थविरꣳ꣡꣯ ह्वाजं
३ २ ३ १ २ ३ १ ३
वृत्रे꣡꣯षु शत्रू꣡꣯न्त्स꣡꣯ हना꣡꣯ कृधी नः ॥ ११ ॥ ४०

२ १ २ १ २ १
* हाउ। ३। आ꣡꣯ इ꣡꣯ही। ३। ओ꣡꣯हा। २। ओ
२ २ १ १ १ २
हाइ। हाउ। ३। सहस्तन्नइन्द्रदध्यो꣡꣯ २जाः। आया
१ २ १ १ २ २
२उ। ऊ। आयाउ। ३। ई꣡꣯शे ह्यस्यमहतोविरा꣡꣯ २
१ १ १ २ १ १
प्शायिन्†। आया꣡꣯ २उ। ऊ। आयाउ। ३। क्रतुन्न
१ १ १ २ १
नृम्ण꣡꣯स्थविरꣳ꣡꣯ ह्वा꣡꣯ २जाम्। आया꣡꣯ २उ। ऊ। आया
२ १ २ २ १ १ २
उ। ३। वृ꣡त्रे꣡꣯षु शत्रू꣡꣯त्सु꣡꣯ हना꣡꣯ कृधा꣡꣯ २इनाः। आया꣡꣯ २
१ २ १ २ २ १
उ। ऊ। आयाउ। ३। हाउ। ३। आ꣡꣯ इ꣡꣯ही।
१ २ १ २ १ २ १ २
३। ओ꣡꣯हा। ओ꣡꣯हा। ओ꣡꣯हाइ। हाउइ। वा। ए
२ १ २ १ २ २ १ १ १ १
आयꣳ꣡꣯ शिअस्मभ्यं꣡꣯ वर्चो꣡꣯धा दे꣡꣯वे꣡꣯भ्या २३४५ः ॥ १७ ‡ ॥ ४०

---

* "कक्षपवतं दशानृगानम् * * * गवांव्रते"—इति आ० ब्रा० १, २, २७ तत्र प्रथम मिदम्।

† "पशादन्"—इति क० पु० पाठः।

‡ आ० गा० ३प० ५, २, १७।

अथ द्वादशी।

३१२ ३१२ ३२३
सद्दर्षभाःससद्दवत्साउदेत
१२ ३२ ३१२
विश्वारूपाणिविभ्रतीर्दूग्भीः।
३२ ३२३१२ ३ २
उरुःपृथ्रयंवोअस्तुलोक
३१२ २२ ३२३१ २
इमाआपस्सुप्रपाणाइहस्त ॥ १२ ॥ ४१

॥ चतुर्थ-दशति ॥

२ २१ २२ १२२ १२ २
* ह्वाउश्वा। सद्दर्षभाःसद्दवत्स। उदेत। ह्वाउश्

हे "विरप्शिन्" विशेषेण रपणं व्यक्त-वचनं तदस्यास्तीति विरप्शी, तस्य सम्बोधनं हे विरप्शिन्! विशेषेण स्तोत्र-विषये सत्यवाक्य? "इन्द्र!" "ते" तव "सहः" शत्रूणा मभिभवन-रूपम् "ओजः" बलं "नः" अस्मभ्यं "दधि" देहि [ददाते-श्छान्दसं रूपं लोड़ि हेर्धिभावादिना] यस्मात् त्वं तस्य "अस्य" "महतः" बलस्य "इशे" ईश्वरो भवसि। अतो हे इन्द्र! "नः" अस्माकं "क्रतुं न" यज्ञमिव "नृम्णं" धनं "क्षविरम्" अतिशयेन प्रवृद्धं, "वाजं" बलं च "कृधि" कुरु। किञ्च नोऽस्माकं "शत्रून्" "हृत्नेषु" आवरकेषु उपायेषु "कृधि" कुरु ॥ ११ ॥ ४०

* "निक्रवाभिनिक्रवौ द्वा वनडुद्वते वा"—इति ऐ० ब्रा० ६, २, २७। त च प्रथम मिदम्।

१ २ २१२ २ १ २२ २ २ २१ २ १
वा। विश्वारूपाणिबिभ्रतोद्यभ्नीः। ह्वाउ३वा। उरुः-
२ १ २ १ २ २ २ १ २१ २ २
पृथुरयम्बोअस्तुलोकः। ह्वाउ३वा। इमा। आपःसुप्र-
२ १२ २ १ २१ २१ १ २ १
पाणाइहस्त। ह्वाउ३वा। अश्वमिष्टयेऽहस्मा ॥१९*॥ ४१

हे "सहर्षभाः" ऋषभैः सहिताः! "सहवत्साः" वत्सैः सहिताः! गावः! "द्यभ्नीः" सायं प्रातः काले द्विविधान्यूधांसि यासां ता द्यभ्नीः द्यभ्नयः! "विश्वा" सर्वाणि नाना "रूपाणि" "बिभ्रती" बिभ्रत्यः यूयम् "उदेत" उद्गच्छत समृद्धाः आगच्छत। किञ्च। "उरुः" बहुः "पृथुः" विस्तीर्णः [उरुः पृथु रिति शब्दाभ्याम् आयाम-विस्तारौ उच्येते। "अयं लोकः" "वः" युष्माकम् "अस्तु" भवतु। "इमा आपः" "इह" लोके भूतले अस्मिंस्थाने "सुप्रपाणाः" सुखेन प्रकर्षेण पातुं योग्याः सन्तु तत्र बह्वीभूताः "स्त" भवत उपविशतेति पूर्वेण सम्बन्धः १२॥ ४१

इति श्रीमत्सायणाचार्य्य-विरचिते सामवेदार्थ-प्रकाशे छन्दो-व्याख्याने षष्ठस्याध्यायस्य चतुर्थः खण्डः॥ ४॥

---

* आ० गा० ३५० ५, २, १९।

अथ पञ्चम-खण्डः—

सैषा प्रथमा।

१ २ १ २ ३ २ २ ३ १ २
अग्नआयूंषिपवसआसुवोर्जमिषञ्चनः।
३ १ २ ३ १ २
आरेबाधस्वदुच्छुनाम् ॥ १ ॥ ४२ *

२र १ २र १ १ १ १र र
† भ्राजा। २। भ्राजा३उ। वा२। अग्नआयूंष्
२ र १र २ १र २ १ २ २र १र र २ १ र
षिपवसे। आसुवोर्जमिषञ्चनः। आरेबाधस्वदुच्छुनाम्।
२र १ २र १ २र १र
भ्राजा। २। भ्राजा३उ। वा२। ए। भ्राज।
३ ॥ ५ ‡ ॥ ४२

चतुर्दशाग्नआयूंषीत्याद्यास्तच्च जगत्यसौ।
विभ्राट् त्रिष्टुप् त्रिचमिति गायत्रो द्वादशेतराः॥
आद्याग्नेः पवमानस्य स्तुतिः सौर्यस्त्रयोदश।
ऋषीणां विप्रकीर्णत्वात्तत्र तत्राभिदृश्यते॥
श्रुतं वैखानसा एवं दृष्टवन्तो महर्षयः।

---

* ऋ० ७, २, १० ३=उ० ६, ३, १०, १।

† "सूर्यस्य भ्राजाभ्राजे द्वे"—इति आ० ब्रा० ३, २, २८। तत्र प्रथममिदम्।

‡ आ० गा० ३प० ६, १, ५।

अथ द्वितीया।

३ २ ३ १ २ ३ २उ
विभ्राड्बृहत्पिबतुसोम्यम्मध्वा
३१ २३१२३१ २
यूहधद्यज्ञपतावविहुतम्।
१ २ ३१ २३ १२३ १ २
वातजूतोयोअभिरक्षतित्मना
३१ २ ३ १र २र
प्रजाःपिपर्त्तिबहुधाविराजति॥ २॥ ४३ *

१ २ १ र १ २ २
† हाहाउ। ३। इडा। ३। हस्। कृतम्मे।
२१र र १ १र
३। विभ्राड्बृहत्पिबतुसोमिया२म्माधू२। आयुर्दधद्य
र १ १र र र र
ज्ञपतावावा२इहूना२म्। वातजूतोयोअभिरक्षता२इ
१ २१र र १ १ २उ
त्मानाा२। प्रजाःपिपर्त्तिबहुधाविरा२जातीा२। हाहाउ।

हे "अग्ने" पवमान-रूप! अस्माक मायूंषि अन्नान्येतन्नामकानि वा "पवसे" क्षरसि "नः" अस्माकम् "ऊर्जम्" अन्नरसम् "इषम्" अन्नं च "आसुव" आभिमुख्येन प्रेरय। किञ्च। "दुच्छूनां" [रक्षोनामैतद्] रक्षांसि "आरे" अस्मत्तो दूरएव ‡ "बाधस्व" सम्मीडय॥ १॥ ४३

* उ० ६,३,५,१=ऋ० ८,८,२८,२।

† "वायोर्विकर्णभासे द्वे स्तोर्वा"—इति आ० ब्रा० ३,३,२८। तत्र विकर्ण नाम प्रथममिदम्।

‡ "आरे"—इति दूरनामसु पञ्चमं नैघण्टुकम् ३, २६।

२ १ २ १ २ १ २ १ २
३। ईडा। ३। हस्। ३। ऋतम्मे। ३। औहो
३ २ २ १ २ १ २ १ २ ३
वाहाउ। वा। फा२ट्। ऋतम्मे। ३। औहोवा
२ २ १ २ १ २ १ २ ३
हाउ। वा। फा२ट्। ऋतम्मे। ३। औहोवा
२ २ १
हाउ। वा। भा२ट्॥ ७ * ॥ ४३

विभ्राण्नामक एतान्तु-सूर्य-पुत्रो ददर्श सः।

"विभ्राट्" विभ्राजमानः विशेषेण दीप्यमानः† सूर्यः "बृहत्" परिवृढं "सोम्यं" सोममयंꣳ "मधु" पिबतु। किं कुर्वन्? "यज्ञपतौ" यजमाने "अविच्छ्रुतम्" अकुटिलम्‡ अकण्टकम् "आयुर्दधत्" अन्नं वा कुर्वन्§। "यः" सूर्यो "वातजूतः" वातेन वायुना प्रेर्यमाणः सन्‖ "त्मना"+ आत्मना स्वयमेव "अभि रक्षति" सर्वं जगदभिसृजन् पालयति [राशि-चक्रस्य वायु-प्रेर्यत्वात् सूर्यस्यापि तत्प्रेर्यत्वम्] स सूर्यः "प्रजाः" "पिपर्ति" वृष्ट्यादि-प्रदानेन

---

* आ० गा० ३प० ६, १, ७।

† विभ्राजिति जुलतिकर्मणो "भ्राजते"—इत्यस्य रूपम् (नै० १,१६,१)।

‡ "सोम अर्हति यः"—इति पा० ४, ४, १३७।

¶ "भ्रूकौटिल्ये (भ्वा० प०)"—इत्यस्येदं रूपमिष्टं विच्छ्रुतमितीत्यभिप्रायः। "भ्रुकरेभ्यन्दसि (७, २, ३१)"—इति भ्रु धादेश्चः। "अविच्छ्रुत मखण्डित मायुः"—इति वेददीपः य० मा० प्रा० स० ३२, ९०।

§ "आयुः"—इत्यन्ननामसु चत्वारिंशं पदम् २, ७।

‖ "जॄङ् गतौ (भ्वा०आ०)"—इत्यस्यैव णिजन्तस्येदं जूत इति रूपमित्यभिप्रायः।

+ "मन्त्रे घसह्वरणशवृदहादेरात्मनः"—इति पा० ६, ४, १४१।

अथ तृतीया।

३ २ ३ २ ३ १ २ ३ १ २ ३
चित्रन्देवानामुदगादनीक
१ २ ३ २ ३ १ २ ३ २
श्चक्षुर्मित्रस्यवरुणस्याग्नेः।
२ ३ १ २ ३ २ ३ १ २ ३
आप्राद्यावापृथिवी अन्तरिक्ष्ँ
१ २ ३ १२ २२ ३ १ २
सूर्यआत्माजगतस्तस्थुषश्च ॥ ३ ॥ ४४ *

† १ १ १ १ १ १
उवो२उवि। उविहो२उवि। त्रिः। इती२इति।
१ १ १ १ १ १
इतिहो२इति। त्रिः। असी२असि। असिहो२अ
१ २ २ २ १ २ १२ १ १
सि। त्रिः। अरुरुचोदिवम्पृथिवीम्। असी२असि।
१ १ १ २ ३ १ २ २ २ २
असिहो२असि। एवन्त्रिः। पतिर। स्यपामोषधीना

पूरयति पालयति वा। "बहुधा" "विराजति" विशेषेण दीप्यते च॥

"पिपर्ति"-"पुपोष"—इति, "बहुधा"—"पुरुधा"—इति च पाठो॥ २॥ ४३

---

* ऋ० १, ८, ७, १।

† "आदित्यव्रतम्"—इति आ० ब्रा० ३, २, २९।

१ २ १२ ३ ५ १
३म्। ओइ। पताइरा२३४सी। एवम् त्रिः। चा
१२र१र२र१ २र१र२ १ र२रर१रर
इ। चन्देवानामुदगादनीकम्। वाइश्वेषान्देवानाए
२१ २१र २१र १ १र
समिदजस्रज्ञयोतिरातता२म्। होइ। ३। आयुर्यन्।
१ १ २१२१ २र १र २
३। अवः। ३। चक्षुर्मित्रस्यवरुणस्याग्नेः। सुवःसए
३२ १ २ २१र १ १ १
सर्पसएसार्पा३। जनावनएसुवा२ःसुवः। जना२वना
१ १ १र र र र ७
२म्। सुवा२ःसुवः। त्रिः। आप्राद्यावापृथिवीआन्त
२ २ र रर २ र र
रीर२३क्षाअम्। रुपिप्ररुपीऐच्ही। ३। अस्तोषतस्वभा
र रर २र र रर २रर
नवाऐच्ही। विप्रानविष्टयामताएच्ही। ग्रावाणोवर्हिषिप्रि
रर र २ रर र १ १
याऐच्ही। इन्द्रस्यरएच्हिम्बृहादैच्ही। इन्द्रा२स्यरा२।
१ २ रर र
च्हियाअम्। बृहदिन्द्रस्यरएच्हियम्बृहादैच्ही। ३। एवं
१र र र ७ २ २
त्रिः। सूर्यआत्माजगतस्तास्थुषार२३आ३। अन्तश्चरति
र रर र २ र र र र र रर
रोचनाऐच्ही। ३। अस्यप्राणादपानता। ऐच्ही। ३।

२ र र र र र १र२र र र १ऽ
व्यख्यन्महिषोदिवामैद्दी । ३ । प्रोणतिप्रोणति । ३ । प्रो ।
२र १ ३र२ ५र र २ २र१र
णति । २ । प्रो२३ । एता३४औहोवा । ए३ । देवा
र र ११११
दिवाज्योती२३४५: ॥ १ * ॥

२र र २र ३र२र ३र र २ र
† हाउहाउहाउ । भ्राजाओवा । ३ । उदुत्यञ्जा । ३ ।
२ १ र र र ० २ २र र ३र २र
चित्रन्देवानामुदगादनी२३काऽम् । हाउ२हाउ । भ्राजा
३र र २र १ ७
ओवा । ३ । तवेदसम् । ३ । चक्षुर्मित्रस्यवरुणस्याऽ२३
२ २र र ३र२र३र र २र र
ग्नाऽइ: । हाउ२हाउ । भ्राजाओवा । ३ । देवंवहा ।
१र र र २ र ७ २ २र २र
३ । आप्राद्यावापृथिवीअन्तरी२३क्षाऽम् । हाउ२हाउ ।
३र२र३र र २र १र र र
भ्राजाओवा । ३ । तिकेतवः । ३ । सूर्यआत्माजगतस्ता
७ २ २र र ३र२र३र र २ र
स्थुषा२३श्वाऽ३ । हाउ२हाउ । भ्राजाओवा । ३ । दृशे
र १र र र ७ २ २र
विश्वा । ३ । सूर्यआत्माजगतस्ताथुषा१२३श्वाऽ३ । हाउ

---

* आ० गा० ३प० ६, २, १ ।

† "सौर्यातिषङ्गः"—इति आ० ब्रा० ३, २, २६ ।

२ ३र २र ३र र २ र १
२ह्वाउ। भ्राजाओवा। ३। यसूर्यम्। २। यसू२३रि
२ २ २र १र र र ३ १ १ १ १
याउ। वा३। ए३। देवादिवाज्योती२३४५:॥ ४*॥

२र २र १ र २ २र १ र २
† ह्वाउ। ३। भ्राजाभ्राज। ३। आयूरायुः।
१ २ र १र २ २ १ र र र
३। उदुत्यच्चा। ३। तवेदम्। ३। चित्रन्देवाना-
७ २ २र २र १ र २ २
मुदगादनी२३काइम्। ह्वाउ। ३। भ्राजाभ्राज। आ
१ र २ १र २ र १ ७ २
यूरायुः। देवंवह्वा। ३। चक्षुर्मित्रस्यवरुण। स्याआ२३ग्ना
२र २र १र १ र २ २र १ र २
इदः। ह्वाउ। ३। भ्राजाभ्राज। आयूरायुः। ३।
१ र २ १र र र र ७ २
तिकेतवः। ३। आप्राद्यावापृथिवीआन्तरी२३क्षाइम्।
२र २र १ र २ २र १ र २ १ र २
ह्वाउ। ३। भ्राजाभ्राज। आयूरायुः। २। दृशेवि
र १र र र ७ २ २र
श्वा। ३। सूर्यआत्माजगतस्तास्थुषा२३श्वाइ। ह्वाउ। ३।
२र १ र २ २र १ र २ १ र २
भ्राजाभ्राज। ३। आयूरायुः। ३। यसूर्यम्। ३।

---

* आ० गा० ३प० ६, २, ४।

† "मित्रावरुणयोः श्रोत्रमित्याचक्षते"—इति आ० ब्रा० २, २, १९।

१ २ २ २ २१२ २ २ ३ १ १
यसू २ ३ रियाउ। वाइ। ए३। देवादिवाज्योती २ ३
१ १
४ ५: ॥ १९ * ॥ ४४

कुत्साः। "देवानां" दीव्यतीति देवा रश्मयः तेषां, देवानामेव वा प्रसिद्धानाम् † "अनीकं" तेजः समूह रूपं "चित्रम्" आश्चर्यकरं सूर्यमण्डलम् "उदगात्" उदयाचलं प्रयासीत्। कीदृशम्? "मित्रस्य वरुणस्याग्नेश्च चक्षुः" उपलक्षणमेतत्, एतदुपलक्षितानां जगतां चक्षुः प्रकाशकं चक्षुरिन्द्रियस्थानीयं वा। उदयं प्राप्यैव "द्यावापृथिवी" दिवं च पृथिवीं च "अन्तरिक्षं" च "आप्राः" स्वकीयेन तेजसा "आ" समन्तात् अपूरयत्। ईदृग्भूत-मण्डलान्तर्वर्ती सूर्यः अतर्यामितया सर्वस्य प्रेरकः परमात्मा "जगतः" जङ्गमस्य "तस्थुषश्च" स्थावरस्य च "आत्मा" स्वरूपभूतः स हि सर्वस्य स्थावर-जङ्गमात्मकस्य कार्य-वर्गस्य [कारणाच्च कार्यं नातिरिच्यते। तथाच पारमर्षं सूत्रम् ‡—"तदनन्यत्व मारम्भण शब्दादिभ्यः"—इति] यद्वा। स्थावर-जङ्गमात्मकस्य सर्व-प्राणिजातस्य जीवात्मा। उदिते हि सूर्ये मृतप्रायं सर्वं जगत् पुनश्चेतनयुक्तं सत् उपलभ्यते ¶ [तथाच श्रूयते—"योऽसौ तमो नुदेति सर्वेषां प्राणानादायोदेतीति"॥ ३ ॥ ४४

---

* आ० गा० ३५० ६, २, १९।

† "देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देवः। सा देवता"—इति निरु० दै० १, १५।

‡ "सांख्यशास्त्र-प्रणेतृ-कपिलनामर्षि-कृतमित्यर्थः।

¶ "चाग्नेयीयं देवाना मुदगम दनीकं स्थानं मित्रस्य वरुणस्याग्ने चापूपुरद् द्यावाश-

अथ चतुर्थी।

१२ २२ ३ १२३३ १२३२
आयङ्गौःपृश्निरक्रमीदसदन्मातरम्पुरः।
३१२ ३१ २
पितरञ्चप्रयंत्स्वः॥ ४॥ ४५॥ *

१ ऽ १ ऽ १ २
उवौ२। ३। हिगो२। ३। हिगिगि। ३।

द्यिव्यौ चान्तरिक्षञ्च महत्त्वेन तेन सूर्य आत्मा जङ्गमस्य च स्थावरस्य च''—इति निरु० दै० ६, १६। अत्र वेददीपकद्व्याख्यानन्त्वेवम्—''परापररूपेण स्थितः सूर्योऽव सूयते। सूर्यः चित्र माश्चर्यं यथा तथा उदङ्गात् उदयं प्राप्नः उद्गच्छति वा। डाड्य डुङ्। उदयन्नेव स्वतेजसा नैशं तमो हन्ति अन्येषां ज्योतींष्यादत्त इत्याश्चर्यम्। किम्भूतः सूर्यः? देवानां दीव्यन्ति द्योतन्ते इति देवाः किरणास्तेषा मनीकं मुख मात्रय इत्यर्थः। यद्वानीकं समूहः किरणपुञ्ज इत्यर्थः। तथा मित्रस्य वरुणस्य अग्नेः चक्षुः नेत्रवत् प्रकाशक इत्यर्थः। मित्रादय उपलक्षकाः सर्वस्य सदेवमनुष्यस्य विश्वस्य रूपाणि सूर्योदयेऽभि व्यञ्जन्ते अतो मित्रादीनां चक्षुः स सूर्य उद्गतः सन् द्यावा पृथिवी दिवं भूमिं चान्तरिक्षं चाप्राः आपूरितवान् आपूरयति वा स्वतेजसेति शेषः। एवमपररूपेण स्तुत्वापररूपेण स्तौति—किम्भूतः सूर्यः? जगतो जङ्गमस्य तस्थुषः स्थावरस्य च जगत आत्मा अन्तर्यामी। यमेतमादित्ये पुरुषं वेदयन्ते इन्द्रः स प्रजापतिस्तद्ब्रह्मेति 'अग्नेः' सूर्योदेतमनेनोच्यते इति भावः" (य० मा० ग्रा० स० ७, ४२)॥ ''हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्। योसावादित्ये पुरुषः सोऽसावहम्''—इति वाजसनेयोपनिषद्लिंगा ऋक्॥ ''पुरुषः पुरिषादः पुरिशयः पूरयतेर्वा पूरयत्यन्तरित्यन्तर पुरुषमभिप्रेत्य''—इति निरु० नै० २, ३।

* उ० ६, १, ११, १=ऋ० ८, ६, ४०, १।

† ''गन्धर्वाप्सरसा मानन्दप्रतिनन्दौ पक्षौ''—इति आ० ब्रा० ३, २, २९। तच्चेद मानन्दनाम साम।

१र र र र र २ र र र र
आयङ्गौःपृश्निरक्रमीदैह्वी। ३। असदन्मातरम्पुराऐह्वी।
२ र र र १ऽ १ऽ
३। पितरञ्चप्रयंत्स्वा ऐह्वी। ३। उवी२। ३। ह्विगी२।
१ २
३। ह्विगिगि। ३॥ २ *॥

२१ २ १ २ १ २र र
† उवी। ३। ह्विगी। ३। ह्विगिगी। ३। आयङ्गौः
र र र २ र र र र २
पृश्निरक्रमीदैह्वी। असदन्मातरम्पुराऐह्वी। पितरञ्चप्र
र र र २ १ २ १ २ १
यंत्स्वाऐह्वी। उवी। ३। ह्विगी। ह्विगिगी॥ ३ ‡॥

२ऽ १ २ ३र २र ३र र २र र
¶ ह्वाउ३वा। ईन्दूः। भ्राजाओवा। ३। आयङ्गौः
र र र २ऽ १ २ ३र २र ३र र
पृश्निरक्रमीदैह्वी। ह्वाउ३वा। ईडा। भ्राजाओवा। ३।
२ र र र र २ऽ १ ३ ३र २र ३र
असदन्मातरम्पुराऐह्वी। ह्वाउ३वा। सात्यम्। भ्राजाओ

---

* आ० गा० ३५० ६, २, २।

† "तत्र प्रतिनन्द"—इति आ० ब्रा० ३, २ २९।

‡ आ० गा० ३५० ६, २, ३।

¶ "तिस्रः सार्परराज्ञः"—इति आ० ब्रा० ३, ९, २९। तत्र प्रथम मिदम्।

र २ र र र २ १ २
वा। ३। पितरञ्चप्रयंत्स्वाऽएहीं। हाउ३वा। द्यौयोः।
॥ ७ * ॥ ४५

आयङ्गौः पृश्निरित्यस्य मार्पराज्ञो समैक्षत।
ऋचस्त्रिस्त्रो भवेदासां विकल्पेनाग्निदेवता॥

"गौः" गमनशीलः † "पृश्निः" प्राप्तवर्णः व्याप्ततेजाः‡ "अयं" सूर्यः "आक्रमीत्" आक्रान्तवान् उदयाचलं प्राप्तवानित्यर्थः। आक्रम्य च "पुरः" पुरस्तात् पूर्वस्यां दिशि "मातरं" सर्वस्य भूतजातस्य निर्मात्रीं "भूमिम्" "असदत्" आसीदति प्राप्नोति [सदेश्छान्दसो लेट्¶। लृदित्वात् च्लेरङादेशः§] ततः "पितरं" पालकं द्युलोकम्, ; "च" अन्तरिक्षं "प्रयन्" प्रकर्षेण शीघ्रं गच्छन् "स्वः" सूर्यरणः॥ शोभन-गमनो भवति। यद्वा। पितरं स्वर्द्यूलोकं प्रवर्त्तते॥ ४॥ ४५

---

* आ० गा० ३प० ६, २, ७।

† "गौरादित्यो भवति गमयति रसान् मरुत्वन्तरिक्षेऽथ द्यौर्यत् पृथिव्या अधिदूरं गता भवति यद्वास्यां ज्योतींषि गच्छन्ति"—इति निरु० नै० २, १४।

‡ "पृश्निरादित्यो भवति प्राश्नुत एनं वर्ण इति नैरुक्ताः संस्पृष्टा रसान् संस्पृष्टा भासं ज्योतिषां संस्पृष्टो भासेति वाथ द्यौः संस्पृष्टा ज्योतिर्भिः पुण्यलक्षणैश्च"—इति निरु० नै० २, १४।

¶ "लिङर्थे लेट्"—इति पा० ३, ४, ७।

§ "पुषादिद्युताद्यृदितः परस्मैपदेषु"—इति पा० ३, १, ५५।

‖ "स्वरादित्यो भवति सु अरणः सुईरणः स्वृतो रसान् स्वृतो भासं ज्योतिषां स्वृतो भासेति वैतेन द्यौर्व्याख्याता"—इति निरु० नै० २, १४।

अथ पञ्चमी।

१ १ १ ३ २उ ३ १ २ १ २
अन्तश्चरतिरोचनास्यप्राणादपानती।

२र ३ १ २र
व्यख्यन्महिषोदिवम् ॥ ५ ॥ ४६ *

१र र र र र १ १र र र र र १
† औहोऔहोवा। हो३। २। औहोऔहोवा। हा३१

१ १ ३ ५ २ १ २ र १र १र
ओ। वा२३। भू२३४वात्। अन्तश्चरतिरोचना। औ

र र र र १ १र र र र र २
होऔहोवा। हो३। २। औहोऔहोवा। हा३१उ।

१ ३ ५ २ १ २र १र २र १र १र र
वा२३। जा२३४नात्। अस्यप्राणादपानती। औहो

र र र १ १र र र र र २
औहोवा। हो३। २। औहोऔहोवा। हा३१उ।

१ ३ ५ १ २ १र १र र
वा२३। वा२३४र्हान्। व्यख्यन्महिषोदिवम्। औहो

र र र र १र र र र र २
औहोवा। हो३। २। औहोऔहोवा। हा३१उ।

१ १र र र र र १ १र
वा२३। का२३४रात्। औहोऔहोवा। हो३। २। औ

र र र र २ १ ३ ५ १र र
होऔहोवा। हा३१उ। वा२३। भू२३४तीः। औहो

---

* उ० ६, १, ११, २= ऋ० ८, ८, ४७, २।

† "मघवतां भूतिः"—इति आ० ब्रा० २, १, २९।

र र र १ १र र र र र २
औहोवा। हो३इ। २। औहोऔहोवा। हा३१उ।
१ १र२र १र २ र र ११ र र र र १
वा२। अभ्राजीज्योतिरभ्राजीत्। औहोऔहोवा। हो
१र र र र र २ १ २
इ। २। औहोऔहोवा। हा३१उ। वा२३। ए३।
१र र र र र ११११
सर्वान्कामानग्नीमहो२३४५॥ ६ * ॥

१ १ ३र २र ३र र २
† हाउ३वा। भूतम्। भ्राजाओवा। ३। अन्तश्च
र र र र २ १ २र ३र ३र
रतिरोचना। ऐहो। हाउ३वा। पृथिवी। भ्राजाओ
३र र २ र र र र र र २ १ २
वा। ३। अस्यप्राणादपानताऐहो। हाउ३वा। साहः।
३र २र ३र र २ र र र २
भ्राजाओवा। ३। व्यख्यन्महिषोदिवामैहो। हाउ३वा।
१ २
तेजः॥ ८ ‡ ॥ ४६

१ २ र र १ २ १ १
¶ अन्तर्देवेषू३रोचा१सा२इ। ३। अन्तश्चरती३रो

---

* आ० गा० ३प० ६, २, ६।

† तत्र द्वितीयमिदम्—इति (आ० ब्रा० ३, २, १८)

‡ आ० गा० ३प० ६, २, ८।

¶ "मिथावदत्ययोऽरित्याह यते"—इति आ० ब्रा० ३, २, १९।

२ २ ३ ३ १ २ २
चा१ना२। अस्यप्राणादा३पाना१ता२इ। व्यख्यन्महीऽ
१ २ २ ३ ३ १ २ २
षोदा१इवा२म्। अन्तर्देवेषू३रोचा१सा२इ। २। अन्त
३ ३ १ १ ३ ५ ३ २ २ १ ३ ३
र्देवेषू३रो२३। चा२सा२३४औहोवा। ए३। देवादिवा
३ ६ १ १ १ १
ज्योती२३४५:॥ १८ * ॥ ४६

"अस्य" सूर्यस्य "रोचना" † रोचमाना दीप्तिरन्तःशरीर-मध्ये मुख्य-प्राणात्मना "चरति" वर्त्तते। किं कुर्वती? "प्राणादपानती" [मुख्य-प्राणस्य प्राणाद्याः पञ्च वृत्तयः। तत्र प्राणनं नाड़ीभि रूर्ध्वं वायोर्निर्गमनम्] तथाविधात् प्राणात् प्राणनादनन्तरम् अपानती [अपाननं नाड़ीभि रवाङ्मुखं वायोर्नयनम्] तत् कुर्वन्ती [अपपूर्वादनितेर्लटः शतृ, (३, २, १२४) अदादिलाच्छपो लुक् (२, ४, ७२)। उगितश्चेति (४, १, ६) ङीप्। शतुरनुम इति ‡ नद्या उदात्तत्वम्। यद्वा॥ "अन्तः" द्यावापृथिव्योर्मध्ये "अस्य" सूर्यस्य "रोचना" रोचमाना दीप्तिः "चरति" गच्छति [रुच दीप्तौ (भ्वा० आ०)। अनुदात्तेतश्च

* ऋ० मा० ३५० ६, १, १८।

† रोचना इति "रोचते"—इति ज्वलतिकर्मणो रूपमित्यभिप्रायः (निघ० १ १६, ८)।

‡ "शतुरनुमो नद्यजादी"—इति पा० ६, १, १७३।

अथ षष्ठी ।

३ २उ ३ १ २ २ १ २ ३ १ २
त्रिष्णद्वामविराजतिवाक्पतङ्गायधीयते ।

१ २ ३ २ ३ २ ३ १ २
प्रतिवस्तोरहद्युभिः ॥ ६ ॥ ४७ *

२ऽ १ २ ३र २र ३र र २ र
† ह्वाउ३वा। आपः। भ्राजाओवा। ३। त्रिष्णद्वा

र र २ र २ऽ १ २ ३र २र ३र र
मविराजताऐहो। ह्वाउ३वा। ऊषा। भ्राजाओवा।

२र र र र र र २ १ २
३। वाक्पतङ्गायधीयताऐहो। ह्वाउ३वा। दीग्नः।

हलादेरिति (३,२,१४८) युच्] । किं कुर्वन्ती ? "प्राणात्" प्राणनादुदयादनन्तरम् "अपानती" सायाह्न-समये अस्तङ्गच्छन्ती। ईदृश्या दीप्त्या युक्तः अतएव "महिषो" महान् सूर्यः ‡ "दिवम्" अन्तरिक्षं उदयास्तमयोर्मध्ये "व्यख्यत्" विचष्टे प्रकाशयति [महे रचि महेष्टिषजिति औणादिकष्टिषच् प्रत्ययः। चक्षिङः ख्याञ् (२,४,५४) छान्दसे लुङि ¶ अस्यतिवक्ति ख्यातीत्यादिना (२, १, ५२) ल्लेरङादेशः ॥ ५ ॥ ४६

---

* उ० ६, १, ११, ३=ऋ० ८, ८, ४७, ३ ।

† तवैवान्तिम मिदम्—इति आ० ब्रा० ३, २, २९ ।

‡ "महिषः"—इति महन्नामसु अष्टमं निघण्टुकम् ३, ३। "महान् कस्मान्महानेगा न्यान् जहातीति शाकपूणि र्महनीयो भवतीति वा"—इति निरु० नै० ३, १२ ।

¶ "छन्दसि लुङ्लङ्लिटः"—इति पा० ३, ४, ६ ।

३र २र ३र र ९ र र र र २ऽ
भ्राजाऽओवा। ३। प्रतिवस्तोरहद्यभाऽएद्यौ। हाउ३वा।
१ २
ज्योतिः॥ ८ * ॥ ४७

"त्रिंशद्धाम" धामानि स्थानानि [वचनव्यत्ययः (३, १, ३९)] "वस्तोः" वासरस्य † अहोरात्रस्यावयवभूतानि। "अह" शब्दोऽवधारणे ‡। "द्युभिः" सूर्यस्य दीप्तिभिरेव ¶ "विराजति" विराजते विशेषेण दीप्यते [व्यत्ययेनैकवचनम् (३, १, ३९)। मुहूर्तान्यत्र धामान्युच्यन्ते। पञ्चदश रात्रेः पञ्चदशाङ्गः] "पतङ्गाय" पतति गच्छतीति पतङ्गः सूर्यः § तस्मै सूर्याय स्तुति-रूपा "वाक्" "प्रतिधीयते" प्रतिमुखं स्तोत्रमभि र्विधीयते क्रियते। यद्वा "वस्तोः" अङ्गः "त्रिंशत्" "धाम" धामानि [घटिकाभिप्रायमेतत्] त्रिंशद्घटिकाः [अत्यन्तसंयोगे द्वितीया (२,३,५)] एतावत् कालं "द्युभिः" दीप्तिभि रसौ सूर्यो "विराजति" विशेषेण दीप्यते। तस्मिंश्च समये "वाक्" त्रयी-रूपा तस्मै "पतङ्गाय" "प्रतिधीयते" प्रतिमुखं धार्यते तं पूर्वं

---

* आ० गा० ३५० ६, २, ९।

† "वस्तोः"—इति अहर्नामसु प्रथमं नैघण्टुकम् (१,९)।

‡ "अह इति च ह इति च विनिग्रहार्थौ पूर्वेण सम्प्रयुज्येते। अथ मद्देदं करोत्य मिदं च करिष्यतीदं न करिष्यतीति"—इति निरु० नै० १, ५।

¶ "द्योतत इति सतः"—इति निरु० नै० १, ६।

§ "पतङ्गाः"—इति अश्वनामसु द्वाविंशं नैघण्टुकम् २, २४।

अथ सप्तमी ।

२ ३ २ ३ १ २ ३ १ २ ३ १ २
अपत्येतायवोयथानक्षत्रायन्त्यक्तुभिः ।

१ २ ३ १ २
हरायविश्वचक्षसे ॥ ७ ॥ ४८ *

अथाष्टमी ।

१ २ ३ २ ३ २ ३ २ ३ २ ३ १ २
अहश्चन्नस्यकेतवोविरश्मयोजनाऽअनु ।

१ २ ३ १ २
भ्राजन्तोअग्नयोयथा ॥ ८ ॥ ४९ †

२ २ १ २ ३ २ २ ३ २ २ १ २
‡ हाउहाउहाउ । भ्राजाओवा । ३ । दिदीहिवि

२ १ २ १ २ १ २
श्वतस्तृथुः । उदुत्यज्जाताऽवाइदा१सा२म् । देवंवह

२ १
सेवत इत्यर्थः ॥ [श्रूयते हि—"ऋग्भिः पूर्वाङ्गे दिवि देव ईयते, यजुर्वेदे तिष्ठति मध्ये अह्नः । सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्यः"—इति । यदा त्विह सूक्ते सार्परराज्ञ्या आत्मस्तुतिस्तदा सूर्यात्मना स्तूयत इत्यवगन्तव्यम् ॥ ६ ॥ ४७

---

* ऋ० १, ४, ७, २ । † ऋ० १, ४, ७, ३ ।

‡ "षडेन्द्राः परिधयश्छन्दसाम्"—इति आ० ब्रा० ३, ९, २९ । तत्र प्रथम मिदम ।

१ २ २ २ र १ २ २
न्तीऽकाइता१वा२:। इषेविश्वायाऽसूरा१याऽ२म्। अ
२ र १ २ २ र १ २
पत्यतायाऽवोया१था२। नक्षन्तीयाक्रू१भाऽइ:।
२ २ १ २ २ १ २
सूरायविश्वाऽचाक्ता१साऽइ। अहमन्नस्याऽकाइता१वा२:।
२ १ २ २ र १ २ ऽ
विरप्शयोजाऽनाऽआ१नू२। भ्राजन्तोअग्नाऽयोया१था
२ र २ र २ र २ र ३ २ ४
२३। हाउऽहाउ। भ्राजाओवा।_ २। भ्राजाओ
१ १ १ १ १
३५वाई५६। ई २३५५॥ ११*॥

२ र २ र ३ २ र १ र २ र १ २
† हाउऽहाउ। भ्राजाओवा। ३। दिदीहिविश्वतस्पृ
१ २ र १ २ २ र
थुः। इदुत्यज्जाताऽवाइदा१साऽ२म्। देववहन्तीऽ
१ २ २ र र १ १ र २ र
काइता१वा२:। इषेविश्वायाऽसूरा१याऽ२म्। अपत्ये
र १ २ २ र १ २ २ र र
तायाऽवोदा१था२। नक्षन्तीयाक्रू१भाऽइ:। सूरा
१ २ २ १ २
यविश्वाऽचाक्ता१साऽइ। अहमन्नस्याऽकाइता१वा२:।

---

* आ० गा० ३० ६, २, ११।

† नवै र्द्विर्दितीयम्। (आ० ब्रा० २, २, २९)

२ २ १ २ २२ २ १ २
विरश्मयो ऽाइनाऽआ१नू२ । भ्राजन्तोऽअग्नाइयोया१थार३ ।

२२ २ ३ ३२३२२ ३ २ ४
ह्वाउ२ह्वाउ । भ्रुक्राओवा । ३ । भ्रुक्रा३ओ५वा६५६ ।

३ १ १ १ १
ई२३४५ ॥ १२ * ॥ ४८ ॥ ४९

"त्ये" "तायवः" "यथा" प्रसिद्धास्तस्करा इव "नक्षत्राणि" देवगेहरूपाणि ["देवगृहा वै नक्षत्राणि"—इति श्रुत्यन्तरात् । यद्वा, इह लोके मानुषा ये स्वर्गं माप्नुवन्ति ते नक्षत्ररूपेण दृश्यन्ते । तथाच श्रूयते—"यो वा इह यजते अमुं स लोकं नक्षते तन्नक्षत्राणां नक्षत्रत्वम्"—इति । यद्वा, तेषां सुकृतिनां ज्योतींषि नक्षत्राण्युच्यन्ते । "सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणीति"—आम्नानात् । यास्कस्त्वाह—"नक्षत्राणि नक्षतेर्गतिकर्मणो नेमानि नक्षत्राणीति च ब्राह्मणम्"—इति]यथाविधानि नक्षत्राणि "अक्तुभिः" रात्रिभिः सह "अप यन्ति" अपगच्छन्ति । "विश्वचक्षसे" विश्वस्य सर्वस्य प्रकाशकस्य "सूरायं" सूर्यस्य आगमनं दृष्ट्वेति शेषः [तस्करा नक्षत्राणि च रात्रिभिः सह सूर्य आगमिष्यतीत्याकुलायन्त इत्यर्थः । तायुरिति स्तेननाम (नै ३, २४, ७) तायुस्तस्कर इति तन्नामसु पाठात् । अक्तुरिति रात्रिनाम (नै० १, ७, ४) शर्वरी अक्तुरिति तन्नामसु पाठात् ॥ ७ ॥ ४८

* चारिगा० ३५० ६, २, १२ ।

अथ नवमी।

३१२ ३१२ ३१२
तरणिर्विश्वदर्शतोज्योतिष्कृदसिसूर्य।
२११२ ३२
विश्वमाभासिरोचनम्॥ ९॥ ५०*

अथ दशमी।

३२ ३ २३ १२ ३१२ २३२१२
प्रत्यङ्देवानांविशःप्रत्यङ्ङुदेषिमानुषान्।
३२७ ३क्क २२३२
प्रत्यङ्विश्वंस्वर्दृशे॥ १०॥ ५१†

अथ एकादशी।

११ ३१२ ३२३११ १५
येनापावकचक्षसाभुरण्यन्तञ्जनाँअनु।
११ ३१२
त्वंवरुणपश्यसि॥ ११॥ ५२‡

"अस्य" सूर्यस्य "केतवः" प्रज्ञापकाः "रश्मयः" दीप्तयः "जनान् अनुव्यचस्यन्" जनान् सर्वान् अनुक्रमेण प्रेक्षन्ते। सर्वं जगत् प्रकाशयन्तीत्यर्थः। तत्र दृष्टान्तः—"भ्राजन्तः" दीप्यमाना "अग्नय इव"॥

"व्यचस्यन्"-"अचस्यम्"—इति पाठौ॥ ८॥ ४९

---

* ऋ० १, ४, ७, ४। † ऋ० १, ४, ७, ५।
‡ ऋ० १, ४, ७, ६।

२र र, ३र२र३र र २ र १ २
* ह्वाउ२ह्वाउ। भूताओवा। ३। दिदीहिविश्वतस्पृ
१ २ १ २ २र ३ १ २
थुः। तरणिर्विश्वा३दार्शा१ता२ः। ज्योतिष्कृदसीसूरा१
२ र र १ १ २ र र
या२। विश्वमाभासी३रोचा१ना२म्। प्रत्यङ्देवा३
१ २ २ र १ २
नांवा१दृशा२ः। प्रत्यङ्देषी३मानू१षा२न्। प्रत्यङ्
१ २ ३र र र १ २
विश्व३सं३वार्द्द१शा२द्द्रु। येनापावका३चाक्ला१सा२।
२ १ २ २ १ २
भुरण्यन्तञ्जा३नाँ३आ१नू२। त्वंवरुणा३पाध्या१सा२३द्द्रु।
२र र, ३र २र ३र र ३र २ ४ ५
ह्वाउ२ह्वाउ। भूताओवा। २। भूता३ओ५वा६५६।
२ १ १ १ १
६२३४५॥ १३ †॥

२र र, ३र२र ३र र २ र १ २
‡ ह्वाउ२ह्वाउ। तेजाओवा। ३। दिदीहिविश्वतस्पृ
१ २ १ २ २र ३ १ २
थुः। तरणिर्विश्वा३दार्शा१ता२ः। ज्योतिष्कृदसीसूरा
२ र र १ २ र र ७र
१या२। विश्वमाभासी३रोचा१ना२म्। प्रत्यङ्देवा३

---

* तव तृतीय मिदम् (आ० ब्रा० ३, २, २९)।

† आ० मा० ३प० ६, २, १३।

‡ तव चतुर्थ मिदम् (आ० ब्रा० ६, २, २९)।

१ २ २ २ १ २ २
नांवा१इ॒षा२:। प्रत्यङ्देषी३मानू१षा२न्। प्रत्यङ्
१ २ २ २ १ २
विश्व॑ꣳसू३वार्दं१शा२इ। येनापावका३चाक्षा१सा२।
२ १ २ २ १ २
भुरण्यन्त्र्ज्रा३नाꣳआ१नू२। त्वंवरुणा३पाग्या१सा२३इ।
२२ २ ३२२३२२ ४ ३१
ह्वाउ२ह्वाउ। तेजाओवा। २। तेजा३ओपुवाई५६। ई२
१११
३४५॥ १४ *॥ ५०॥ ५१॥ ५२

हे "सूर्य" त्वं "तरणिः" प्रगन्ता अन्येन गन्तु मशक्यस्य महतोऽध्वनो गन्तासि † [तथाच स्मर्यते—"योजनानां सहस्रे द्वे द्वे शते द्वे च योजने। एकेन निमिषार्द्धेन क्रममाणं नमोस्तु ते" —इति] यद्वा। उपासकानां रोगात्तारयितासि ["आरोग्यं भास्करादिच्छेत्"—इति स्मरणात्] तथा "विश्वदर्शतः" विश्वैः सर्वैः प्राणिभिर्दर्शनीयः [आदित्य-दर्शनस्य चण्डालादि-दर्शन-जनित-पाप-निवर्हण-हेतुत्वात्। तथाचापस्तम्बः-"दर्शने ज्योतिषां दर्शनम्"—इति यद्वा, "विश्वं" सर्वं भूतजातं "दर्शतं" द्रष्टव्यं प्रकाश्यं येन स तथोक्तः] तथा "ज्योतिष्कृत्" ज्योतिषः प्रका-

---

* आ० गा० ३प० ६, २, १४।

† "तरणिः"—इति निघण्टौ तु (२, १५) क्षिप्रनामसूपान्त्यं पदं। तरणिर्वोज नानां (४३७ पृ०) मिति मन्त्र-व्याख्यानान्वय मेव व्यचक्षो तारकमिति ; माधवस्तु 'क्षिप्रं दातारं वा'—इति।

ग्रस्य कर्त्ता, सर्वस्य वस्तुनः प्रकाशयितेत्यर्थः। यद्वा, चन्द्रादीनां [रात्रौ हि अस्तमये चन्द्रादिषु सूर्य-किरणाः प्रतिफलिताः अतोऽन्धकारं निवारयन्ति। यथा दारस्य दर्पणोपरि निपतिताः सूर्यरश्मयो गृहान्तर्वर्ति तमो निवारयन्ति तद्वदित्यर्थः] यस्मादेवं तस्मात् "विश्वं" प्राप्तं "रोचनं" रोचमानम् "अन्तरिक्षम्" "आ" समन्तात् "भासि" प्रकाशयसि॥

यद्वा, हे "सूर्य" अन्तर्यामितया सर्वस्य प्रेरक परमात्मन्! "तरणिः" संसाराब्धेस्तारकोसि। यस्मात् त्वं "विश्वदर्शतः" विश्वैः सर्वैर्मुमुक्षुभिर्दर्शनतो द्रष्टव्यः साक्षात्कर्तव्यइत्यर्थः [अधिष्ठान-साक्षात्कारे हि आरोपितं निवर्तते] "ज्योतिष्कृत्" ज्योतिषः सूर्यादेः कर्त्ता [तच्चाम्नायते—"चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत"—इति*] ईदृशस्त्वच्चिद्रूपतया "विश्वं" सर्वं दृश्यजातं "रोचमानं" दीप्यमानं यथा भवति तथा "आ भासि" प्रकाशयसि [मेवं व्यक्करणे हि सर्वं जगत् दृश्यते।†

* "चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत"—इति य० मा० शा० सं० ३१ अ० १२ क०। 'यथा दध्यादि-द्रव्याणि, गवादय पशवः, ब्रह्मादयो वर्णाः, ब्राह्मणादयो मनुष्याश्च तस्मादुत्पन्नाः सन्ति चन्द्रादयो देवाः ऋषि तत्रादेवोत्पन्नादित्यर्थः। मनसः सकाशात् चन्द्रमाः जातः चक्षोः चक्षुषः सकाशात् सूर्यः अजायत। वायुः प्राणश्च श्रोत्रात् कर्णादजायत। मुखादग्निरजायत'—इति च तद्भाष्यं महीधर-कृतम्।

† "हे सूर्य! त्वं ज्योतिष्कृत् तेजसः कर्त्तासि विश्वं सर्वं भासि प्रकाशयसि च अग्नि-विद्युच्चमत्कारचन्द्रग्रहतारकादिषु त्वदीयं तेजदित्यर्थः। कीदृशं विश्वम्? रोचमानं दीप्यमानं

तथाचाम्नायते—"तमेवभान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति"—इति * ॥ ९ ॥ ५०

हे सूर्य! त्वं "देवानां" "विशः" मरुन्नामकान् देवान् † ["मरुतो वै देवानां विशः"—इति श्रुत्यन्तरात्। तान्मरुत्सञ्ज्ञकान्देवान्] "प्रत्यङ् उदेषि" प्रतिगच्छन्नुदयं प्राप्नोषि ‡। तेषा मभिमुखं यथा भवति तथेत्यर्थः। तथा "मानुषान्" मनुष्यान् प्रत्यङ् उदेषि। तेऽपि यथास्मदभिमुख एव सूर्य उदेतीति मन्यन्ते तथा "विश्वं" प्राग्ं "स्वः" द्यां लोकं "दृशे" द्रष्टुं "प्रत्यङ्" उदेषि। यथा स्वर्लोक-वासिनो जनाः स्वस्याभिमुख्येन पश्यन्ति तथा उदेषीत्यर्थः [एतदुक्तं भवति—ये लोकाः

त्वत् प्रकाशेनेति भावः। कीदृशस्त्वं तरणिः तरत्यतिक्रामति नभोवर्त्मेति तरणिः। 'अश्वविदभ्योऽनिरिति (उणा० २, ९८) तरतेरनिप्रत्ययः। विश्वदर्शतः विश्वस्य दर्शतः दर्शनीयः दृशेरतच् ॥"—इति वेददीपः।

* हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्। तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः। न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति"—इति मुण्डकोपनिषत् २, १०।

† "विशः"—इति, अग्ने जरितरिति व्याख्यायां (१५० पृ०) प्रजाः। विशोविशइति व्याख्यायां (२४४ पृ०) प्रजाः। यद्वाड इति व्याख्यायां प्रजाः, तवैव विशे यविष्ठेति च। प्रवोमहे इति व्याख्यायां (६६७पृ०) प्रजाः। निघण्टु-द्वितीय-तृतीये मनुष्यनामसु चतुर्थेच।

‡ "प्रत्यङ्डिदं सर्वं मुदेषि। प्रत्यङ्ङिदं सर्वं मभि विपश्यसीति"—इति निरु० दै० ६, २४।

पश्यन्ति ते जनाः सर्वेऽपि स्वस्वाभिमुखेन सूर्यं पश्यन्तीति *। तथाचाम्नायते—"तस्मात्सर्व एव मन्यन्ते मां प्रत्युदगात्"—इति ॥ १० ॥ ५१

हे "पावक" सर्वस्य शोधक! "वरुण" अनिष्ट-वारक सूर्य! त्वं "जनान्" प्राणिनः "भुरण्यन्तं" धारयन्तं पोषयन्तं वा इमं लोकं † "येन" ‡ "चक्षसा" प्रकाशेनानु पश्यसि अनुक्रमेण प्रकाशयसि तं प्रकाशं स्तुम इति शेषः। यद्वा, उत्तरस्या ऋचि सम्बन्धः तेन चक्षुसा उदेषीति ¶। तथाच यास्केनोक्तं §—तत्ते वयं स्तुम इति वाक्यशेषोऽपिवोत्तरस्या मन्वयस्तेन व्याख्यातीति (निरु० दै० ६, २२)" ॥ ११ ॥ ५२

---

* "ऋषिर्वैतस्या मेव। येनापावक . . . । तेन नो जनानभि वि पश्यसि"—इति निरु० ६, २५-२६।

† "भुरण्युमिति क्षिप्रनाम भुरण्युः शकुनिर्भूरि मध्वानं नयति स्वर्गस्य लोकस्यापि वोढा तत्प्रभावी भुरण्युरनेन पावकस्थानेन भुरण्यन्तं जनांश्चतुर्थं वरुण पश्यसि"—इति निरु० दै० ५, २२।

‡ ऋचि तु "येना"—इति पाठः। तत्र द्व्यचइति (६, ३, १३५) दीर्घः।

¶ "सर्वमेधे पशुकारेणाग्निक्षीयते तद्रूप मात्मानं सम्पाद्य मुक्ति मानोति तदेव प्रार्थयते—हे पावक शोधक येन चक्षसा दर्शनेन त्वं भुरण्यन्तं मनुपश्यसि; क्षिप्रपाती पक्षी भुरण्युः, भुरण्युमात्मानं करोति भुरण्यति, भुरण्यतीति भुरण्यन् तम्; क्विब्वचिप्रच्छि इत्यादिना शतृप्रत्ययः। सर्वमेधयाजिनं भुरण्युपक्षिरूपात्मानं कृत्वा स्वर्गेच्छन्तं येन चक्षसानुपश्यसीत्यर्थः। तेन चक्षसा जनानस्मानपि भुरण्यतः हे वरुण त्वं पश्य वरुणः सूर्यः"—इति वेददीपः य० मा० ग्रा० स० ३३ अ० ३८ क०।

§ "ऋषिर्वैतस्या मित्यन्तमेव यास्क वचनम्। अन्वध्येत्यादिर्मन्त्रशेषः।

अथ द्वादशी।

१२ २२३१२ ३ २ ३ १२ ३ १ २
उद्यामेषिरजःपृथ्वहा*मिमानोअक्तुभिः।
२ ३ १ २
पश्यञ्जन्मानिसूर्य ॥ १२ ॥ ५३ †

अथ त्रयोदशी।

२ ३२३ २ ३ २३२२ ३२२२२
अयुक्तमस्यरुन्धवःसूरोरथस्यनप्त्यः ‡।
१ २ ३१२
ताभिर्यातिस्वयुक्तिभिः ॥ १३ ॥ ५४ ¶

अथ चतुर्दशी।

३१२ २ २३२३१२
सप्तत्वाहरितोरथेवहन्तिदेवसूर्य।
३ १ २
शोचिष्केशंविचक्षण ॥ १४ ॥ ५५ §

॥ पञ्चम-दशति ॥

---

* "रजस्यथवा"—इति च ऋ० पाठः। † ऋ० १, ४, ७, ७।
‡ "नप्त्यः"—इति ऋ० पाठ। ¶ ऋ० १, ४, ७, ९।
§ ऋ० १, ४, ७, ८।

२र र, ३ २र३र र २ र १
* ह्वाउ२ह्वाउ। सत्याओवा। ३। दिदीहिविश्वत
२ १ २ र र १ २ २ र ७र
स्पृथुः। उद्यामेषिराइजाःपा१र्थू२। अहामिमानोइ
१ २ २ र १ १ २
आक्तूभा२इः। पश्यञ्जन्मानोइसूरा१या२। अयुक्त
१ २ र र १ २ २र
सप्ताइशून्ध्यू१वा२ः। सूरोरथस्याइनाप्ना१या२ः। ता
र १ २ २ र १२
भिर्यातिस्वाइयूक्ता१इभी२ः। सप्तत्वाहरीइतोरा१था२
२ र १२ २र र १ २
इ। वहन्तिदेवाइसूरा१या२। शोचिष्केशंवीइचाक्ता१णा
२र र, ३ २र३र र ३ २ ४
२३। ह्वाउइह्वाउ। सत्याओवा। ३। सत्याइओ५वा६५
११११
६। ई२३४५॥ १५ †॥

१र र, ३ २र३र र २ र १ २
‡ ह्वाउ२ह्वाउ। ऋताओवा। ३। दिदीहिविश्वतस्पृ
१ २ र र १ १ २ र र ७र १ २
थुः। उद्यामेषिराइजाःपा१र्थू२। अहामिमानोइआक्तू
२ र १२ २
१भा२इः। पश्यञ्जन्मानोइसूरा१या२। अयुक्तसप्ताइ

---

* तत्र पञ्चम मिदम् (आ० ब्रा० ३, २, २९)।

† आ० गा० ३प० ६, २, १५।

‡ तत्रान्तिमं षष्ठ मिदम् (आ० ब्रा० ३, २, २९)।

१ २ ३ ३ १ २ २३ ३
शून्ध्यूषा३:। सूरोरथस्याऽनाप्याऽया३:। ताभिर्याति
१ २ २ ३ १ २ २
स्वाऽयुक्ताऽइभी३:। सप्तत्वाहरीऽतोराऽथा३ऽइ। वह
३ १ २ २३ ३ १ २ २३
न्तिदेवाऽसूराऽया३। शोचिष्केशंवीऽचाऽत्ताऽणा२३। हाउ
३ ३ १ २३२३ ३ २ ४ ३१
हाउहाउ। ऋताऽओवा। ३। ऋताऽओपूवा६५६। ई२
१११
३४५॥ १६* ॥ ५३ ॥ ५४ ॥ ५५

हे "सूर्य!" त्वं "पृथु" सुविस्तीर्णं "रजः" लोकं ["लोका रजांस्युच्यन्ते" †—इति यास्क-वचनात्] द्युलोकं "द्याम्" अन्तरिक्षलोकम् "उदेषि" उद्गच्छसि ‡। किं कुर्वन्? अहानि "अक्तुभिः" रात्रिभिः सह "मिमानः" उन्मानयन् [आदित्यगत्यधीनत्वादहोरात्र-विभागस्य] तथा "जन्मानि" जननवन्ति भूतजातानि "पश्यन्" प्रकाशयन्॥

"उद्याम्"-"विद्याम्"—इति पाठौ॥ १२ ॥ ५३

---

* आ० गा० ३५० ६, २, १६।

† "रजो रजतेः। ज्योती रज उच्यते। उदकं रज उच्यते। लोका रजांस्युच्यन्ते अहर्गणनो रजसी उच्येते। रजांसि चिता विचरन्ति तन्यव इत्यपि निगमो भवति"—इति निरु० ४, १९।

‡ "अपि द्यां रजश्च पृथु महान्तं लोकमहानि च मिमानोऽक्तुभीरात्रिभिः सह मध्यङ्गन्नाति जातानि सूर्यः। एषि वा पर्वस्याम्"—इति यास्कः दै० ६,२१।

"सूरः" सर्वस्य प्रेरकः सूर्यः* "शुन्ध्युवः" शोधिका अश्वस्त्रियः †। तादृशीः "सप्त" सप्त-सङ्ख्याकाः ‡ "अयुक्त" स्व-रथे योजितवान् ¶। कीदृशीः? "रथस्य" "नप्त्यः" नपातयित्र्यः। याभिर्युक्तो रथो याति न पतति इदृशीरित्यर्थः। एवम्भूताभिस्ताभिरश्वस्त्रीभिः "स्वयुक्तिभिः" स्वकीय-योजनेन रथे सम्बद्धाभिः "याति" यज्ञमहं प्रत्यागच्छति। अतस्तस्मै हविर्दातव्य मिति वाक्यशेषः॥ १३॥ ५४

हे "सूर्य!" "देव" द्योतमान! "विचक्षण!" सर्वस्य प्रका-

---

* सूरशब्दः सूर्यार्थोऽत्र सर्वत्र—ऋ० १, २, ४, ३—२, १, ४, ४—५, २, ३, ७—उ० ७, १, ८, १—४, २, १, १२—५, १, ८, २—५, १, ८, २—६, १, २, १—६, १, ४, २—९, १, ४, १। सोमार्थस्थानयोरेव—उ० ३, १, ५, १—४, १, २०. २॥

† "शुन्ध्युवः शुन्ध्युरादित्यो भवति शोधनात् तस्यैव। * * *। * * अक्तुनिरपि शुन्ध्युरुच्यते शोधनादेवोदकचरो भवति। आपोऽपि शुन्ध्युव उच्यन्ते शोधनादेव"—इति निरु० नै० ४, १६।

‡ "सप्त ऋषा सप्तधा सप्तादित्यरश्मय इति वदन्ति"—इति निरु० नै० ४, २६। "सप्त युञ्जन्ति रथमेकचक्रमित्यादि निरु० नै० ४, २७। "सप्त प्राणाः प्रभवन्ति तस्मात् सप्तार्चिषः समिधः सप्त होमाः। सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया निहिताः सप्त सप्त"—इति मु० उ० २, १।

¶ "रथे तिष्ठन्नयति वाजिनः पुरस्तात् सतो यत्र यच्च कामयते सुषारथिः। कल्याणसारथि रभीशूनां महिमानं पूजयामि मनः पश्चात् सन्नोऽवयच्छन्ति रश्मयः"—इति निरु० दै० ३, १६। अपिच—"रथं चित्रं मारुतं मेघं वयं श्रवणीय माक्षयमद्धा यस्मिन्नश्वो वरमणीयान्युदकानि विश्वतो सचा मरुद्भिः सह रोदसी"—इति निरु० दै० ५, ५०।

शयितः। "सप्त" सप्त-सङ्ख्याकाः "हरितः" अश्वाः*रस-हरण-शीला रश्मयो वा† "त्वा" त्वां "वहन्ति" प्रापयन्ति। कीदृशम्? "रथे" अवस्थितमिति शेषः। तथा "शोचिष्केशं" शोचींषि‡ तेजांस्येव यस्मिन् केशा इव¶ दृश्यन्ते स तथोक्तस्तमिति §॥ ॥ १४ ॥ ५५

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने षष्ठीऽध्यायस्य पञ्चमः खण्डः॥

---

* "हरितआदित्यस्य"—इति अश्वविशेषनामसु निघ० १, १५, ३। "अश्वः कस्मादश्नुतेऽध्वानं महाशनो भवतीति वा। * * *। तस्मादश्ववत् देवतावच्च निगमा भवन्ति"—इत्यादि निरु० नै० २, २७; दै० ४, ३०-३१।

† "सप्त ऋषयः"—इति रश्मिनामसु निघ० १, ५, १२। अत्र च यास्कः "रश्मिर्यमनात्"—इत्यादि निरु० नै० २, १५।

‡ "शोचिः"—इति ज्वलन्नामधेयेषु षष्ठं नैघण्टुकम् १, १७।

¶ "केशी केशा रश्मयस्तैस्तद्वान् भवति काशनाद्वा प्रकाशनाद्वा। तस्यैषा भवति * * *। केशीदं सर्वं बिभर्ति केशीदं ज्योतिरुच्यत इत्यादित्य माह। अथाप्येते इतरे ज्योतिषी केशिनी उच्येते धूमेनाग्नी रजसा च मध्यमः। * * *। एक एषा मित्यग्निः पृथिवीं दहति। सर्वं मेकोऽभि विपश्यति कर्मभि रादित्यो गतिरेकस्य दृश्यते न रूपं मध्यमस्य"—इति निरु० दै० ६, २५-२६-२७।

§ "सप्तैतानादित्य रश्मीनयमादित्यो गिरति मध्यस्थानोर्ध्वश्चब्दो यत एतस्मिंस्तिष्ठति तानि धीतिभिश्च मनसा च विपर्ययन्ति परि भुवः परिभवन्ति सर्वाणि कर्माणि वर्षकर्मणेत्यधिदैवतम्। अथाध्यात्मं सप्तेमानीन्द्रियाण्ययमात्मा गिरति मध्यस्थानोर्ध्वश्चब्दो यान्यस्मिंस्तिष्ठति तानि धीतिभिश्च मनसा च विपर्ययन्ति परि भुवः परिभवन्ति सर्वाणीन्द्रियाणि ज्ञानकर्मणेत्यात्मगतिमाचष्टे"—इति निरु० प० २, २१।

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ६ ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिक-मार्ग-प्रवर्त्तक-
श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्येण विरचिते माधवीये सामवेदार्थ-प्रकाशे
छन्दोव्याख्याने आरण्यएवाध्येतव्यः
षष्ठोऽध्यायः समाप्तः ॥

॥ समाप्तम् आरण्यम् पर्व आरण्यकाण्डं वा ॥

॥ इति चतुर्थम्पर्व ॥

॥ सामवेद-संहितायां छन्दआर्चिकः समाप्तः ॥

॥ ओं नमः सामवेदाय ॥

॥ सामवेदसंहिता ॥

तव

॥ अथ महानाम्न्यार्चिकः ॥ *



(भाष्यकृतोभूमिका)

ऐन्द्रोरथ महानाम्नीः शक्वरीर्वा विकर्षिताः ।
पञ्चभिः सहिता अन्ते पुरीषपदनामभिः ॥
एताः प्रकृतितस्तिस्र उपसर्गैस्तु संयुताः ।
नव सङ्ख्या इति प्राहुर्वेदाध्ययनशालिनः ॥
ऐतरेय-ब्राह्मणेऽपि शस्त्रे षोडशि-नामके ।
तिस्रः प्रोक्ता महानाम्नास्त्रैलोक्यात्मत्ववर्णनात् ॥

---

* महानाम्नीनां पाठस्तु न तु ऋन्दस्यार्चिके नापि उत्तरार्चिके परं ऋन्दस्यार्चिके समाप्ते तत्पुस्तकान्त्यभागे एव सर्वत्र दृश्यते, एव मारण्यगाने समाप्ते च ततोऽनन्तरं महानाम्नी-सामपाठस्तवैव पुस्तके सर्वत्रेति परिशिष्टत्व मासा मस्य च ज्ञायत इति ऋन्दस्यार्चिकान्ते एव व्याख्यातवान् भगवान् सायणः ।

तत्र हि महानाम्नीना मुपसर्गानुपसृजत्यय वै लोकः प्रथमा महानाम्नान्तरिक्षलोको द्वितीयाऽसौ लोकस्तृतीयेति । नन्वेताः शक्करीच्छन्दस्का व्याक्रियन्त इ युक्ताश्चेत् षट्पञ्चाशदक्षराः स्युः । तथा च समाम्नातं चतुर्विंशत्यादि चतुरुत्तरमिति (पि०) । अस्यार्थः—गायत्र्यादीना मतिधृत्यन्तानां छन्दसां चतुर्विंशत्यक्षरा ण्यारभ्य उत्तरोत्तरं चतुर्षु चतुर्षु अक्षरेष्वधिकेषु सत्सु उष्णि-गादि-च्छन्दांसि जायन्ते*। एवं क्रमशोऽक्षराधिक्ये सति शक्करी षट्पञ्चाशदक्षरा सम्भवतीति । एता ऋचस्तु शक्करीभ्योऽधि-काक्षरा दृश्यन्ते । तस्मादासा मुपसर्गाक्षरैराधिक्यं न तु स्वत इति ज्ञायते । तर्हि के पुनरुपसर्गाः ? के पुनः शाक्कराः पादाः ? इत्युच्यते—

---

* छन्दांसि

छन्दोनाम	अक्षरसंख्या
१ गायत्री	२४
२ उष्णिक्	२८
३ अनुष्टप्	३२
४ बृहती	३६
५ पङ्क्तिः	४०
६ त्रिष्टुप	४४
७ जगती	४८

अतिच्छन्दांसि

छन्दोनाम	अक्षरसंख्या
१ अतिजगती	५२
२ शक्करी	५६
३ अतिशक्करी	६०
४ अष्टिः	६४
५ अत्यष्टिः	६८
६ धृतिः	७२
७ अतिधृतिः	७८

विच्छन्दांसि

छन्दोनाम	अक्षरसंख्या
१ कृतिः	८०
२ प्रकृतिः	८४
३ आकृतिः	८८
४ विकृतिः	९२
५ संस्कृतिः	९६
६ अतिकृतिः	१००
७ उत्कृतिः	१०४

प्रथमा। "विदामघवन्विदा"--इति द्विपदा ऋगुपसर्गः। ततः "शिक्षाशचीनाम्पते"—इत्याद्यास्त्रयोऽष्टाक्षराः शाक्कराः। ततः "स्वर्णांशुः"—इति पञ्चाक्षरः पादः। अत्राक्षर-विश्लेषेण पञ्चाक्षरत्वं द्रष्टव्यम्। "प्रचेतनप्रचेतयः"—इत्यष्टाक्षरः। एतौ द्वावुपसर्गसञ्ज्ञौ। "इन्द्रद्युम्नायनइषे"—इति पादोऽष्टाक्षरः शाक्करः। "एवाहिशक्रः"—इति पञ्चाक्षर उपसर्गः। "रायेवाजायवज्जिवः"—इत्याद्यास्त्रयः पादाः शाक्कराः। "आयाहिपिबमत्स्व"—इति पादोऽष्टाक्षर उपसर्गः। इत्येव सूक्त प्रथमा॥

अथ द्वितीया। "विदारायेसुवीर्यम्"—इति द्विपदा उपसर्गः। "मंहिष्ठवज्रिन्नृञ्जसे"—इत्याद्यास्त्रयोऽष्टाक्षराः पादाः शाक्कराः। ततः "अंशुर्नश्चोचिः"—इति पञ्चाक्षरः पादः। "चिकित्वोअभिनोनय"—इति पादः। एतौ द्वावुपसर्गौ। "इन्द्रोविदेतमुस्तुहि"—इति पादोऽष्टाक्षरः शाक्करः। "ईशेहिशक्रः"—इति पञ्चाक्षरः पाद उपसर्गः। "तमूतयेहवामहे"—इत्याद्यास्त्रयोऽष्टाक्षराः पादाः शाक्कराः। "क्रतुश्छन्दऋतस्तृहत्"—इति पाद उपसर्गः। इत्येवं द्वितीया॥

तृतीयस्याः। "इन्द्रश्चनस्यसातयेहवामहे"—इति द्विपदा उपसर्गः। "सनःस्वर्षत्"—इत्याद्यास्त्रयोऽष्टाक्षराः शाक्कराः पादाः। "अंशुर्मदाय"—इति पञ्चाक्षरः पादः। "सुम्नआधेहि

नोवसो"—इत्यष्टाक्षरः पादः। एतौ द्वावुपसर्गौ। "पूर्तिः-श्रविष्ठश्रस्यते"—इति पादोऽष्टाक्षरः शाक्करः। "वशीहिशक्रः" —इति पञ्चाक्षर उपसर्गः। "नूनन्तन्व्यंसन्त्यसे"—इत्याद्यास्त्रयोऽष्टाक्षराः शाक्कराः। "शूरीयोगोषुगच्छति"—इति पादो द्वावुपसर्गाविति तृतीया ऋक् सम्पन्ना॥

अत्र प्रथमायाः सप्त शाक्कराणि पदानि, पञ्चोपसर्गाः। एवं द्वितीयस्या अपि पदान्युपसर्गाः। तृतीयायास्तु सप्त शाक्कराणि पदानि, षडुपसर्गाः। इत्युक्तार्थां निदानकल्पे सूत्रादिकं सम्यगालोचयद्भिः पूर्वाचार्यैः श्लोकद्वये सङ्गृह्य दर्शितः—

"प्रथमं द्विपदा, त्रीणि शाक्कराणि पदान्यतः।
पञ्चार्णाष्टाक्षरौ चोपसर्गावेकश्च शाक्करः॥ १॥
पञ्चार्ण उपसर्गोऽथ त्रयस्ते बहिरन्तिमः।
इय माद्या; द्वितीयैवं; तृतीया पुनरन्तिमः।
अधिकोऽष्टाक्षरः पाद उपसर्ग इति स्थितिः॥२॥"—इति॥

अत्र सर्वानुपसर्गान् परित्यज्य केवल-पदगताक्षर-सङ्ख्यायां कृतायां षडधिकपञ्चाशत्-सङ्ख्याकान्यक्षराणि जायन्ते। अतस्तद् द्वितीया शक्करीति न विरोधः॥ एतासु गीयते साम यत्तच्छाक्कर मुच्यते। तत्पञ्चमेऽह्नि पृष्ठेषु होतुःपृष्ठं विधीयते।

उपसर्गैः संयुतानां मासानामिन्द्रोऽधिदेवता।
माध्यन्दिनं यत् सवनं सर्वं मैन्द्र मिति स्थितम्॥

अत्रैवाश्वलायनेन स्व-ब्राह्मण मनुसरता कश्चिद्विशेषोऽनुष्टुब् गायत्री सम्पादनादिर्दर्शितः—

"प्रचेतनप्रचेतयायाहिपिबमत्स्व।

क्रतुम्छन्दऋतम्बृहत्सुम्नआधेहिनोवसः॥"—इति। *

"चिकित्वोअभिनोनयशूरोयोगोषुगच्छति।

सखासुशेवोअद्वयुः॥"—इति। †

गायत्र्यादिरित्येव मादिः एष तु प्रयोग-सौकर्यार्थः। अस्माभिस्त्विदानीं मर्थ-सौकर्यार्थं क्रमेण सोपसर्गा ऋचो व्याख्याताः। ‡

---

* एषानुष्टुप् सम्पन्ना, अष्टाक्षर-चतुष्पदात्वस्य सम्पादनात्।

† एषा गायत्री सम्पन्ना, अष्टाक्षर-त्रिपदात्वस्य सम्पादनात्।

‡ ग्रन्थकारादयो हि ग्रथनीयं व्याख्येयं वा ग्रथमं स्व-मनस्येव सम्पादयते, ततश्च लेखन्यादिभिः काश्चतेऽतोऽत्र 'व्याख्याताः'—इति भूतप्रयोगो नासाधुः, "कौमुद्दीयं विरच्यते"—इत्यादावपीव मेव।

॥ हरिः ओम् ॥

(प्रथमास्तिस्रः)

३१ २　　१ २ १ १र २र　　१ १ २
विदामघवन्विदागातुमनुशꣳशिषो दिशः।

१ २　　३ १ २
शिक्षाशचीनाम्यतेपूर्वीणाम्यु रूवसो ॥ १ ॥

३ २उ १ १ २ १ २　　२
आभिष्टमभिष्टिभिःस्वाऽइर्न्नाꣳमुः।

१ २ १ १ २ १ १ ० ३ १ १　　१ २
प्रचेतनप्रचेतयेन्द्रद्युम्नायनदृषे ॥ २ ॥

३ २उ १ २ ३ १र २र
एवाहिशक्रोरायेवाजायवज्रिवः।

१ २　　३ २ ३ १　　२
शविष्ठवज्रिन्नृञ्जसेमꣳहिष्ठ

३ २१ १ २ ३ २३ १ २
वज्रिन्नृञ्जसआयाहिपिबमत्स्व॥ ३ ॥ १

१　　२ १र २　　१　　१र १
* ए२। विदामघवन्विदाः। गातुमनुशꣳसिषः।

१ २　　१ ५　　१र　　१ र २ र र
दाइशा३१उवा२३। ई३४डा। ए२। शिक्षाशचीनाम्य

१　　२र र १र　　१ १　　१ ५ २र
ताइ। पूर्वीणाम्पूरू२। वसा३१उवा२३। ई३४डा। आ

महानाम्नी साम (आ० ब्रा० ३,२,२९)।

१ १ २ २ ५ १ २
भिष्टमभा२इ। ष्टिभिरा३१उवा२३। ई३४डा। स्वर्ण्

१ २ २ ५ १ १२ २
ज्यो२:। हा३२उवा२३। ई३४डा। प्राचे। तनप्रचेतया।

१ २ २ १२ १ १ १ २ २ १२
इन्द्रा। द्युम्नायना२इषाइ। इडा। ईन्द्रा। द्युम्नाय

१ १ १ २ २ १२ १
ना२इषाइ। अथा। इन्द्रा। द्युम्नायना२इषाइ।

१ १२२ २ २ २ २ २ २ १
इडा। एवाहिशक्रोरायेराजायवा१ज्रीइवाः। शविष्ठ

२ ४ ५ १ १ १ २
वज्रिन्ना३। जासाइ। मंहिष्ठवज्रिन्ना२३हो। जासा३२

१ १११ १ २ २ १
उवा२३। इट्इडा२३४५। आया। हिपिबमा२

१ १ १११
त्सुवा। इडा२३४५॥—

तत्र तावदृचं, प्रथमं हिपदा माह—"विदामघन्विदागातुमनुशंसिषोदिशः"—इति। हे "मघवन्" मघं धनं [मंहते-र्दानकर्मणः *] धनवन्निन्द्र! "विदाः" त्वं विद्धि, अत्र वेदितव्यकर्म-विशेषस्यानुपादानात् सर्वं जानीहीत्यर्थः [विदेः पञ्चम-

---

* "मंहते"—इति दानकर्मसु अन्तिम निघण्टुकम् ३, २०।

लकारे रूपम् *] यतस्त्वं सर्वज्ञः तस्मात् "गातुं" यजमान-गन्तव्यं देशं † "विदाः" जानीहि । यद्वा, गातुर्गायतेः स्तुतिकर्मणः ‡ त्वदर्थं क्रियमाणां स्तोतुः स्तुतिं विद्धि । ततो "दिशः" यजमानस्य साधुमार्गेण स्वर्गं गन्तुं मार्गान् "अनु शंसिषः" अनुशंसोऽपदिशं बोधयेति यावत् [शंसतेः पञ्चम-लकारे (पा० ३, ४, ७,) रूपम् । अडागमः ¶]—अय. सुपसर्गभागः ॥

अथ शाकरभाग माह—"शिक्षाशचीनाम्पतेपूर्वीणाम्पुरूवसो । आभिष्टमभिष्टिभिः"—इति । हे "शचीनाम्पते" शची-शब्देन कर्म प्रज्ञा वा § "पूर्वीणां" बह्वीनां ‖ शचीनां पते स्वामिन् ! हे "पुरुवसो" पुरु प्रभूतं वसु धनं यस्य तस्य सम्बोधनं हे प्रभूतधनेन्द्र ! "आभिः" इदानीं क्रियमाणाभिः "अभिष्टिभिः" अभ्येषणाभिः प्रार्थनाभिः स्तुतिभि रस्मदीयाभि

---

* लेटीत्यर्थः (पा०३,४, ७) ।

† "गातुः"—इति पृथिवी-नामसु विंशं नैघण्टुकम् १,१ । "गातुं यज्ञाय गातु यज्ञपतय इत्यपि निगमो भवति । गमनं यज्ञाय गमनं यज्ञपतये"—इति निरु० नै ४, २ ।

‡ "गायति"—इति स्तुति-कर्मसु द्वितीयं नैघण्टुकम् ३, १४ ।

¶ "लेटोऽडाटौ"—इति पा० ३, ४, ९४ ।

§ "शची"—इति कर्मनामसु द्वाचत्वारिंशत्तमं नैघण्टुकम् (२,१) ; प्रज्ञानामसु सप्तमम् (३, ९) ।

‖ "पुरु"—इति बहुनामसु तृतीयं नैघण्टुकम् ३, १ ।

र्हेतुभिः "शिक्ष" * [शिक्षतिर्दानकर्मा (निघ० ३, २०, ८)] देहि वसूनीति] शेषः। पुरुवसो-इति सम्बोधन-सामर्थ्यादसू-नीति लभ्यते॥

अथोपसर्गभाग माह—"स्वर्णांशुः। प्रचेतनप्रचेतये"—इति। स्वः, न, अंशुरिति पदत्रयम्। स्वरादित्यः, † नकार उपमार्थीयः ‡। स्वः, इव [अंशुः अश्नोतेर्व्याप्तिकर्मणः (निघ० २,१८,१०)] व्याप्तो भवतीन्द्रः। हे "प्रचेतन" प्रकृष्टा चेतना बुद्धिर्यस्यासौ तस्य सम्बोधनं हे प्रशस्तज्ञानेन्द्र ! "प्रचेतय" अस्मदीयां भक्तिं मवधारय जानीहि॥

अथोभयभाग माह—"द्युम्नायनइषएवाहियक्षः"—इति। हे इन्द्र! "नः" अस्मभ्यं "द्युम्नाय" ["द्युम्नं द्योततेर्यशोवान्नं वा" —इति यास्कः (नै० ५,५)] यशसे यद्वा, द्युम्नाय [धननामैतत् (निघ० २,१०,१२) धनलाभाय] "इषे" अन्नलाभाय च भव [आख्याताध्याहारः। हि शब्दः कारण-परः] "हि" यस्मात् त्वं "यक्षः" धन-दाने समर्थ एव भवसि। तस्माद्धनादिकं प्रयच्छ॥

---

* मन्त्रे तु "शिचा"—इति दीर्घान्तः पाठः "द्व्यचोऽतस्तिङः (पा० ६, ३, १२५) —इति दीर्घः।

† स्वरादित्यो भवति"—इत्यादि निरु० नै० २, १४।

‡ "नेति प्रतिषेधार्थीयो भाषाया सुभय मन्वध्यायं नेन्द्रं देव मसंसतेति प्रतिषे-

(द्वितीया स्तिस्रः)

३ २ ३२३ २ ३ २३ १ २ ३ २ ३ २ ३ १ २
विदाराये सुवीर्यꣳ मघोवाजानाम्पतिर्वशाꣳ अनु।

१ २ ३२ ३१२ २२३ १ २
मꣳहिष्ठवज्रिन्नृज्जसे यःशविष्ठःसूराणाम्॥ ४॥

अथ शाङ्करभाग माह—"रायेवाजायवज्रिवः। शविष्ठवज्रिन्नृज्जसेमꣳहिष्ठवज्रिन्नृज्जसे"—इति। हे "वज्रिवः" वज्रवन्निन्द्र! एकोमत्वर्थीयोऽनुवादः। यद्वा, वज्रः व्रजनं गमनं तद्वान्वज्री। अथवा वज्रायुधं तद्वन्निन्द्र! "रायेे" धनलाभाय "वाजाय" अन्नलाभाय च प्रसन्नो भवेति शेषः। हे "शविष्ठ" अतिशयेन बलवन्! हे "वज्रिन्" इन्द्र! "ऋज्जसे" [ऋज्जतिः प्रसाधनकर्मा (निघ० ३, ५, ८)] अस्माभिर्धनलाभार्थं प्रसाध्यसे। यद्वा, [ऋज्जतेः पञ्चमे लकारे (पा० ३, ४, ७) रूपम्] प्रसाधय अस्मान्धनादिभिः समृद्धान् कुर्वित्यर्थः। हे "मंहिष्ठ" [मंहतेर्दानकर्मणः] अतिशयेन दानशील पूज्य! वा हे "वज्रिन्" "ऋज्जसे" अस्माभिः प्रसाध्यसे॥

अथापरभाग माह—"आयाहिपिबमत्स्व"—इति। यस्मादेवं तस्मात् "आयाहि" अस्मदीयं यज्ञं प्रत्यागच्छ। आगत्य च पिब। तं सोमं पीत्वा "मत्स्व" हृष्टो भवेति॥ (१-२-३)॥

धार्थीयः पुरस्तादुपचारस्तस्य यत् प्रतिषेधति। दुर्मदासो न सुरायामित्युपमार्थीय उपरिष्टादुपचारस्तस्य येनोपमिमीते"—इति निरु० नै० १, ४।

१ २ २ १ २ ३ २ ३ २
योमꣳहिष्ठोमघोनामꣳप्रुर्न्नशोचिः।

१ २ ३ १ २ २१ २ ३ २ २
चिकित्वोऽअभिनोनयेन्द्रोविदेतुमूस्तुहि ॥ ५ ॥

१ ३ २ ३ २ ३ ३ १ २ ३ १ २
ईशेहिशक्रस्तमूतयेहवामहेजेतारमपराजितम्।

१ २ ३ २ ३ २ ३ २ ३ २ ३ १
सनः स्पर्षदतिद्विषःक्रतुष्छन्दऋतम्बृहत्॥ ६ ॥ २

१ २ १ २ २ २ १ १ २ २ २
ए२। विदारायेसुवीरियाम्। भुवोवाजानाम्पतिर्व

१ २ २ ५ १ १
ग्राꣳ२। अनुऽआ३१उवा२३। ई३४डा। ए२। मꣳहि

२ १ १ २ ऽ २ २
ष्ठवज्रिन्नृज्रसाइ। यःꣳविष्ठःप्रूरा२णा३१उवा२३। ई३४

५ १२ २ ऽ २ २ ५
डा। योमꣳहिष्ठोमघो२। ना३१उवा२३। ई३४डा।

२ १ २ ऽ २ २ ५ १
अꣳप्रुर्नशोचा२इः। हा३१उवा२३। ई३४डा। चाइ।

१ २ २ १ २ २१२ १ १
किित्वोऽअभिनोनया। ई३न्द्रो। विदेतमू२स्तुहाइ। इडा।

१ २ २१२ १ १ १ २ २१२
ई३न्द्रो। विदेतमू२स्तुहाइ। अथा। ई३न्द्रो। विदेतमू

१ १ १२२ २ २ २ २
२स्तुहाइ। इडा। ई३शेहिशक्रस्तमूतयेहवा१मा३हाइ।

२ २ १ २ ४ ५ ६ १
जेतारमपरा३। जाइताम्। मनःस्वर्षदा२३ह्वोइ।

१ २ १ २ १ १ १ १ १ २ २ १
दाइषा३१उवा२३। इट्इडा२३४५। क्रातूः। कल्प

१ १ १ १ १ १
कृता२म्बृहात्। इडा२३४५॥—

अथ द्वितीयाया ऋचि प्रथमं द्विपदा माह—"विदाराये सुवीर्यभुवोवाजानाम्पतिर्वशाश्चन्विति। हे इन्द्र! "सुवीर्यं" शोभनोवीरः पुत्रः शोभनपुत्रोद्भव-सामर्थ्यम्। यद्वा, शोभनवीर्यं युद्धादिष्वपराजयं "विदाः" लम्भय प्रापय। किमर्थम्? "रायेः" धनार्थम् धनं रक्षितु मित्यर्थः। "वाजानां" सेनानां बलानां वा "पतिः" स्वामी त्वं "भुवः" भवसि। "वशान्" वशेः कर्मणिवशिरण्योरित्यप्रत्ययः। काम्यमानानर्थान् "अनु"[1] अभि लक्ष्य यथाकाम मित्यर्थः। यद्वा वशांस्वदधीनान् यजमानान् "भुवः" भावयसि [भवतेः पञ्चमलकारे (पा० ३, ४, ७) रूपम्। "भूसुवोस्तिङि"। (पा० ७,४,८८ —इति गुण-प्रतिषेधः॥

अथ स्तोयमाग माह—"मंहिष्ठवज्रिन्नृञ्जसेयःशविष्ठः शूराणाम्। योमंहिष्ठोमघोनाम्"—इति। हे "मंहिष्ठ" अतिशयेन बलवन्! "यः" त्व "मघोनां" मघशब्दो धनवाची तद्वतां मध्ये मंहिष्ठः अतिशयेन दाता तस्मात्दस्माभिर्धनार्थं प्रसाध्यसे॥

